यह पुस्तक खेमराज श्रीकृष्णदासने बम्बई खेतवाडी ७ वीं गली खम्बाटा लैन निज "श्रीवेंकटेश्वर" स्टीम् प्रेसमें अपने लिये छापकर यहीं प्रकाशित किया ।

विज्ञापना.

इह [illegible] सर्वैरपि गीर्वाणवाणीविलासरसिकैः—यदिदं व्याकरणशास्त्रं वेदाङ्गेषु मुख्य-मुक्तम्। तच्च शास्त्रं सूत्रात्मकम्। "ऐन्द्रं चान्द्रं काशकृत्स्नं जैनेन्द्रं शाकटायनम्। सारस्वतं चापिशलं शाकलं पाणिनीयकम्॥" इति श्लोकाद्युक्तरीत्या तत्कर्तारश्च बहवः। तेषु कस्येदानीं मुख्यत्वमिति किमर्थमेतावन्ति भिन्नभिन्नरूपेण प्रवृत्तानीति तेषु परस्परं बहुधा कचि-त्कचिद्विरोध इति चेत्यादिशङ्कास्वप्रकृता इतीदानीमुदास्महे। तदन्तःपाति यत्सारस्वताख्यं व्याकरणशास्त्रं तच्च श्रीमदनुभूतिस्वरूपाचार्येण [illegible] केनापि कारणेन दिनैकेन नवशतसूत्रात्मकं पाणिन्यादिव्याकरणाध्ययन[illegible] [illegible]।

तच्चेदं प्रायः भारतखण्डे नर्मदो[illegible] दरीदृश्यते.

तत्रास्य वृत्तयो व्याख्याश्च बह्व्यो बहुभिर्विरचिताः [illegible] [illegible]-पेवाचन्द्रकीर्तिप्रभृतयः विद्वज्जन[illegible]॥
ताश्चास्मत्कर्तृमुद्रिता अप्य[illegible] [illegible] [illegible]-[illegible] सशोधन [illegible] [illegible] [illegible] [illegible]-न्याख्याना [illegible] [illegible]-रूपोपेता सिद्धान्तचन्द्रिका [illegible] [illegible]-पूर्णा सम्पादिता सती [illegible]।

[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]।

[illegible]—

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणयन्त्र-मुंबई.

सिद्धान्तचन्द्रिकोत्तरार्द्धस्थमुख्यमुख्यविषयविभागः।

॥ श्रीः ॥

सिद्धान्तचन्द्रिकाउत्तरार्द्धस्थ-सूत्रादीनामकारादिवर्णक्रमः ।

कर्तृता। युष्मदस्मदर्थयोरेव प्रधानत्वात्कर्तृत्वेन मध्यमोत्तमावेव। अतित्वं पचतीत्यादौ तु तथात्वाभावान्न तथा। अत्व त्वं संपद्यते त्वद्भवतीत्यादौ च्व्यन्ते तु संवीभवन्ति ब्राह्मणा इत्याद्यनुरोधेन प्रकृतेरेव कर्तृत्वं न विकृतेर्युष्मदर्थस्य। उक्त च। यदा च्व्यर्थे विनिर्दिश्ये भवतो युष्मदस्मदौ। द्वयोरपि तयोर्योगे न धातोर्मध्यमोत्तमौ॥ प्रकृतेर्विकृतेर्वापि ह्येकदा प्रतिपादने वाचकः प्रकृतेः सख्यां गृह्णाति विकृतेर्न तु॥" मृद्रू घटा भवन्ति ओदनस्तुण्डुला भवन्तीत्येव॥

कर्तरि पं च॥ चादात् भू सत्तायाम्॥

(सुबोधिनी)-कर्तरि पं च॥ कर्तरि वाच्ये धातोः पं भवति चकारादादपि॥ पचति। अख्यातप्रत्ययेनोक्तत्वात्। कर्तरि प्रथमा॥ ननु भावकर्मकर्तृष्वाद्विधानात् कथं निर्णयः स्यात्। मैवं प्रयोगान्निर्णयसंभवात्। आस्ते शेते नर इत्यत्र कर्तरि प्रथमादर्शनात्॥ कर्तर्यात्॥ शय्यते आस्यते नरेणेत्यत्र कर्तरि तृतीयादर्शनात् भावे आत्॥ चक्रे करिष्यते वा घट कुलाल इत्यत्र कर्तर्यात्॥ चक्रे करिष्यते वा घटः कुलालेनेत्यत्र कमर्ण्यात्॥ कर्मणि प्रथमाया कर्तरि तृतीयायाश्च दर्शनात् कृषीष्टकेत्यत्र त्वनिर्णय एव। यथा रामाभ्यामित्यत्रानिर्णयः॥

वर्तमाने तिप् तस् अन्ति सिप् थ सूथ मिप् वस् मस् ते आते अन्ते से आथे ध्वे ए वहे महे॥ वर्तमानार्थक्रियावृत्तेर्धातोस्तिवादयः प्रत्यया भवन्ति एषां संज्ञा लट्॥

(सुबोधिनी)-वर्तमाने तिप् तस् अन्ति, सिप् थस् थ, मिप् वस् मस्, ते आते अन्ते, से आथे ध्वे, ए वहे महे॥वर्तमाने इति व्यापारे इति शेषः। व्यापारः क्रिया सा। च धातोर्वाच्या सा। त्रिविधा। अतीतानागववर्तमानभेदात्। तत्र वर्तमानाक्रियावृत्तेर्धातोस्तिवादयो भवन्ति। ते च द्योतकाः। वर्तमानक्रियाया धातुनैवोक्तत्वात्। यदि तु सद्य आदिरित्यतः काले इत्यनुवर्तते वर्तमाने काले वाच्ये तिवादय इति व्याख्यायते तदा तिवादयो वाचका अपि भवन्ति।कालस्य धातुनाभिहितत्वात्॥ अथ को वर्तमानः। प्रारब्धापरिसमाप्तो वर्तमानो भूरस्तीत्यादौ कथ वर्तमानादिः प्रारब्धापरिसमाप्तत्वाद्यभावात् उच्यते सृष्टिसंहारश्रुतिप्रामाण्यस्वीकर्तृणां मतेऽत्राप्यस्ति वर्तमानत्वम्। कल्पादौ प्रारब्धायाः स्थितेरपरिसमाप्तत्वात्। तस्थुः पर्वता भविष्यति भूरित्यादौ त्वतीतानागतकल्पावादाय भूतभविष्यत्त्वे बोध्ये। क्रियाफलयोर्वाचको धातुः। कालः संख्या। कारकं चाख्यातार्थः। तत्र तिवादित्वेन कालोऽर्थः। तितस्त्वादित्वेन एकत्वद्वित्वबहुत्वरूपाः संख्यार्थाः। आत्त्वेन भावकर्मणोरर्थः। आत्त्वेन पत्वे न कर्त्रर्थः। तत्र फलस्य कर्मण्यन्वयः। फलाश्रयस्य कर्मत्वात्। व्यापारस्य कर्तर्यन्वयो धातूपात्तव्यापाराश्रयस्य कर्तृत्वात्। संख्यायास्तु कर्तरि

कर्तृकर्मणी क्रियाविशेषणे । क्रिया तु विशेष्येति शाब्दिकमतम्।वर्तमानोऽर्थो यस्याः सा वर्तमानार्था सा चासौ क्रिया चेतिशाकपार्थिवादित्वात् मध्यमपदलोपः। वर्तमानक्रिया सा वृत्तिर्यस्य स तथा। तस्मात् तिवित्यादेः समाहारे ऐकपद्यम् अन्यथाऽसमासे त्वष्टादशपदत्वम् ॥

(तत्त्वदी०)--**वर्तमाने** इति॥व्यापारे इति शेषः।व्यापारश्च क्रिया सा च त्रिविधातीतानागतवर्तमानभेदात् । सा च धातुवाच्या इत्याशयेनाह--**वर्तमानार्थे**त्यादि ॥ वर्तमानः अर्थो यस्याः सा वर्तमानार्था सा चासौ क्रिया चेति सा तत्र वृत्तिर्यस्य स तथा तस्मादित्यर्थः । तिवित्यादेः समाहारे ऐकपद्यम्। अन्यथा त्वष्टादशपदत्वम् ।तिवादयश्च वर्तमानक्रियायाःद्योतका एव न तु वाचकास्तस्य धातुनैव लाभात् ।वर्तमानत्वं तु प्रारब्धापरिसमाप्तत्वम्।त्रिंशत्यादिवर्षपर्यन्तं वेदाध्ययनेऽपि अधीत इति प्रयोगदर्शनात्।भूतभविष्यद्भिन्नत्वमितिलक्षणं तु न भविष्यद्वर्तमानभिन्नत्वं भूतत्वं वर्तमानभूतभिन्नत्वं भविष्यत्वमित्यपि स्यात् । तथा चान्योन्याश्रयदोषः स्यात्।पर्वतास्तिष्ठन्तीत्यत्र तु स्वतो भूताद्यभावेऽपि कालत्रयवर्तिना राज्ञा भूतादिभेदभिन्नपालनादिक्रियाभेदाद्भूतादिव्यवहार. । तथाहि । नलादिकाले तस्थुः। कल्क्यादिकाले स्थास्यन्ति ।इदानींतनराजकाले तिष्ठति आत्माऽस्तीत्यत्रापि शरीराद्युपाध्यतीतत्वादिनाऽतीतत्वादिव्यवहारोऽस्तीति दिक् ॥

अप् कर्तरि ॥ कर्त्रर्थेषु तिवादिषु चतुर्षु दिप्पर्यन्तेषु परतो धातोरप् स्यात् ॥

(सुबोधिनी)--अप् कर्तरि ॥ कर्तरीति नापोऽभिधेयमाख्यातोक्तत्वात् किंत्वनुवृत्तस्य चतुर्ण्वित्यस्य विशेषणम् । धातोरप्स्यात् कर्त्रर्थेषु चतुर्षु परतः ॥ अपः पित्त्वम् अपित्तादिर्ङिदितिङित्त्वाभावार्थमन्यथाभवत इत्यादौ ङित्त्वाद्गुणो न स्यात्॥

(तत्त्वदी०)--**अप् कर्तरी**ति ॥ कर्तरि विहितेषु चतुर्षु तिवादिषु॥

गुणः ॥ नाम्यन्तस्य धातोर्गुणो भवति ॥

(सुबोधिनी)--गुणः ॥अरेदो नाम्नि इति नियमान्नामिग्रहणम्।तस्य धातोर्विशेषणत्वात् तदन्तविधिः ॥

(तत्त्वदी०)--**गुण** इति॥ अरेदो नाम्नि इति नियमान्नामिग्रहणम्। [illegible] --**नाम्यन्तस्ये**ति ॥

अपित्तादिर्ङिन् ॥ पकारेत्तं नादिकं च विहाय अन्यप्रत्ययो ङिन्स्यात् ॥

(सुबोधिनी)--अपित्तादिर्ङिन् ॥ [illegible]

अत्र पर्युदासबलात् पित्तादिभिन्नः प्रत्यय एव गृह्यते । न धातुः ॥ ननु सादेः कृतां चानेन ङित्त्वं कुतो नेति चेन्नैवं यङ्लुङोर्ङित्करणात् ज्ञापकात् । 'नानिटि से' इति सूत्रारम्भाच्च। अतः परिशेषात्तिवादीनां चतुर्विधानामाख्यातानां तद्धिकरणानां चानेन ङित्त्वं नान्येषाम् । तेन बिभरांचकोरत्यादावामो न ङित्त्वम् ॥

(तत्त्वदी०)–अपित्तादिरिति ॥ प् इत्यस्य स पित् त आदिर्यस्य स तादिः पिच्च तादिश्च पित्तादी ताभ्यामन्योऽपित्तादि । नञिति समासः। ङित् ङिद्वदित्यर्थः। पर्युदासात्प्रत्यय एव गृह्यते न तु धातुः । न तु दैप्दाप्भिन्नस्य धातोर्ङित्त्वे सति ङित्त्वे आत्स्यात्। ङिदित्यपहाय किदिति तु नोक्तं चक्रु इत्यादौ यजादित्वात्किति संप्रसारणप्रसङ्गात्। कुरुत इत्यत्र ङित्यदुरित्यस्याप्रसङ्गात्। तादीत्यत्रादिग्रहणं तूत्तरार्थं सिमतासतियत्रैव नञानाग्रहणसंभवात्। सिम्योरिति लिङ्गान्तयोर्ग्रहणार्थमपि न तदन्तेन विग्रहस्तु व्याख्यानानुसारात् । सादेः कृता च ङित्त्व तु न 'नानिटि से' इति सूत्रारम्भात् । यङ्लुङोर्ङित्करणात् ज्ञापकात्। अतस्तिवादीनां तद्धिकरणानामनेन ङित्त्व नान्येषां तेन बिभरांचकारेत्यादौ न ङित्त्वम्। यत्तु थादिशब्दादायोऽपि गृह्यते तेन गोपायतात्यादिसिद्धिरिति वासुदेवेनोक्तं तदसत् ।

क्ङित्यद्वयुसि ॥ किति ङिति च परे वृद्धिगुणौ न द्विर्वचनहेतुके उसि गुणः स्यात् ॥ इति तसि गुणाभावे आवनिमित्तो गुणः । भवतः ॥

(सुबोधिनी)–क्ङित्यद्वयुसि ॥ क् च ङ् च क्ङौ ताविर्तौ यस्य स तथा तस्मिन्। अद्व्युसीति विशेषणम् । द्वित्वनिमित्ते उसि न अजुहवुः ॥

(तत्त्वदी०)–गुणनिषेधमाह–क्ङित्यद्वयुसि ॥ क् च ट च कुटौ ताविर्तौ यस्य स तथा तस्मिन् । अद्व्युसीति विशेषणम् । द्वित्वस्य यानेनिमित्तभूतावुस द्वयुस् तस्मात् अन्यस्मिन्नित्यर्थः। अन्ये जुहुवुरित्यादौ तद्वान्य उसो द्वित्वाभावान्न गुणः। यत्तु नाक्तिमनित्यामित्यनेन अजुहवुरित्यादौ न गुण इति वासुदेवेनोक्तं तन्न अदेः स्वेऽपि नोपधायागुण इति सूत्रेणात्र गुणनिषेधे सिद्धे तदर्थं नोक्तमिति [illegible] ॥

अदे ॥ अतो लोपो भवत्यकारे एकारे च परे ॥ भवन्ति । भवसि, भवथः, भवथ ॥

(सुबोधिनी)–अदे ॥ अच्च ए चेति पृथक्पदे अविभक्तिके अत इत्यनुवृत्तम्। अतो लोपो भवति अति एति च परे ॥ भवन्ति । पचे ॥ अतः किम् । ब्रुवन्ति। ब्रुवे ॥ ह्रस्वः किम् । यान्ति। [illegible] आख्यातप्रकरणे भवार्थे विधिरनेन न स्यादार्धधातुकत्वात्तिः ॥

(तत्त्वदी०)–अदे [illegible]

व्योरा ॥ वम्योः परयोरत आत्वं स्यात् ॥ भवामि, भवावः, भवामः । स भवति । त्वं भवसि । अहं भवामि । युष्मदस्मदोः पर. ।

स च त्वं च भवथः । अहं च त्वं च भवावः । अहं च त्वं च स च भवामः ॥

(सुबोधिनी)-व्मोरा ॥ व् च म् च व्मौ तयोः अत आत्वं भवति व्मोः ॥ भवामि, भवावः, भवामः ॥ अतः किम् । चिनुवः, चिनुमः आख्यातप्रकरणे एव युगपत्प्राप्तौ परः । स च त्वं च पंडितौ भवथः । अहं च स च त्वं च पण्डिता भवाम इत्यत्र त्रयाणां नामाद्यर्थानां कर्तृत्वेनैकदा प्राप्तौ परत्वात् मध्यमोत्तमौ भवतः ॥ उक्तं च । "एकदा चेत् क्रियाकालसंबन्धप्रतिपादनम् । धातोर्नामादिषूक्तेषु यः परः स पुमान् भवेत् ॥ १॥" परत्वं चाभिधायकसूत्रापेक्षया न प्रयोगापेक्षया ग्राह्यम् । अस्मदर्थस्यैकत्वेऽपि समुदायाश्रिता संख्या ग्राह्या ॥ तदुक्तम् ।"द्वयोर्नाम्नोर्बहूनां वा यदि वाक्ये समुच्चयः । नामत्रयाश्रिता संख्या कृति वाद्योर्विशेषणम् ॥ १॥" स च त्वं च अहं चाहेति विवक्षायां त्वेकशेषो भवति । संख्या तु समुदायाश्रिता ॥

(तत्त्वदी०)-व्मोरा इति॥अत्रापि स्यादावपि नातिप्रसङ्ग उक्तयुक्तेः । तेन धनवानित्यादौ नात्वम् ।समानाधिकरणनामादिसन्निपाते व्यवस्थार्थमाह-युगपदिति ॥ एकदा प्राप्तौ परः पुरुषः प्रथमापेक्षया मध्यमः मध्यमापेक्षया उत्तमः पुरुषो भवतीति यावत् ॥

विधिसम्भावनयोः यात् याताम् युस् यास् यातम् यात याम् याव याम ईत ईयाताम् ईरन् ईथास् ईयाथाम् ईध्वम् ईय ईवहि ईमहि ॥ विधिः कर्तव्यार्थोपदेशः । संभावनं कल्पनम् । तत्र यादादयः ॥ एषां संज्ञा लिङ् ॥

(सुबोधिनी)-विधिसंभावनयोः यात् याताम् युस्, यास् यातं यात, याम् याव याम, ईत ईयाताम् ईरन्, ईथास् ईयाथाम् ईध्वम्, ईय ईवहि ईमहि ॥ धातोर्यादादयः प्रत्ययाः स्युः ॥ विधिसंभावनयोर्वाच्ययोरित्ययं वाचकतापक्षः ।न चात्र पक्षे विध्यादिनाऽर्थेन कर्त्राद्यर्थबाधो विरोधाभावात् । यद्वा । विधिसंभावनयोर्वर्तमानाद्धातोर्यादादयः प्रत्ययाः स्युः ।विध्याद्यर्थस्य विशेष्यस्य प्रकृत्यर्थविशेषणत्वे द्योतकतापक्षोऽयम् । विपूर्वाद्धाधातोरन्तर्भावितण्यर्थात्रिङ् किरिति भावे किः ।'विध विधाने'इत्यस्मादन्तर्भावितण्यर्थाद्वा किः । विधानं वेधनं वा विधिः । अनुष्ठापनं कारणा प्रवर्तनेति यावत् ।सा प्रवर्तना श्रुतिवाक्यनिष्ठा । लौकिकवाक्ये पित्रादिवक्तृनिष्ठा । संपूर्वकाद्भवतेश्चौरादिकाद्वा प्रेरणे स्वार्थे वा ञिः । भावे युट् । ततः स्त्रियामाप् । संभावना कल्पना ऊहः । कर्तव्योऽर्थस्तस्योपदेशो विधिः ॥

(तत्त्वदी०)-विधिसंभावनयोरिति ॥ विधानं विधिः ।विपूर्वाद्धातोर्नेट् किरिति ।ञिप्रत्ययः ।संभाव्यते संभावना । भावे युट् ।संपूर्वाद्भवतेश्चौरादिकाद्वा । तयोरर्थमाह विधिरित्यादिना कर्तव्यः करणीयो योऽर्थस्तस्योपदेशः कल्पनमूहः। तत्रेति॥तयोरर्थयोर्वाच्ययोर्द्योत्ययोर्वा यादादयो

भवन्तीत्यर्थः पक्षद्वयस्यापि भाष्ये स्वीकृतत्वात् । तत्राद्यपक्षे त्वित्थमुपपत्तिः । विध्यादिनार्थेन कर्त्राद्यर्थबाधो न जायते विरोधाभावात्। वर्तमानत्वादेरिव तिबादिवाच्यत्वाशेषेण कर्त्रादेरपि निरवकाशत्वाच्च । क्रियां प्रति प्रत्ययार्थतया विशेष्यत्वं तु तुल्यमेव । द्वितीयपक्षे त्वेवोपपत्तिः । विधिसंभावनयोर्वर्तमानाद्धातोर्यादादयः प्रत्ययाः स्युः ।विध्याद्यर्थस्य विशेष्यस्य प्रकृत्यर्थविशेषणत्वे द्योतकतापक्ष आयाति । एवं च विध्यादेः प्रत्ययार्थत्वं नोचितम् । प्रत्ययार्थत्वे कर्त्रादेरन्यत्र सावकाशत्वेन विध्यादिना बाधः स्यात् । ततश्च यादादिभिराभिधानं कर्त्रादेर्भज्येत । ततस्तु तत्प्रयुक्तैकत्वादिव्यवस्थाप्रथमपुरुषादिव्यवस्थाश्च न स्युरिति महदनिष्टं स्यात् । यद्यपि निमन्त्रणादयोऽप्यर्थाः पाणिनीये प्रदर्शितास्तथापि तेषु प्रवर्तना त्वस्यैकत्वान्नात्र भेदाविवक्षा । उक्तं च वाक्यप्रदीपे । "न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा । विध्यादीनामपादानं चतुर्णामादितः कृतम् ॥ अस्तिप्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि । तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया ॥"इति॥ प्रवर्तना तु श्रुत्यादिवाक्यकर्त्रीश्वरादिनिष्ठा । लौकिकवाक्ये तु पित्रादिवक्तरि निष्ठा ।वेदाध्ययनादौ बालानां पित्रादिप्रयुक्तप्रवृत्तिदर्शनादिष्टसाधनत्वं विध्यर्थ इति मतं नादर्तव्यं स्वप्रवृत्तेरिष्टसाधनत्वस्यानुमीयमानत्वात् । उदाहरणमाह । शिष्यो गुरुशुश्रूषको भवेदिति।एकशिष्याश्रया गुरुनिष्ठप्रीतिजननानुकूला या क्रिया तद्विषया प्रेरणेति विशेष्यपक्षः ।प्रेरणाविषया एकशिष्याश्रया गुर्वाश्रयप्रीतिजननानुकूला क्रियेति विशेषणपक्षः॥**भवेदसाविति** । अत्रैककोटिकसंशयः स्थाणुर्वा पुरुषो वेत्यादौ तु सर्वाः कोटयः समत्वेन भासन्ते।अत्र तु वेदवित्त्वावेदवित्त्वयोर्वेदवित्त्वकोटिरेवाधिका ।संशयादयमेव विशेषः संभावनायाम्। ब्राह्मणत्वादिहेतोर्व्यभिचारित्वान्न निश्चयः । अवेदविदोऽपि ब्राह्मणा दृश्यन्ते।वेदविदः क्षत्रियाश्च।वेदावाप्त्यनुकूलभावनाश्रय एकोऽपरोक्षार्थस्तदाश्रयात्मधारणानुकूला या भावना तद्विषया ब्राह्मणत्वहेतुका या संभावना तद्विषया वेदावाप्त्यनुकूलभावनाश्रयपरोऽक्षैकार्थनिष्ठात्मधारणानुकूला भावनेति वा बोधः।एवं भवेदयं बलवान् क्षत्रियत्वादित्यादि बोध्यम् ॥

या ॥ अतः परो या इः स्यात् ॥ भवेत्, भवेताम् ॥

(सुबोधिनी)–या ॥ अविभक्तिको निर्देशः । अतः परो या इः स्यात्॥अतः किम् । युयात् ॥ तपरः किम् । यायात् ॥

(तत्त्वदी०)–या इति॥ अनुकार्यानुकरणयोरभेदविवक्षयाऽविभक्तिको निर्देशः।आदात्यहर्त्यन इरित्यनुवर्तते । अन्त्यादेशः षष्ठ्यभावान्न ॥

युस इट् ॥ अतः परस्य युस इडागमः स्यात् ॥ भवेयुः । भवेः, भवेतम्, भवेत ॥

(सुबोधिनी)–युस इट् ॥ अतः परस्य युस इट् स्यात् ॥ टित्वादादौ ॥

(तत्त्वदी०)–युस इट्॥इति टित्वादागमः। अन्यथा इरित्यस्यानुवृत्तौ इड्ग्रहणं न कुर्यात् ॥

यामियम् ॥ अतःपरो यामियं स्यात् ॥ ..म्, भवेव, भवेम । शिष्यो गुरुशुश्रूषको भवेत् । विधिः । भवेदसौ वेदवित् ब्राह्मणत्वात् ॥

(सुबोधिनी)-यामियम् ॥ अतः किम् । युयाम् ॥ तपरः किम् । यायाम् ॥

आशीःप्रेरणयोः तुप् ताम् अन्तु हि तम् त आनिप् आवप् आमप् ताम् आताम् अन्ताम् स्व आथाम् ध्वम् ऐप् आवहैप् आमहैप् ॥ अप्राप्तप्रार्थनमाशीः । परस्येष्टार्थशंसनं वा । प्रेरणं प्रवर्तनम् । तत्र तुवादयः ॥ एषां संज्ञा लोट् ॥

(सुबोधिनी)-आशीःप्रेरणयोः तुप् ताम् अन्तु, हि तम् त, आनिप्, आवप् आमप्, ताम् आताम् अन्ताम्, स्व आथाम् ध्वम्, ऐप् आवहैप् आमहैप् ॥ धातोस्तुवादयः स्युः आशीःप्रेरणयोर्वाच्ययोः।आशीःप्रेरणयोर्वर्तमानाद्धातोरिति द्योतकतापक्षः । आशासनमाशीः । 'आङः शासु इच्छायाम्' ततः क्विप्।आत इत्त्वं निपातितं षत्वम् । प्रपूर्वादीरगतावित्यस्मात्प्रेरणार्थण्यन्ताद्भावे युट्। प्रेरणा प्रवर्तना विधिशब्दार्थ एव । आशीश्च प्रेरणा च आशीःप्रेरणे तयोः।आशासनं चाप्राप्तस्यैवसंभवतीत्यप्राप्तप्रार्थनमाशीः।सा च स्वस्यपरस्य च संभवतीति परस्येष्टार्थशंसनं वा आशीरिदमप्यप्राप्तविषयमेव। यद्यपि यादादितुवादयो न कालविशेषे विहितास्तथापि भविष्यत्कालोऽत्र गम्यते । अतीतवर्तमानयोर्विध्याद्यसंभवात् ॥

(तत्त्वदी०)-**आशीःप्रेरणयो**रिति॥आशासनमाशीः ।आङः शासु इच्छायाम् अप्रात्संज्ञायामकर्त्तरीत्यनुवर्तमाने स्त्रियां क्तिरित्याधिकारे संपदादेः क्विब्वेति क्विप्।अस्मादेव निपातनात्क्विपि आत इः ।शासेरित्यनेनेत्वं तु परस्मैपदिनो ग्रहणान्न। आशिषीति निर्देशात्क्विब्न्तस्य धातोः सस्य षः । प्रेर्यत इति प्रेरणा।प्रपूर्वादीरगतावित्यस्मादन्तर्भावितण्यर्थाद्भावे युट् । प्रेरणा विधिरेव । आशीश्च प्रेरणा च आशीःप्रेरणे तयोः ॥ तयोरर्थमाह-**अप्राप्ते**त्यादिना ॥

(तुह्योस्तातङ्ङाशिषि वा)भवतु-भवतात्, भवताम्, भवन्तु ॥

(सुबोधिनी)-तुह्योस्तातङ्ङाशिषि वा॥तुश्च हिश्च तुही तयोः।अनन्त्यार्थं हि ङित्त्वमन्त्यादेशं प्रयोजयति। अत्र तु गुणवृद्धिप्रतिषेधे संप्रसारणे चारितार्थत्वात् ङित्त्वस्य नान्त्यादेशता ॥ वृतात् । मृष्टात् । उष्टादित्यादि ॥

(तत्त्वदी०)-तुह्योरित्यादि॥तुश्च हिश्च तुही तयोः ।अनन्तादेशो ङित्त्वं गुणवृद्धिसंप्रसार-[illegible] प्रयोजकत्वे [illegible]न्त्यादेशप्रयोजनाति। [illegible] ।

अतः ॥ अतः परस्य हेर्लुक् स्यात् ॥ भव-भवतात्, भवतम्, भवत। भवानि, भवाव, भवाम । अध्ययनायोद्यतो भव सौम्य । [illegible]-युष्मान् भवतु भवान् ॥

(सुबोधिनी)-अतः स्थानिवद्भावने तातङो ङित्वेऽपि लोपो न। ओर्वाहेरित्यदो धेत्यनुवृत्तस्य व्यवस्थितत्वेन स्वीकारात्॥

(तत्त्वदी०)-अत इति॥अत्र ओर्वाहेरित्यतो वेत्यस्यानुवृत्तेस्तस्य व्यवस्थितत्वाश्रयणात्स्थानिवद्भावेन तातङो ङित्वेऽपि न लोपः॥आयुष्मानिति॥अतिशयितायुःप्राप्त्यनुकूलैकभवदर्थाश्रया यानम[illegible]रणाऽनुकूला क्रिया तद्विषया शुभाशंसाविषयीभूता।दीर्घायुःप्राप्त्यनुकूलैकभवदर्थाश्रयात्मधारणानुकूला क्रियेति वार्थः।यादादितुवादीनां कालविशेषाकथनेऽपि भाविष्यत्कालो बोध्यः। शब्दं कुर्वाणे नरे विगमाशंकायां शब्दं कुर्वित्युक्तावपि भाविशब्दविषयत्वात्।विधेर्न वर्तमानशब्दविषयता॥

अनद्यतऽनेतीते दिप् ताम् अन् सिप् तम् त अमिप् व म तन् आताम् अन्त थास् आथाम् ध्वम् ई वहि महि ॥ अतीताया रात्रेर्यामद्वयादर्वाग्यावदागामिन्याः प्रथमं यामद्वयं दिवसः सकलः सोऽद्यतनः नास्त्यद्यतनो यस्मिन्नतीते काले तत्र दिबादयः॥ एषां संज्ञा लङ्॥ दिसिमीनामिकार उच्चारणार्थः॥

(सुबोधिनी)-अनद्यतनेऽतीते दिप् ताम् अन्, सिप् तम् त, अमिप् व मं, तन् आताम् अन्त, थास् आथाम् ध्वम्, ई वहि महि ॥ अनद्यतनेऽतीते काले [illegible] वाच्ये वा धातोर्दिबादयो भवंति॥अस्मिन्नहनीत्यद्यशब्दवाच्यः कियान् [illegible]:।अतीतरात्रेरन्तिमं यामद्वयमागामिन्याः प्रथमं यामद्वयं मध्यवर्ती दिवसः स [illegible]ऽद्य[illegible]वाच्यः। अद्य भवोऽद्यतनः।त्यतननावेति तनः।अद्यतनकालस्त्रिविधः [illegible]ऽनागतो वर्तमानश्च। तत्राद्यतने ऽतीते भूते सिः। अद्यतने वर्तमाने तिबादिः। अद्यतनेऽनागते लुट्। नास्त्यद्यतनो यस्मिन्निति बहुव्रीहिः।यद्वा॥अद्यतना[illegible] इति नञा[illegible] नञ्तत्पुरुषः। 'अनहर' इत्यत्र। नाम्नो नो लोपाशि[illegible] [illegible]सामर्थ्यात्। तस्मिन् ह्यस्तने काले दिबादिरर्थादपरोक्षे परोक्षेणादि[illegible]॥

(तत्त्वदी०)-अनद्यतने इति॥ [illegible] अहनि [illegible]। [illegible]: कियान् काल इत्याह-अतीताया [illegible] [illegible] यामद्वयं ततोऽर्वाक् आगामिन्या रात्रेः प्रथम[illegible] [illegible]। किन्तु अरुणोदयादारभ्य अरुणोदयावि[illegible]। अन्ये तु [illegible]। लौकिकानां [illegible] एव इति [illegible] [illegible]अतीतस्मिन[illegible] [illegible] [illegible] [illegible] [illegible]

(सुबोधिनी)-द्विश्च ॥ णबादीत्यनुवृत्तं सप्तम्या विपरिणम्यते । धातोर्द्विर्वचनं भवति णादौ परे ॥ द्वौ वाराविति द्विः द्वित्रिचतुर्भ्यं इतिक्रियावृत्तौ सुः। अत्र क्रियावाचकं विना क्रियावृत्तेरसंभवाद्वचनमित्यध्याह्रियते । तच्च कृदन्तम् । तदपेक्षया धातोरिति कर्मणि षष्ठी । धातोर्द्विः उच्चारणे कर्तव्ये इत्यर्थः॥अनन्तरस्येति न्यायेनोक्तणादियोगेनैव द्वित्वम् । न विदो नवानामिति विहितणादियोगे। अत्र द्विर्वचनं द्विःप्रयोग एव न स्वादेशः। तेन तुतोसेत्यादौ कृतस्य सस्याभावात् षत्वं न ॥

(तत्त्वदी०)-द्विश्चेति ॥ द्वौ वाराविति द्विः । द्वित्रिचतुर्भ्यः सुरिति क्रियावृत्तौ सुः । क्रियावृत्तिश्च क्रियावाचकं विना न संभवतीति वचनपदयोगः । अत्र द्विर्वचनं द्विः प्रयोग एव न स्वादेशः।तेन तुतोसेत्यादौ कृतस्य सस्याभावात्पत्वं न अनन्तरस्येति न्यायादुक्तणादिरेव गृह्यते न तु विदो नवानामित्यादिविहितोऽपि । तेन वेदेत्यादौ द्वित्वं न ॥

सस्वरादिर्द्विरद्विः ॥ अनेकस्वरस्य धातोः सस्वराद्योऽवयवोऽद्विरुक्तो द्विर्भवति ॥

(सुबोधिनी)-सस्वरादिर्द्विरद्विः ॥ अद्विरुक्तः किम् । बोभूयिषते ॥

णादिः कित् ॥ अपिण्णादिः कित् ॥

(सुबोधिनी)-णादिःकित् ॥ अपित्तादिर्ङिदित्यतोऽपिदित्यनुवृत्तम् । णआदिर्यस्याष्टादशात्मकस्य समुदायस्य स णादिः । कित् किद्वत् । कार्यातिदेशोऽयम्।ईजतुः। जुहुवतुः ॥

(तत्त्वदी०)-णादिः किदिति॥ ण आदिर्यस्य स णादिः । अपित्तादिर्ङिदिति सूत्रादपिदित्यनुवर्तते ॥ नन्वत्र किदिति किमर्थं पूर्वसूत्रात् ङिदित्यस्यानुवृत्तेरेव सत्त्वादिति चेत्सत्यम् । ईजतुरित्यादौ संप्रसारणं न सिद्ध्येत् । चक्रतुरित्यादौ ङित्यदुरित्युत्वप्रसंगापत्तेश्च।अथ णादिरित्यत्र ज्वलादेर्णं इति विहितः कुतो न गृह्यते इति चेत्सत्यम्।क्यब्क्विपोःकित्त्वेन तदग्रहणस्य सिद्धत्वात् । यत्तु वासुदेवेन ऋदसंयोगान्तेत्यनन्तरं क्त्वासेटः किदित्यतोऽनन्तरतो वानुकर्षणात्क्वचित्संयोगाद्वा कित्त्वम् । तेन ममन्थतुः ममथतुरिति रूपद्वयमपि स्वीकृतं तदपाणिनीयत्वादुपेक्षितम् ।ममन्थतुरित्यस्यैवोचितत्वात् ॥

आभ्वोर्णादौ ॥ पूर्वस्याकारस्य भूशब्दस्य चाकारो णादौ परे ॥

(सुबोधिनी)-आभ्वोर्णादौ ॥ अश्च भूश्च अभ्वौ तयोः पूर्वस्य इसादिरित्यतः पूर्वस्येत्यनुवृत्तम् ॥

(तत्त्वदी०)-आभ्वोर्णादाविति ॥ आभ्वोरिति छेदः । अश्च भूश्च अभ्वौ तयोः। पूर्वस्य इसादिरिति सूत्रात् पूर्वस्येत्यनुवर्तते । षष्ठीनिर्दिष्टत्वाद्भुव ऊकारस्य।नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे इत्यत्र अभ्यासविकारत्वान्नान्त्यस्य निषेधः।यत्तु नो वेत्यतो वेत्यनुवृत्तेर्व्यवस्थया भावकर्मणोर्नुको नत्वम्।तेन बुभूवे बभूवेऽनुबुभूवे इत्युक्तं वासुदेवेन । तन्न । बभूवे अनुबभूवे इति रूप·

येव न्याय्यत्वात्। 'तस्यातपत्र विभरांबभूवे।' 'विभावरीभिर्बिभरांबभूविरे' इत्यादौ च तथा दर्शनात। यद्यपि भूकारस्य दीर्घाकारकरणं निरर्थकं तथाप्यानर्चेत्याद्यर्थम् ॥

ह्रस्वः ॥ पूर्वसंबन्धिनो दीर्घस्य ह्रस्वः ॥

(सुबोधिनी)–ह्रस्वः ॥ पूर्वस्य स्वरस्य ह्रस्वः स्यात् ॥ बभूवेत्यत्र तु आश्वोरिति कृतस्य दीर्घस्य ह्रस्व इत्यर्थः ॥

झपानां जबचपाः ॥ पूर्वस्य झपानां जबाश्चपाः स्युः ॥ झढधघभानां जडदगबाः खफछठथानां चटतकपाः स्युः ॥

(सुबोधिनी)–झपानां जबचपाः ॥ वर्ग्यो वर्ग्येणेति स्थानैक्या आदेशा भवन्ति।

भुवो वुक् ॥ भुवो वुगागमो णादौ स्वरे ॥ बभूव, बभूवतुः, बभूवुः ॥

(सुबोधिनी)–भुवो वुक् ॥ कृताकृतप्रसंगित्वेन नित्यत्वात्प्रथमं वुक् ततो वुको धात्ववयवत्वाद्गुणवृद्धी न ॥

(तत्त्वदी०) भुव इति ॥ वुको धात्ववयवत्वाद्गुणवृद्धी न। न च प्रथमं गुणवृद्धिप्रसंग इति वाच्यम्। कृताकृतप्रसंगित्वेन नित्यत्वात्प्रथमं तस्यैव प्रवृत्तेः ॥

क्रादेर्णादेः ॥ कृ सृ भृ वृ द्रु स्तु श्रु स्रु इत्येतेभ्यः परस्य वसादेर्णादेरिण् न भवति अन्यस्मात् भवतीति नियमादिट् स्यात् ॥ बभूविथ, बभूवथुः, बभूव।बभूव, बभूविव, बभूविम। बलिर्बलवान्बभूव॥

(सुबोधिनी)–क्रादेर्णादेः ॥ 'डुकृञ् करणे' 'कृञ् हिंसायाम्' इत्युभौ गृह्यते। सृ गतौ। भृ भरणे। डुभृञ् धारणपोषणयोरित्युभौ। वृङ् संभक्तौ। वृञ् वरणे इत्युभौ। द्रु गतौ। ष्टुञ् स्तुतौ। श्रु श्रवणे। स्रु गतौ। एते क्रादयः। कृ सृ भृ इति त्रयाणामनुदात्तत्वान्नैकस्वरादिति प्रकृत्याश्रये इण्निषेधे प्राप्ते वृङ्वृञोरुदात्तत्वात् कित इति प्रत्ययाश्रये इण्निषेधे प्राप्ते द्रुस्त्वादीनां चतुर्णां स्वरान्तत्वात् स्वरान्तादस्तश्चेतीड्विकल्पे प्राप्ते च नियमः ॥

(तत्त्वदी०) क्रादेरिति ॥ डुकृञ् करणे सृगतौ डुभृञ् धारणपोषणयोः। वृञ् वरणे। द्रुगतौ। ष्टुञ् स्तुतौ। श्रु श्रवणे। स्रु गतौ। एते क्रादयः ॥ **नियमादिति** ॥ विध्यभावादिडभावे सिद्धे सत्यारम्भो नियमाय भवतीति नियमः ॥

आशिषि यात् यास्ताम् यासुस् यास् यास्तम् यास्त यासम् यास्व यास्म सीष्ट सीयास्ताम् सीरन् सीष्ठाम् सीयास्थाम् सीध्वम् सीय सीवहि सीमहि ॥ धातोराशिषि यादादयः ॥ एषां संज्ञा लिङ्।

(सुबोधिनी)-आशिषि ॥ यात् यास्ताम् यासुस्, यास् यास्तम् यास्त, यासम् यास्व यास्म, सीष्ट सीयास्ताम् सीरन्, सीष्ठास् सीयास्थाम् सीध्वम्, सीय सीवहि सीमहि ॥ धातोर्यादादय आशीर्वादे वाच्ये । यद्वा । प्रार्थ्यमानक्रियावृत्तेर्धातोरिति वा ॥

(तत्त्वदी०)-आशिषीति॥ स्वस्य परस्य चेष्टार्थस्य साधनमाशीः । यस्यां वाच्यायां यादादयः । यद्वा प्रार्थनप्रक्रियावृत्तेर्धातोर्यादादयः ॥

आशीर्यादादेः पं कित्॥ भूयात्, भूयास्ताम्, भूयासुः । भूयाः, भूयास्तम्, भूयास्त । भूयासम्, भूयास्व, भूयास्म। स श्रीमान भूयात्॥

(सुबोधिनी)-आशीर्यादादेः पं कित् ॥ ननु टित्त्वेनैव गुणवृद्धिनिषेधः सिद्ध इति चेन्न । इज्यात्सुप्यादित्यादौ सम्प्रसारणार्थं जागर्यादित्यादौ जागर्तेरिति गुणार्थं च किद्वचनम् ॥

(तत्त्वदी०)-स श्रीमानिति । एकतदभिन्नाश्रया श्रीमदनुकूलाभवनार्थानना । आशंसाविषया भवनक्रिया वेति बोधः ॥

श्वस्तने ता तारौ तारस् तासि तास्थम् तास्थ तास्मि तास्वस् तास्मस् ता तारौ तारस् तासे तासाथे ताध्वे ताहे तास्वहे तास्महे ॥ श्वोभाविन्यर्थे तादयः ॥ एषां संज्ञा लुट् ॥

(सुबोधिनी)-श्वस्तने ॥ ता तारौ तारस्, तासि तास्थम् तास्थ, तास्मि तास्वस् तास्मस्, ता तारौ तारस्, तासे तासाथे ताध्वे, ताहे तास्वहे तास्महे ॥ आगामि दिने श्वोऽव्ययम् । श्वोभवः श्वस्तनः कालस्तस्मिन्वाच्ये धातोस्तादयः । यद्वा । श्वस्तने व्यापारे वर्तमानाद्धातोरिति वा ॥

(तत्त्वदी०)-श्वस्तने इति ॥ अद्यतनदिनातिरिक्तागामिदिने श्वःशब्दो वर्तते । तत्र भवः श्वस्तनः कालस्तस्मिन्वाच्ये धातोस्तादयः ।

सिसतासीस्यपामिट् ॥ भविता, भवितारौ, भवितारः । भवितासि, भवितास्थः, भवितास्थ । भवितास्मि, भवितास्वः, भवितास्मः । श्वो भविता राज्यभारः कुमारस्य ॥

(सुबोधिनी)-सिसतासीस्यपामिट् ॥ धातोरित्यनुवृत्तम् ॥

(तत्त्वदी०)-श्वोभवितेति॥ चिरागामिदिनाधारा एकाराज्यभाराभिन्नाश्रयकागमिकालभाविनी आत्मधारणानुकूला क्रियेत्यर्थः ॥

स्यादौ भविष्यति स्यप् ॥ धातोर्भविष्यति काले स्यप्प्रत्ययो भवति तिबाद्यष्टादशसु परतः ॥ एषां संज्ञा लृट् ॥ भविष्यति,

भविष्यतः, भविष्यन्ति । भविष्यसि, भविष्यथः, भविष्यथ । भविष्यामि, भविष्यावः, भविष्यामः ॥ कल्की धर्मपालको भविष्यति ॥

(सुबोधिनी)-स्यादौ भविष्यति स्यप्॥ तिरादिर्यस्य तस्मिन् भविष्यत्यर्थे वर्तमानाद्धातोः स्यप्प्रत्ययो भवति स्यादौ परे। इति भविष्यत्त्वं द्योत्यम्। यद्वा धातोः स्यप् भविष्यति काले वाच्ये तिबादौ परे । भविष्यतीति शत्रन्तात्सप्तमी ॥

(तत्त्वदी०)-स्यादौ भविष्यतीति ॥ तिप् आदिर्यस्य स त्यादिस्तस्मिन् ।स्यादीति-ष्टेत्यादिवाच्यं भविष्यत्त्वमिति द्योतयन्नाह-धातोरित्यादि ॥ शतृशानयोरपि तिपेवदतिदेशात्स्यप् । तेन यक्ष्यन् यक्ष्यमाण इत्यादि सिद्धम् ॥

स्यप् क्रियातिक्रमे ॥ क्रियाया अतिक्रमे कुतश्चिदनिष्पत्तौ सत्यां स्यप्प्रत्ययो भवति दिबादिषु परतः ॥ एषां संज्ञा लङ् ॥ यदि सुवृष्टिः सुराज्यं चाभविष्यत् तदा सुभिक्षमभविष्यत् । अभविष्यत्, अभविष्यताम् अभविष्यन् । अभविष्यः, अभविष्यतम्, अभविष्यत । अभविष्यम्, अभविष्याव, अभविष्याम ॥

(सुबोधिनी)-स्यप् क्रियातिक्रमे ॥ क्रियाया अतिक्रमः अनिष्पत्तिः असिद्धिरित्यर्थः । भविष्यतीत्यनुवृत्तम् उत्तरसूत्राद्भूते इति च भूते भविष्यति चार्थे वर्तमानाद्धातोर्दिबादिर्भवति।क्रियानिष्पत्तौ गम्यायां दिबादौ च परे स्यप् भवति। यद्वा । धातोर्भूते भविष्यति चार्थे वाच्ये दिबादिर्भवति तस्मिश्च परे स्यप् क्रियातिक्रमे गम्ये ॥

(तत्त्वदी०)-स्यप् क्रियातिक्रम इति॥ क्रियाया अतिक्रमः अनिष्पत्तिः असिद्धिरिति यावत् । भूतत्वं भविष्यत्त्वं चानुक्तमपि पारिशेष्याल्लभ्यम् ॥ यदि सुवृष्टिरिति ॥ सुवृष्ट्याश्रयात्मधारणानुकूला भूता भविष्यन्ती वाया क्रिया तदभावप्रयुक्ता सुभिक्षाश्रयात्मधारणानुकूलायाःक्रियाया अनिद्धिः ॥ क्रियातिक्रमे किम् । सुवृष्टिरभूत् । सुवृष्टिर्भविष्यति । सुभिक्षमभूत् ।सुभिक्षं भविष्यति ॥ दिबादिषु किम्। कृष्ण नमेचेत्सुखं यायात् । कर्त्रादिकमाख्यातवाच्यम् । कालस्तु धातोरान्यतरस्यार्थः । स्यपस्तु विकरणत्वादनर्थकत्वमेव । एवं त्यादावपि सिध्यति । अत्र स्यादौ भविष्यतीत्यतः स्यदनुवृत्तिसम्भवे स्यग्रहणं कर्त्रादावपि विधानार्थम् । तेन करिष्यन् करिष्यमाण इत्यादि सिद्धम् ॥

भूते सिः ॥ धातोर्भूतमात्रे काले सिः प्रत्ययो भवति दिबादिषु परतः ॥ एषां संज्ञा लुङ् ॥

(सुबोधिनी)-भूते सिः ॥ अभूत् इति भूतः क्षप्रभृतिभ्यः कर्तरि क्तः।भूतसामान्यार्थे वर्तमानाद्धातोर्दिबादिर्भवति । यद्वा । धातोः परः भूतसामान्ये वाच्ये दिबादि-

भवति तस्मिंश्च परे सिप्रत्ययो भवति सिसहितस्य दिवादेर्भूतसामान्योऽर्थः। अद्यादि-सहितस्य तु भूतविशेषोऽनद्यतनोऽपरोक्षोऽर्थः ॥

(तत्त्वदी०)-भूते सिरिति ॥ अभूदिति भूतः । अकर्मकत्वात्कर्त्तरि क्तः ।भूतसामान्ये ऽसिरित्याह भूतमात्र इति।तथा च सिविशिष्टदिवादेर्भूतसामान्योर्थः।अद्यादिविशिष्टस्य तु भूतविशे-षाद्यतनोऽपरोक्षः भूतानद्यतनपरोक्षे णवादिः ॥

दादेः पे ॥ पे परे अपिदाधास्थाइणभूपिबतिभ्यः परस्य सेर्लोपः ॥

(सुबोधिनी)-दादेःपे ॥ दा आदिर्यस्य स दादिस्तस्मात्सेर्लोपः पे परे।डुदाञ् दाने । दाण् दाने । दो अवखण्डने । इत्येतेषां दाशब्देन ग्रहणम्।दाप् लवने।दैप् शोधने । देङ् पालने । एषां तु लक्ष्यानुसारान्न ग्रहणम् ।डुधाञ् धारणपोषणयोः ष्ठा गतिनिवृत्तौ । इण् गतौ । भू सत्तायाम् । पा पाने ॥

(तत्त्वदी०)-दादेः पे इति ॥ दा आदिर्यस्य दादिस्तस्य। अपिदिति दाप् लवने,दैप् शो-धने, एतौ विहाय एतयोस्त्यागस्तु लक्ष्यानुसारादेव।डुधाञ् धारणपोषणयोः, ष्ठा गतिनिवृत्तौ, इण् गतौ, भू सत्तायाम्, पा पाने, एभ्यः सेर्लोपः । लोपोह्रस्वादित्यतो लोपोऽनुवर्तते ॥

(शाछासाघ्राधेटां वा)

(सुबोधिनी)-शाछासाघ्राधेटां वा ॥ एभ्यः सेर्वा लोपः॥शो तनूकरणे।छो छेदने । षो अन्तकर्मणि । घ्रा गन्धोपादाने । धेट् पाने ॥

(तत्त्वदी०)-नो वेत्यतो व्यवस्थितत्वानुवृत्तेश्शादीनां वा।शो तनूकरणे, छो छेदने,षोऽन्त-कर्मणि, घ्रा गन्धोपादाने, धेट् पाने, एषां सेर्वा लोप इत्यर्थः ॥

(भुवः सिलोपेऽयङ्लुकि गुणो न) अभूत्, अभूताम् ॥

(सुबोधिनी)-भुवः सिलोपेऽयङ्लुकि गुणो न ॥ भुवो गुणो न सिलोपे सति॥यङि लुकि तु भुवो गुणो भवति सिलोपे ॥ प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहण-मिति परिभाषया गुणनिषेधे प्राप्ते विधिः । अभूत, अबोभोत् ॥

(तत्त्वदी०)-भुव इति॥'नानिटि से' इत्यतो नेत्यनुवृत्तेराह-भुव इति ॥ अयङ्लु-कीति ॥ यङ्लुकि तु अबोभोदित्यत्र सिलोपेऽपि गुणो भवत्येव ॥

(भुवः सिलोपे स्वरे वुक्) अभूवन्।अभूः, अभूतम्, अभूत । अभूवम्, अभूव, अभूम ॥

(सुबोधिनी)-भुवः सिलोपे स्वरे वुक्॥भुवो वुगागमः स्वरे परे सिलोपे सति

(माङि सिरेव) (स्मसहिते दिवादिर्वा)

(सुबोधिनी)-माङि सिरेव ॥ माङ्शब्दे प्रयुज्यमाने धातोर्दिवादिपरः सिरेव भवति सर्वेषामाख्यातानां विषये ॥ स्मसहिते दिवादिर्वा॥स्मोत्तरे माङि प्रयुज्य-माने धातोर्दिवादिर्वा । पक्षे भूते सिः । सर्वलकारविषये लङ्लुङावित्यर्थः ॥

(तत्त्वदी०)–माङि सिरिति॥ मेऽट इत्यत्र मे इति योगविभज्य सिरिति अनुवृत्त्याह–माङीति। सिरेव सिसहितो दिवादिरित्यर्थः। स्मयुक्ते माङि तु विकल्पेन दिवादिः केवलःसिसहितश्च पक्षे ननु भूते सिरित्यनेनैव सिर्विहितः पुनः किमनेनेति चेत्सत्यम्। कालान्तरेऽपि विधानार्थमेतत्। तेन माङ्योगे सर्वलकारविषये लुङेव भवति ॥

मेऽटः ॥ माङ्योगेऽटो लोपः ॥ मा भवान् भूव। मा स्म भूत्। मा स्म भवत् ॥

(सुबोधिनी)–मेऽटः लोप इत्यनुवृत्तम्। माङ्शब्दे प्रयुज्यमाने सत्यटो लोपः ॥

(तत्त्वदी०)–मेऽट इति ॥ मे अट इति छेदः। लोप इत्यनुवर्तते॥ मे किम्। नाभवत् ॥ अट इति किम्। मा प्र भूत्। प्रस्य लोपो न ॥

(भू प्राप्तावात्वान्) भवते ॥

(सुबोधिनी)–भू प्राप्तावात्वान् ॥ आद्रियते यस्य स आत्वान्। आत्मनेपदीत्यर्थः ॥

(तत्त्वदी०)–भू प्राप्तावात्वानिति ॥ आद्रियते यस्य स आत्वान् ॥

आदाथ इः ॥ अतः परस्यात आयश्चात इर्भवति॥ भवेते, भवन्ते। भवसे, भवेथे, भवध्वे। भवे, भवावहे, भवामहे॥ भवेत, भवेयाताम्, भवेरन्। भवेथाः, भवेयाथाम्, भवेध्वम्। भवेय, भवेवहि, भवेमहि ॥ भवताम्, भवेताम्, भवन्ताम्। भवस्व, भवेथाम्, भवध्वम्। भवै, भवावहै, भवामहै ॥ अभवत, अभवेताम्, अभवन्त। अभवथाः, अभवेथाम्, अभवध्वम्। अभवे, अभवावहि, अभवामहि ॥ बभूवे बभूवाते, बभूविरे। बभूविषे, बभूवाथे ॥

(सुबोधिनी)–आदाथ इः ॥ अतः इत्यनुवृत्तम्। आत्र आथ आदाथ तस्य। आते आताम् आथे आथाम् इत्येतेषां टिविहायानुकरणम्। अतःपरस्य आत आदश्चाकार इर्भवति ॥ एधेते। एधेथे। ऐधेताम्। एधेताम् ॥

(तत्त्वदी०)–आदाथ इरिति ॥ [illegible]। [illegible] ॥

नाम्निनो चतुर्णां धो ढः ॥ नाम्यन्ताद्धातोः [illegible] टां धस्य ढः ॥

(सुबोधिनी)–नाम्निनो चतुर्णां धो ढः [illegible] ॥

भवति तस्मिंश्च परे सिप्रत्ययो भवति सिसहितस्य दिवादेर्भूतसामान्योऽर्थः । अद्यादिसहितस्य तु भूतविशेषोऽनद्यतनोऽपरोक्षोऽर्थः ॥

(तत्त्वदी०)–भूते सिरिति ॥ अभूदिति भूतः । अकर्मकत्वात्कर्त्तरि क्तः । भूतसामान्ये ऽसरित्याह भूतमात्र इति । तथा च सिविशिष्टदिवादेर्भूतसामान्योर्थः । अद्यादिविशिष्टस्य तु भूतविशेषाद्यतनोऽपरोक्षः भूतानद्यतनपरोक्षे णवादिः ॥

दादेः पे ॥ पे परे अपिदाधास्थाइणभूपिबतिभ्यः परस्य सेर्लोपः ॥

(सुबोधिनी)–दादेःपे ॥ दा आदिर्यस्य स दादिस्तस्मात्सेर्लोपः पे परे । डुदाञ् दाने । दाण् दाने । दो अवखण्डने । इत्येतेषां दाशब्देन ग्रहणम् । दाप् लवने । दैप् शोधने । देङ् पालने । एषां तु लक्ष्यानुसारान्न ग्रहणम् । डुधाञ् धारणपोषणयोः ष्ठा गतिनिवृत्तौ । इण् गतौ । भू सत्तायाम् । पा पाने ॥

(तत्त्वदी०)–दादेः पे इति ॥ दा आदिर्यस्य दादिस्तस्य । अपिदिति दाप् लवने, दैप् शोधने, एतौ विहाय एतयोस्त्यागस्तु लक्ष्यानुसारादेव । डुधाञ् धारणपोषणयोः, ष्ठा गतिनिवृत्तौ, इण् गतौ, भू सत्तायाम्, पा पाने, एभ्यः सेर्लोपः । लोपोह्रस्वादित्यतो लोपोऽनुवर्तते ॥

(शाछासाघ्राधेटां वा)

(सुबोधिनी)–शाछासाघ्राधेटां वा ॥ एभ्यः सेर्वा लोपः । शो तनूकरणे । छो छेदने । षो अन्तकर्मणि । घ्रा गन्धोपादाने । धेट् पाने ॥

(तत्त्वदी०)–नो वेत्यतो व्यवस्थितत्वानुवृत्तेश्शादीनां वा । शो तनूकरणे, छो छेदने, षोऽन्तकर्मणि, घ्रा गन्धोपादाने, धेट् पाने, एषां सेर्वा लोप इत्यर्थः ॥

(भुवः सिलोपेऽयङ्लुकि गुणो न) अभूत, अभूताम् ॥

(सुबोधिनी)–भुवः सिलोपेऽयङ्लुकि गुणो न ॥ भुवो गुणो न सिलोपे सति । यङि लुकि तु भुवो गुणो भवति सिलोपे ॥ प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमिति परिभाषया गुणनिषेधे प्राप्ते विधिः । अभूत, अबोभोत् ॥

(तत्त्वदी०)–भुव इति ॥ 'नानिटि से' इत्यतो नेत्यनुवृत्तेराह–भुव इति ॥ अयङ्लुकीति ॥ यङ्लुकि तु अबोभोदित्यत्र सिलोपेऽपि गुणो भवत्येव ॥

(भुवः सिलोपे स्वरे वुक्) अभूवन् । अभूः, अभूतम्, अभूत । अभूवम्, अभूव, अभूम ॥

(सुबोधिनी)–भुवः सिलोपे स्वरे वुक् ॥ भुवो वुगागमः स्वरे परे सिलोपे सति

(माङि सिरेव) (स्मसहिते दिवादिर्वा)

(सुबोधिनी)–माङि सिरेव ॥ माङ्शब्दे प्रयुज्यमाने धातोर्दिवादिपरः सिरेव भवति सर्वेषामाख्यातानां विषये ॥ स्मसहिते दिवादिर्वा ॥ स्मोत्तरे माङि प्रयुज्यमाने धातोर्दिवादिर्वा । पक्षे भूते सिः । सर्वलकारविषये लङ्लुङावित्यर्थः ॥

नो लोपः ॥ धातोर्हसान्तस्योपधाभूतस्य नकारस्य लोपः किति परे ॥ पूजार्थाश्चतेर्न निरुपपदात् क्रुञ्चेः क्विपि न ॥ मथ्यात् । मन्थिता । मन्थिष्यति । अमन्थिष्यत् । अमन्थीत् ॥ कुथि पुथि लुथि मथि हिंसासंक्लेशनयोः ॥

(सुबोधिनी)–नो लोपः ॥ मथ्यात् ॥

इदितो नुम् ॥ इदितो धातोर्नुम् ॥ कुन्थति।कुन्थेत्।कुन्थतु–कुन्थताद्वा । अकुन्थत् ॥

(सुबोधिनी)–इदितो नुम् ॥ इत् इयस्य सैं इदित् तस्य नुम् स्यात् ॥

कुहोश्चुः ॥ पूर्वस्य कवर्गहकारयोश्चुत्वं भवति । हस्य वर्गचतुर्थः॥ चुकुन्थ ॥

(सुबोधिनी)–कुहोश्चुः ॥ पूर्वस्येत्यनुवृत्तम्।कुश्च हश्च कुहौ तयोः संवारनादघोषमहाप्राणप्रयत्नस्य हस्य तादृश एव वर्गचतुर्थो भवति ॥

(तत्त्वदी०)–हस्य वर्गचतुर्थ इति॥स्थानेन्तरतम इत्यनेन घोषत्वादिगुणवतो हस्य तादृशो वर्गचतुर्थ एव एतच्चानधीतमन्यान्तरैर्दुर्ज्ञेयम् ॥

(इदितो नलोपो न) कुन्थ्यात् । कुन्थिष्यति । अकुन्थिष्यत् । अकुन्थीत् ॥ चुबि वक्त्रसंयोगे ॥ चुम्बति ॥ षिधु गत्याम् ॥

(सुबोधिनी)–इदितो नलोपो न ॥ इदितो धातोर्नस्य लोपो न भवति । नो लोप इत्यस्यापवादः । षिधु गत्याम् । अयमुदिदित्येके॥

(तत्त्वदी०)–इदितो नलोपो नेति॥इदं च नो लोपं इत्यत्र नो वेत्यतो वेत्यस्यापकृष्टस्य व्यवस्थितत्वाल्लभ्यते। न चेदितो नुम्विधिसामर्थ्यादेव लोपोनेति वाच्यम्। नदन्तीत्यादावकिति तस्य चरितार्थत्वात् ॥ षिधु गत्यामिति॥कारनपादिभिरयमुदित्युक्तः।माधवादिभिस्तु वृत्तिस्वरसादनुदिदेव स्वीकृतः ॥

आदेः ष्णः स्नः ॥ धात्वाद्योः षकारणकारयोः सकारनकारौ भवतः । सेधति । सेधेत् । सेधतु–सेधताद्वा । असेधत् । सिषेध । सिध्यात् । सेधिता ॥

(सुबोधिनी)–आदेः ष्णः स्नः॥ष् च ण् च ष्ण् तस्य ष्णः । स् च नश्च स्नः॥ धातोः किम् । षट् ॥ आदेः किम् । लषति । अणति ॥ षोपदेशानाह । "सेक सृप् सृ स्तॄञ् सृज् स्तृ स्त्यान्ये दन्त्याजन्तसादयः ॥ एकाचः षोपदेशा स्नु ष्वष्क् स्विद् स्वद् स्वञ्ज स्वप् स्मिङ् ॥ १ ॥ दन्त्यश्च अच्च दन्त्याचौ तौ अन्तौ अव्यवहितौ यस्य स दन्त्याजन्तः दन्त्याजन्तश्चासौ सश्च दन्त्याजन्तसः दन्त्याजन्तस

इरितो वा ॥ इरितो धातोर्वा ङप्रत्ययो भवति पे । सेरपवादः ॥ अच्युतत्–अच्योतीत् ॥ श्च्युतिर् क्षरणे ॥ श्च्योतति ।श्च्योतेत् । श्च्योततु–श्च्योततात्वा । अश्च्योतत् ॥

(सुबोधिनी)–इरितो वा॥ इरित् यस्य स तस्मात् इरितो धातोर्वा ङः॥भूतमात्रार्थे दिवादौ पे । सेरपवादः ॥ लित्पुषादेरित्यतो ङ इत्यनुवृत्तम् ॥

(तत्त्वदी०)–इरितो वेति ॥ इरित् यस्य स इरित् तस्मात्॥ सेरपवाद इति॥भूतमात्रार्थे दिवादौ पे इत्यपि बोध्यम् । तेन अवेवेक् भूतार्थत्वेऽपि न । रुणद्धीत्यत्र दिवादिपरत्वाभावान्न। न चात्र भूतार्थताभावादेवाप्राप्तिरिति वाच्यम्। वर्तमानसमीप इत्यनेन भूतेऽपि तिबादिविधानात् । अरुद्धेत्यत्र विक्षितत्वाभावात् ॥

शसात्खपाः ॥ पूर्वशसात्पराः खपाः शिष्यन्ते न शसाः ॥ चुश्च्योत । श्च्युत्यात् । श्च्योतिता । श्च्योतिष्यति । अश्च्योतिष्यत । अश्च्युतत्–अश्च्योतीत् । यकाररहितो प्ययम् । श्चोतति । श्चोतेत् । श्चोततु–श्चोततात् । अश्चोतत् । चुश्चोत । श्चुत्यात् । श्चोतिता।श्चोतिष्यति ।अश्चोतिष्यत्। अश्चुतत्।अश्चोतीत् ॥ मन्थ विलोडने । मन्थति। मन्थेत्। मन्थतु–मन्थताद्वा । अमन्थत् । नो लोप इति नलोपे प्राप्ते ॥

(सुबोधिनी)–शसात्खपाः ॥ शसः प्रत्याहारः ॥ मन्थ विलोडने।त्र-यादावपि ॥

(तत्त्वदी०)–शसादिति॥ शसः प्रत्याहारः।खपानां शेषत्वोक्तेः।शसानां निषेध इत्याह–न शसा इति ॥ यकाररहित इति॥'मधुश्चुत घृतमिव सुपूतम्'इति प्रयोगश्चानुकूलः ॥ मन्थ विलोडने ॥ हिंसासंक्लेशनयोरपीत्येके ॥

ऋसंयोगान्न ॥ ऋसंयोगाण्णादिरकित् ॥ ममन्थ, ममन्थतुः ॥

(सुबोधिनी)–ऋसंयोगान्नेति ॥ इह ऋसंयोगान्नेति मूलसूत्रम् । तत्र णादिः किदित्यनुवृत्तम् । ऋश्च संयोगश्चानयोः समाहारः ऋसंयोगं तस्मात् णादि· किन्न ।। जजरतुः । यादादौ कित्त्वात् नो लोप हति न लोपः । मथ्यात् ॥

(तत्त्वदी०)–ऋसंयोगादिति ॥ ऋश्च संयोगश्च ऋसंयोगं तस्मात् । णादि. किदिति पूर्वसूत्रमनुवर्तते । कित्त्वाभावात्संप्रसारणाभावोऽपि । कित्त्वाविधानात् ङित्त्वमपि न॥अत्र केचित् । आर्तिप्रश्लिष्य आरतुरित्यादिसिद्धमित्याहुः।अन्ये तु ऋऋ अतुसीति स्थिते र इत्यत्र अरिति च कृते पूर्ववद्ग्रहणेन आम्योरित्य त्वे आरतुरिति । अत्रादिग्रहणमनुवर्त्य तन्त्रेण द्वितीयवाक्यार्थः ।ऋदन्तात्संयोगादेर्णादिरकित्।तेन सस्मरतुरित्यादि । अथ कथं सम्नतुरिति चेत् । नञोक्तस्यानित्यत्वात् । अत्र ऋहनादिन्येव सुवचम्।ऋश्च हनश्च ऋहसं तस्मात्। एत्र संयोगान्तस्य लोप इत्यत्र हसान्तस्य लोप इत्यस्यैव न्याय्यत्वम् । हसावन्ते यस्येति विग्रह. ॥

नो लोपः ॥ धातोर्हसान्तस्योपधाभूतस्य नकारस्य लोपः किति परे ॥ पूजार्थाञ्चतेर्न निरुपपदात् क्रुञ्चेः क्विपि न ॥ मथ्यात् । मन्थिता । मन्थिष्यति । अमन्थिष्यत् । अमन्थीत् ॥ कुथि पुथि लुथि मथि हिंसासंक्लेशनयोः ॥

(सुबोधिनी)–नो लोपः ॥ मथ्यात् ॥

इदितो नुम् ॥ इदितो धातोर्नुम् ॥ कुन्थति। कुन्थेत्। कुन्थतु–कुन्थताद्वा । अकुन्थत् ॥

(सुबोधिनी)–इदितो नुम् ॥ इत् इर्यस्य सः इदित् तस्य नुम् स्यात् ॥

कुहोश्चुः ॥ पूर्वस्य कवर्गहकारयोश्चुत्वं भवति । हस्य वर्गचतुर्थः ॥ चुकुन्थ ॥

(सुबोधिनी)–कुहोश्चुः ॥ पूर्वस्येत्यनुवृत्तम्। कुश्च हश्च कुहौ तयोः संवारनादघोषमहाप्राणप्रयत्नस्य हस्य तादृश एव वर्गचतुर्थो भवति ॥

(तत्त्वदी०)–हस्य वर्गचतुर्थ इति॥स्थानेन्तरतम इत्यनेन घोषत्वादिगुणवतो हस्य तादृशो वर्गचतुर्थ एव एतच्चानधीतग्रन्थान्तरैर्दुर्ज्ञेयम् ॥

(इदितो नलोपो न) कुन्थ्यात् । कुन्थिष्यति । अकुन्थिष्यत् । अकुन्थीत् ॥ चुबि वक्त्रसंयोगे ॥ चुम्बति ॥ षिधु गत्याम् ॥

(सुबोधिनी)–इदितो नलोपो न ॥ इदितो धातोर्नस्य लोपो न भवति । नो लोप इत्यस्यापवादः । षिधु गत्याम् । अयमुदिदित्येके ॥

(तत्त्वदी०)–इदितो नलोपो नेति॥इदं च नो लोप इत्यत्र नो वेत्यनो वेत्यस्यापकृष्टस्य व्यवस्थितत्वाल्लभ्यते। न चेदितो नुम्विधिसामर्थ्यादेव लोपो नेति वाच्यम्। नदन्तीत्यादावकिति तस्य चरितार्थत्वात् ॥ षिधु गत्यामिति॥काश्यपादिभिरयमुदित्युक्तः।माधवादिभिस्तु वृत्तिस्वरसादनुदिदेव स्वीकृतः ॥

आदेः ष्णः स्नः ॥ धात्वाद्योः षकारणकारयोः सकारनकारौ भवतः । सेधति । सेधेत्। सेधतु–सेधताद्वा। असेधत । सिषेध। सिध्यात् । सेधिता ॥

(सुबोधिनी)–आदेः ष्णः स्नः॥ष् च ण् च ष्ण् तस्य ष्णः ।न् च नश्च स्नः॥ धातोः किम् । षट् ॥ आदेः किम् । लषति । अणति ॥ षोपदेशानाह । "सेक सृप सृ स्तृ सृज् स्तृ स्त्यान्ये दन्त्याजन्तसादयः ॥ एकाचः षोपदेशा स्मि ष्वष्क स्विद् स्वद् स्वञ्ज स्वप् स्मिङ् ॥ १ ॥ दन्त्यश्च अच्च दन्त्याचौ तौ अन्तौ अव्यवहितौ यस्य स दन्त्याजन्तः दन्त्याजन्तश्चासौ सश्च दन्त्याजन्तसः दन्त्याजन्तस

इरितो वा ॥ इरितो धातोर्वा ङप्रत्ययो भवति पे । सेरपवादः ॥ अच्युतत्–अच्योतीत् ॥ श्च्युतिर् क्षरणे ॥ श्च्योतति ।श्च्योतेत् । श्च्योततु–श्च्योतताद्वा । अश्च्योतत् ॥

(सुबोधिनी)–इरितो वा॥ इरित् यस्य स तस्मात् इरितो धातोर्वा ङः।भूतमात्रार्थे दिवादौ पे । सेरपवादः ॥ लिपुषादेरित्यतो ङ इत्यनुवृत्तम् ॥

(तत्त्वदी०)–इरितो वेति ॥ इरित् यस्य स इरित् तस्मात्॥ सेरपवाद इति॥भूतमात्रार्थे दिवादौ पे इत्यपि बोध्यम् । तेन अवेवेक् भूतार्थत्वेऽपि न । रुणद्धीत्यत्र दिवादिपरत्वाभावान्न। न चात्र भूतार्थताभावादेवाप्राप्तिरिति वाच्यम्। वर्तमानसमीप इत्यनेन भूतेऽपि तिवादिविधानात् । अरुद्धेत्यत्र विक्षितत्वाभावात् ॥

शसात्खपाः ॥ पूर्वशसात्पराः खपाः शिष्यन्ते न शसाः ॥ चुश्च्योत । श्च्युत्यात् । श्च्योतिता । श्च्योतिष्यति । अश्च्योतिष्यत । अश्च्युतत्–अश्च्योतीत् । यकाररहितो प्ययम् । श्चोतति । श्चोतेत् । श्चोततु–श्चोततात् । अश्चोतत् । चुश्चोत । श्चुत्यात् । श्चोतिता ।श्चोतिष्यति ।अश्चोतिष्यत्। अश्चुतत्।अश्चोतीत् ॥ मन्थ विलोडने । मन्थति। मन्थेत्। मन्थतु–मन्थताद्वा । अमन्थत् । नो लोप इति नलोपे प्राप्ते ॥

(सुबोधिनी)–शसात्खपाः ॥ शसः प्रत्याहारः ॥ मन्थ विलोडने।त्र-यादावपि ॥

(तत्त्वदी०)–शसादिति॥ शसः प्रत्याहारः।खपानां शेषत्वोक्तेः।शसानां निषेध इत्याह–न शसा इति ॥ यकाररहित इति॥'मधुश्चुत घृतमिव सुपूतम्'इति प्रयोगश्चानुकूलः ॥ मन्थ विलोडने ॥ हिंसासंक्लेशनयोरपीत्येके ॥

ऋसंयोगान्न ॥ ऋसंयोगाण्णादिरकित् ॥ ममन्थ, ममन्थतुः ॥

(सुबोधिनी)–ऋसंयोगान्नेति ॥ इह ऋसंयोगान्नेति मूलसूत्रम् । तत्र णादिः किदित्यनुवृत्तम् । ऋश्च संयोगश्चानयोः समाहारः ऋसंयोगं तस्मात् णादिः किन्न ॥ जजरतुः । यादादौ कित्त्वात् नो लोप इति न लोपः । मथ्याव् ॥

(तत्त्वदी०)–ऋसंयोगादिति ॥ ऋश्च सयोगश्च ऋसयोग तस्मात् । णादिः किदिति पूर्वसूत्रमनुवर्तते । कित्त्वाभावात्संप्रसारणाभावोऽपि । कित्त्वाविधानात् ङित्त्वमपि न॥अत्र केचित् । आर्तिप्रक्रिया आरतुरित्यादिसिद्धमित्याहुः।अन्ये तु ऋऋ अतुसिति स्थिते र इत्यत्वे अरिति च कृते पूर्ववद्ग्रहणेन आम्वोरित्यत्वे आरतुरिति । अत्रादिग्रहणमनुवर्त्य तन्त्रेण द्वितीयवाक्यार्थः।ऋदन्तात्संयोगादेर्णादिरकित्।तेन सस्मरतुरित्यादि । अथ कथं सस्नतुरिति चेत् । तत्रोक्तस्यानित्यत्वात् । अत्र ऋहसादित्येव सुवचम्।ऋश्च हसश्च ऋहसं तस्मात्। एवं संयोगान्तस्य लोप इत्यत्र हसान्तस्य लोप इत्यस्यैव न्याय्यत्वम् । हसावन्ते यस्येति विग्रहः ॥

आदिर्येषां धातूनां ते दन्त्याजन्तसादयः । दन्त्यान्तसादयोऽजन्तसादयश्चैकाचः एक-
स्वरा धातवः षोपदेशाः । कथंभूताः । सेकृ गतौ । सृप्लृ गतौ । सृ गतौ । स्तृञ्
आच्छादने । सृज् विसर्गे । स्तृञ् आच्छादने । स्त्यै शब्दसंघातयोः । एभ्योऽन्ये
उक्तलक्षणस्यातिव्याप्तिं वारयितुमिदं विशेषणम् । पुनः कथंभूताः । ष्वष्क गतौ ।
ञिष्विदा गात्रप्रक्षरणे । ष्वद आस्वादने । ष्वञ्ज परिष्वङ्गे । ञिष्वप् शये । स्मिङ्
ईषद्धसने । एतैः सहिताः ॥ १ ॥ एकाचः किम् । सोसूच्यते । चुरादावदन्तोऽयम् ॥
दन्त्याजन्तेति किम् । सुष्कुन्द । दन्त्यः केवलदन्त्यो न तु दन्तोष्ठजोऽपि ष्वष्कादीनां
पृथग्ग्रहणात् । तेन स्वाद आस्वादने । इत्यस्यासिस्वददित्यादौ षत्वं न ॥ णोपदेशा-
नाह । नर्द नाटि नाथ नाध नन्द नक्क नॄ नृतः । नर्द शब्दे । नट अवस्यन्दने ।
चुरादिः । नट नृत्ताविति घटादिस्तु नेह गृह्यते नाटीति दीर्घनिर्देशात् ॥ नाथृ नाधृ
याच्ञादौ । टुणादि समृद्धौ । नक्क नाशने । नॄ नये । नृती गात्रविक्षेपे 'एभ्योऽ-
न्येभ्यो भिन्ना णोपदेशाः ॥ नाधृ नन्द नॄ इति त्रयाणां केचिण्णोपदेशतामाहुः ॥

(तत्त्वदी०)—आदेरिति ॥ ष् च ण् च ष्ण् तस्य । स् च नश्च स्नः ॥

प्रादेश्च तथा तौ सुनमाम् ॥ प्रादेः परेषां स्वादीनां नमादीनां च धातूनां सकारनकारयोः षकारणकारौ भवतः षत्वणत्वनिमित्ते सति । निषेधति ॥

(सुबोधिनी)—प्रादेश्च तथा तौ सुनमाम् ॥ प्रादिसंबन्धिनः किलात् परेषां
स्वादीनां सस्य सः नमादीनां नस्य णश्च । षत्वनिमित्तं किलम् । णत्वनिमित्तं षका-
रेफऋवर्णाः ॥ स्वादीनाह । उपसर्गस्थनिमित्तात् सुनोतिसुवतिस्यतिस्तौतिस्तो-
भतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् । प्रतिभिन्नात् सदेश्चावादालम्बनाविदूर्ययोस्तम्भेश्च
व्यवाभ्यां भोजने स्वनश्च परिनिविभ्यः सेवसितसयसिवुसहस्तुट्स्तुस्वञ्जादेः रऋन्ना-
तेश्च सस्य षः । व्याख्या । षुञ् अभिषवे । षू प्रेरणे । षो अन्तकर्मणि । ष्टुञ् स्तुतौ ।
ष्टुभ स्तम्भे । एषां श्तिपा निर्देशाद्यङ्लुकि षत्वं न । तेनाभिसोषवीति । अभिसोषोति-
त्यादि । ष्ठा गतिनिवृत्तौ । सेनयेति ण्यन्तो नामधातुः । सेनया अभियातीति अभिषे-
णयति । षिधु गत्याम् । षिच क्षरणे । षञ्ज सङ्गे । ष्वञ्ज परिष्वङ्गे । स्तम्भु इति सौत्रो
रोधनार्थः । ष्टभि प्रतिबन्धे इति तु न गृह्यते । लक्षणप्रतिपदोक्तन्यायेन सौत्रो हि
नोपध इति प्रतिपदोक्तः । इदित्वान्नुमि कृते ष्टभिर्लाक्षणिकस्तेन विस्तम्भते इत्यादौ
षत्वं न । षद्लृ विशरणादौ । प्रतिभिन्नात्किम् । प्रतिसीदति । आलम्बनमाश्रयणम् ।
अविदूरएवाविदूर्यम् सामीप्यम् । व्यः । अवष्टब्धा गौः निरुद्धा । समीपे आस्ते
इत्यर्थः ॥ एतयोः किम् । अवस्तब्धो वृषलः शीतेन ॥ स्वन शब्दे । विष्वणति ।
सशब्दं भुङ्क्ते इत्यर्थः ॥ भोजने किम् । विस्वनति वीणा ॥ षेवृ सेवायाम् ।
परिषेवनम् ॥ षिञ् बन्धने । क्तान्तः सितशब्दः ॥ सयशब्दस्तु स्वराद इति

मान्तोपधत्वाभावात्कथं वतुरिति चेत्सत्यम्। अन्यतोऽपि वतुर्भवतीत्यनेनैव ज्ञाप्यते । तेन तडित्वा-नित्यादि सिद्धमिति।अथ तथाप्यनामिन इत्येवास्तु किं वतुना इति चेन्न ।नञ्समासभ्रमप्रसंगात्। मत्वर्थीयाद्विरूपो मत्वर्थीयो भवतीत्यनेन ज्ञाप्यते। तेन हस्तिमती शालेत्यादि सिद्धम् । अथानिट इत्येवास्तु स्वरादेरित्यतःस्वरस्यानुवृत्तेस्तस्य च मत्वर्थीयाकारान्तत्वेन ग्रहणात्स्वरवतोऽनिटो धातोः सिणित्कार्यंकृदित्यर्थलाभात् ।सद्वा णित्कार्यं वृद्धिरेव सा च स्वरस्यैवेति स्वरलाभात् । पूर्वगोप्राप्त-स्यैव स्वरस्य भविष्यतीत्यर्थादनुपधाभूताकारस्योपधाभूतनामिनश्च वृद्धिर्भविष्यतीत्यर्थो लभ्य एवेति चेत्सत्यम् । नामिवद्ग्रहणस्योत्तरार्थत्वादित्यलं पल्लवितेन ।

झसात् ॥ झसादुत्तरस्य सेर्लोपो झसे ॥ असैद्धाम्, असैत्सुः । असैत्स्व, असैत्स्म ॥ खद स्थैर्ये हिंसायां च ॥ खदति । खदेत् । खदतु-खदताद्वा । अखदत् ॥

(सुबोधिनी)–झसात् ॥ लोपो ह्रस्वादित्यतो लोपो झसे इत्यनुवृत्तं सेरिति सूत्रं च ॥ झसात्किम् । अचेष्ट ॥ झसे किम् असैत्सीत् ॥ इट्पक्षे असेधीत् ॥ खद स्थैर्ये हिंसायां च । चाद्भक्षणे । स्थिरस्य भावः स्थैर्यम् । ष्वः ॥

(तत्त्वदी०)–झसादिति ॥ सेरित्यस्यानुवृत्तिः लोपो ह्रस्वादित्यतो लोपस्य ॥झसात्किम्। अचेष्ट ॥ झसे किम् । असैत्सु.। ॥सेः किम् ।[illegible] मा भूत्। अत्र लोपो [illegible]-झसेरिति पठितुं युक्तम् ।

अतउपधायाः ॥धातोरुपधाया अतो वृद्धिः ञ्णिति॥चखाद ॥

(सुबोधिनी)–अत उपधायाः॥आदिस्वरस्येत्यतो ञ्णितीति वृद्धिरिति चानुवृत्तम् ॥ अतः किम् । तुतोद ॥ उपधायाः किम् । ननर्दाति ॥

(तत्त्वदी०)–अत उपधाया इति ॥ आदिस्वरस्य ञ्णिति चेति वृद्धेरनुवृत्तिः । [illegible] [illegible] ॥

(णवुत्तमो वा णित्) चखाद-चखद ॥ णित्पे ॥ पे निर्णित्र ॥

(सुबोधिनी)–णवुत्तमो वा णित् ॥ उत्तमपुरुषसंबन्धी णव् वा णित् ॥ पे णि-[illegible] [illegible] ॥

(तत्त्वदी०)–[illegible] ।
[illegible] ।

(सुबोधिनी)-स्वरतिसूतिसूयतिधूञ्रधनशतृपदृपद्रुहमुहस्नुहास्निहां च ॥ एभ्योऽपि परस्य वसादेरनपीड्वा ॥ स्वृ शब्दोपतापयोः भ्वादिर्गृह्यतेऽनुविकरणत्वात् ॥ षूङ् प्राणिगर्भविमोचने आदादिको दैवादिकश्च गृह्यते न तु षूङ् प्रेरणे तौदादिकः ॥ धूञ् कम्पने स्वादिस्यःक्र्यादिस्थश्च न तु धू विधूनने सानुबन्धनिर्देशात् ॥ रध हिंसासंराद्ध्योः ॥ णशू अदर्शने ॥ तृपू प्रीणने ॥ दृपू हर्षमोहनयोः ॥ द्रुह जिघांसायाम् ॥ मुह वैचित्ये ॥ ष्णुह उद्गिरणे ॥ ष्णिह प्रीतौ ॥ स्वरतिसूतिसूयतिधूञ्भ्यां किद्वसादेर्णादेर्नित्यमिट् ॥ एभ्यः परस्य कितो वसादेर्णादेर्नित्यमिड् भवति । स्वरत्यादिविकल्पं वाधित्वा कित इतीण्निषेधे प्राप्ते क्रादिनियमादिड्विधिः ॥

(तत्त्वदी०)-वाशब्दस्य व्यवस्थावाचित्वादाह-स्वरतीत्यादि ॥

तथोर्धः ॥ झभान्ताद्धातोस्तकारथकारयोर्धकारो भवति दधातेर्न ॥ झभे जयाः । सिषेद्ध । सेधिता-सेद्धा । सेधिष्यति-सेत्स्यति । असेधिष्यत्-असेत्स्यत् । असेधीत् ॥

(सुबोधिनी)- तथोर्धः॥ तश्च थ् च तथौ तयोः । आदिजबानामित्यतो झभान्तस्येत्यनुवृत्तं पञ्चम्या विपरिणम्यते ॥ झभान्तात् किम् । भृतः ॥ दधातेर्न । डुधाञ् धारणादारस्मात परयोस्तथोर्द्धो न । धत्तः ॥

(तत्त्वदी०)-तथोर्ध इति ॥ तश्च थ् च तथौ तयोः ॥ वेत्यनुवृत्तेर्दधातेर्निषेधः । यद्वा तथोर्धः इति । तत्र तश्च थ् च एतयोः समाहार तथ् तस्य तथः । अध इति दधातेर्नेत्यर्थः । [illegible] समानुवृत्तिः ॥

अनिटोऽनामिवतः ॥ अनिटोऽनामिवतश्च धातोर्वृद्धिः स्यात्प परे सौ ॥ असैन्सीत् ॥

(सुबोधिनी)-अनिटोऽनामिवतः ॥ द्वयमिदं धातोर्विशेषणम । यद्यपि धातुः [illegible]ऽप्यनिट् न तस्य इडविधानाभावात् । तथापि न इट् यस्मात् तस्मात्परस्य तादिम- [illegible] । अनिटो धातोरुपधाभूतस्य नामिनो वृद्धिर्भवति पे सौ । [illegible] इति सूत्रेणैव वृद्धिः । कार्यानिर्देशोऽयम् । नामि विद्यते [illegible] । [illegible] ॥

[illegible])-अनिटोऽनामिवतः [illegible] अनामिवत इति [illegible] । [illegible]

[illegible]

मान्त्योपधत्वाभावात्कथं वतुरिति चेत्सत्यम् । अन्यतोऽपि वतुर्भवतीत्यनेनैव ज्ञाप्यते । तेन तडित्वानित्यादि सिद्धमिति। अथ तथाप्यनामिन इत्येवास्तु किं वतुना इति चेन्न। नञ्समासभ्रमप्रसंगात्। मत्वर्थीयाद्विरूपो मत्वर्थीयो मन्तरतीत्यनेन ज्ञाप्यते। तेन हस्तिमती शालेत्यादि सिद्धम् । अथानिट इत्येवास्तु स्वरादेरित्यतःस्वरस्यानुवृत्तेस्तस्य च मत्वर्थीयाकारान्तत्वेन ग्रहणात्स्वरवतोऽनिटो धातोः सिर्णित्कार्यंञ्चेदित्यर्थलाभात् । यद्वा णित्कार्यं वृद्धिरेव सा च स्वरस्यैवेति स्वरलाभात् । पूर्वेणाप्राप्तस्यैव स्वरस्य भविष्यतीत्यर्थादनुपधाभूताकारस्योपधाभूतनामिनश्च वृद्धिर्भविष्यतीत्यर्थो लभ्य एवेति चेत्सत्यम् । नामिवद्ग्रहणस्योत्तरार्थत्वादित्यलं पल्लवितेन ।

झसात् ॥ झसादुत्तरस्य सेर्लोपो झसे ॥ असैद्धाम्, असैत्सुः । असैत्स्व, असैत्स्म ॥ खद स्थैर्ये हिंसायां च ॥ खदति । खदेत् । खदतु-खदताद्वा । अखदत् ॥

(बोधिनी)-झसात् ॥ लोपो ह्रस्वादित्यतो लोपो झसे इत्यनुवृत्तं सेरिति सूत्रं च ॥ झसात्किम् । अचेष्ट ॥ झसे किम् असैत्सीत् ॥ इट्पक्षे असेधीत् ॥ खद स्थैर्ये हिंसायां च । चाद्भक्षणे । स्थिरस्य भावः स्थैर्यम् । ष्यः ॥

(तत्त्वदी०)-झसादिति ॥ सेरित्यस्यानुवृत्तिः लोपो ह्रस्वादित्यतो लोपस्य ॥ झसात्किम् । अचेष्ट ॥ झसे किम् । असैत्सुः । ॥ सेः किम् । अरुद्धनामित्यत्र दस्य मा भूत् । अत्र लोपो ह्रस्वझसा-ज्झसेःरिति पठितुं युक्तम् ।

अतउपधायाः ॥ धातोरुपधाया अतो वृद्धिः ञ्णिति ॥ चखाद ॥

(सुबोधिनी)-अत उपधायाः ॥ आदिस्वरस्येत्यतो ञ्णितीति वृद्धिरिति चानुवृत्तम् ॥ अतः किम् । तुतोद ॥ उपधायाः किम् । गणयति ॥

(तत्त्वदी०)-अत उपधाया इति ॥ आदिस्वरस्य ञ्णिति चेति वृद्धेरनुवृत्तिः । अनात इति योग [illegible] धातोर्वृद्धिस्तेन [illegible] इत्यादि सिद्धमिति । पुनरुपधाया इत्यत्र नाम्न इति योजनीयम् । तेन नाम्न उपधाया वृद्धिरिति [illegible] । पुनरुपयोर्मेलनात् धातोरुपधाया अतो वृद्धिरिति ॥ ञ्णिति किम् । [illegible] ॥ उपधायाः किम् । [illegible] ॥ धातोः किम् । [illegible] । अत्र [illegible] ॥

(णवुत्तमो वा णित्) चखाद-चखद ॥ णित्पे ॥ पे र्णित ॥

(सुबोधिनी)-णवुत्तमो वा णित् ॥ उत्तमपुरुषसंबन्धी णव् वा णित् ॥ पे णिरित्यनुवर्तते। पे परे सिर्णिद्भवति णः इत् यस्य स णित् अणितं णिदित्याह कार्यातिदेशोऽयम् ॥

(तत्त्वदी०)-णित्पे इति ॥ [illegible] ॥ [illegible] ।

(सुबोधिनी)-स्वरतिसूतिसूयतिधूञ्रधनशतृपदृपद्रुहमुहस्नुहस्निहां च ॥ एभ्योऽपि परस्य वसादेरनपीड्वा ॥ स्वृ शब्दोपतापयोः भ्वादिर्गृह्यतेऽत्रविकरणत्वात् ॥ षूङ् प्राणिगर्भविमोचने आदादिको दैवादिकश्च गृह्यते न तु षूङ् प्रेरणे तौदादिकः ॥ धूञ् कम्पने स्वादिस्थःक्र्यादिस्थश्च न तु धू विधूनने सानुबन्धनिर्देशात् ॥ रध हिंसासंराद्ध्योः ॥ णश् अदर्शने ॥ तृप् प्रीणने ॥ दृप् हर्षमोहनयोः ॥ द्रुह जिघांसायाम् ॥ मुह वैचित्ये ॥ ष्णुह उद्गिरणे ॥ ष्णिह प्रीतौ ॥ स्वरतिसूतिसूयतिधूञां किद्वसादेर्णादेर्नित्यमिट् ॥ एभ्यः परस्य कितो वसादेर्णादेर्नित्यमिड् भवति । स्वरत्यादिविकल्पं बाधित्वा किति इतीण्निषेधे प्राप्ते क्रादिनियमादिड्विधिः ॥

(तत्त्वदी०)-वाशब्दस्य व्यवस्थावाचित्वादाह-स्वरतीत्यादि ॥

तथोर्धः ॥ झभान्ताद्धातोस्तकारथकारयोर्धकारो भवति दधातेर्न ॥ झभे जवाः । सिषेद्ध । सेधिता-सेद्धा । सेधिष्यति-सेत्स्यति । असेधिष्यत्-असेत्स्यत् । असेधीत् ॥

(सुबोधिनी)- तथोर्धः॥ तश्च थ् च तथौ तयोः ।आदिजबानामित्यतो झभान्तस्येत्यनुवृत्तं पञ्चम्या विपरिणम्यते ॥ झभान्तात् किम् । भूतः ॥ दधातेर्न । डुधाञ् धारणादावस्मात् परयोस्तथोर्द्धो न । धत्तः ॥

(तत्त्वदी०)-तथोर्ध इति ॥ तश्च थ् च तथौ तयोः ॥ वेत्यनुवृत्तेर्दधातेर्निषेधः । यद्वा तयोऽधः इति । तत्र तश्च थ् च एतयोः समाहार तथ् तस्य तथः । अध इति दधातेर्नेत्यर्थः । आदिजबानामित्यतो झभानुवृत्तिः ॥

अनिटोऽनामिवतः ॥ अनिटोऽनामिवतश्च धातोर्वृद्धिः स्यात्पे परे सौ ॥ असैत्सीव् ॥

(सुबोधिंनी)-अनिटोऽनामिवतः ॥ द्वयमिदं धातोर्विशेषणम् । यद्यपि धातुः सर्वोऽप्यनिडेव तस्य इड्विधानाभावात् । तथापि न इट् यस्मात् तस्मात्परस्य तादिप्र-
त्ययस्य ... व्याख्येयम् । अनिटो धातोरुपधाभूतस्य नामिनो वृद्धिर्भवति पे सौ ।
त्यादि । ...तु धातोर्नामिन इति सूत्रेणैव वृद्धिः । कार्यातिदेशोऽयम् । नामि विद्यते-
णयति । ...
वान् तस्य । तडिदादित्वाद्वतुः ॥
रोधनार्थः ...)-अनिटोऽनामिवतः इति॥अनिटः अनामिवत इति छेदः। नन्वनिट्त्व
नोपध इति ... न हि कस्यापि धातोरिड्विधीयते किं तु प्रत्ययस्यैव । तस्मादनिट् इति व्यर्थमिति
षत्वं न। पट्... यस्मात्परस्य प्रत्ययस्येति व्याख्यानात् । तथापीडभावः कस्य प्रत्ययस्य ग्राह्यः।
आविद्द्...व्यादेस्तु श्वायष्टादशानिमित्तात्परस्य सेट्त्वात् । अश्च नामी च अनामिनी तौ
इत्यर्थः ॥ एतये... । द्वन्द्वान्ते श्रूयमाणस्य वतोः प्रत्येकमन्वय इत्याशयेनाह-अवतो नामिवत
तच्छब्दं भुङ्क्ते ई...ः मानिदनथाप्यनुपधाभूताकारयोर्नथाभूतनामिनश्चाग्रानाकरम्भः । नन्वत्र
परिवेषणम् ॥ पि...

(तत्त्वदी०)-प्रादिस्थादिति ॥ प्रादिषु तिष्ठतीति प्रादिस्थम् तस्मात् निमित्तात् णत्वनिमित्तात् षकाररेफऋवर्णरूपात् नेरुपसर्गस्य नस्य णत्वमित्यर्थः । गदादिषु धातुषु परेषु ॥ यत्तु नेर्णत्वमित्येतावन्मात्रं वासुदेवेनोक्तं तन्न निगदतीत्यादावतिव्याप्तेः । विनिगदतीत्यत्र च ॥

(अन्यत्राकखादावषान्ते आद्योच्चारणे वा) अकखादौ किम् । प्रनिकरोति । प्रनिखादति ॥ अषान्ते किम् । प्रनिद्विष्यति ॥ वेति किम् । प्रणिभवति । प्रनिभवति ॥ आद्योच्चारणे किम् । प्रनिचकार । प्रनिचखाद । प्रणिगदति । अगदीत् ॥ रद विलेखने । रदति । रदेत् । रदतु । अरदत् । रराद ।

(सुबोधिनी)-अन्यत्राकखादावषान्ते आद्योच्चारणे वा ॥ आदौ भवा आद्याः । आद्यानां पाणिनिकात्यायनपतञ्जलीनामुच्चारणमाद्योच्चारणं तस्मिन् । कादि-खादिषान्तवर्जे गदनदादेरन्यस्मिन् धातौ परे प्रादिस्थान्निमित्तात्परस्य नेर्नस्य णत्वं वा । कश्च खश्च कखौ तावादी यस्य स कखादिः कखादेरन्योऽकखादिस्तस्मिन् । षोऽन्तो यस्य स षान्तस्तस्मादन्योऽषान्तस्तस्मिन् । अकखादौ किम् । प्रनिचकार प्रणिचखाद ॥ अषान्ते किम् । प्रनिपेक्ष्यति ॥ रद विलेखने । विलेखनं भेदनम् ॥

(तत्त्वदी०)-अन्यत्रेति ॥ अन्यत्र वा अन्यस्मिन् धातौ परे प्रादिस्थनिमित्तपूर्वकस्य नेर्णत्वं वेत्यर्थः । आद्योच्चारणे प्रथमोच्चारणसमये अकखादौ अषान्ते च । कश्च खश्च कखौ तावादी यस्य स कखादिः कखादेरन्योऽकखादिस्तस्मिन् । षः अन्ते यस्य स षान्तस्तस्मिन् । आद्योच्चारणे इत्यु-भयत्रान्वेति । तथा चायमर्थः । आद्योच्चारणे कादिखादिषान्तवर्जगदनदादेरन्यस्मिन् धातौ परे प्रादिस्थान्निमित्तात्परस्य नेर्णस्य णत्वं वा भवति । प्रणिभवन्ति । प्रनिभवन्ति ॥ अकखादौ किम् । प्रनिकरोति । प्रनिखादति ॥ अषान्ते किम् । प्रनिपिनष्टि । विलेखने इति ॥ विले-खनं भेदनम् ।

लोपः पचां कित्ये चास्य ॥ पचादीनां लिट्यनादेशादीनां पू-र्वस्य लोपो भवत्यकारस्य एकहसमध्यस्थस्य चैकारः किति णादौ सेटि थपि च ॥ रेदतुः । रेदिथ ॥ णद अव्यक्ते शब्दे । प्रणिनेदुः । नेदिथ ॥ अर्द गतौ याचने च ॥ आभ्वोर्णादौ ॥

(सुबोधिनी)-लोपः पचां कित्ये चास्य ॥ पचामिति बहुवचनेन पचप्रकारा धातवो गृह्यन्ते । यथा पचधातुरेकहसमध्यस्थाकारवान् लिटि अनादेशादिश्च तथान्येऽपि धातवः ॥ अस्य किम् । दिदिवतुः । ररासे ॥ अनादेशादीति किम् । चकणतुः ॥ एकश्चासावसहायवचनः । हसौ च तौ हसौ च एकहसौ तयोर्मध्यस्थः एकहसमध्य-स्थस्तस्य ॥ एकहसेति किम् । ततसृतुः । तत्र ददृशतुः ॥ आभ्वोर्णादौ ॥

तां यत्कार्यमत उपधाया इत्यादिना वृद्ध्यादि तदतिदिश्यते । यद्यपि णितां णत्वादीनामातो ञ्छायेत्यादिना विहितम् अवाचपि णित्कार्यं तथापि तन्नात्रातिदिश्यते कार्यविशेषत्वात् । सामान्यातिदेशोऽयम् । णविणादयस्तु णिद्विशेषाः । यथा ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमित्यत्र वसिष्ठे गौतमे च तन्नातिदिश्यते किं तु ब्राह्मणसामान्यत्वस्य।तथात्रापि णिति यद् दृष्टं कार्यं तदातिदिश्यते ॥

(अतो हसादेर्लघोर्वा वृद्धिः सेटि सौ) अखदीत्-अखादीत्॥

गद व्यक्तायां वाचि ॥

(सुबोधिनी)–अतो हसादेर्लघोर्वा वृद्धिः सेटि सौ ॥ हसादेर्लघोरकारस्य वा वृद्धिः स्यात् सेटि परस्मैपदे सौ ॥ अतः किम् । अदेवीत् ॥ हसादेः किम् । मा अतीत् ॥ लघोः किम् । अगर्दीत् ॥ सेटि किम् । अपाक्षीत् ॥ पे किम्। अयतिष्ट॥ वद स्थैर्ये । पवर्गीयादिः ॥

(तत्त्वदी०)–**अतो हसादे**रिति॥अत इत्यस्यैव विशेषणद्वयम्।हस आदिर्यस्य स हसादिस्तस्य ॥हसादेः किम् । मा भवानतीत् ॥लघोः किम् । अनन्दीत् ॥यद्यचकाशीदित्यत्र चकारादकारस्य वृद्धिवारणाय येन नाव्यवधानमिति न्यायेन यद्येकवर्णव्यवधानमाश्रीयते तदा त्वरक्षादित्यत्रापि प्रसक्त्यभावाल्लघोरिति न कर्तव्यमिति केचित्।एतच्च अत उपधाया इत्यत्र नो वेत्यतो वानुवृत्त्या लभ्यते । एवमन्यत्रापि वृद्धिनिषेधविकल्पयोरिदमेव मूलमूह्यम् ॥

(प्रादिस्थान्निमित्तान्नेर्नस्य णो गदनदपदपतअपिद्दाधास्थामाङ्मेङ्स्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु) ॥

(सुबोधिनी)–प्रादिस्थान्निमित्तान्नेर्नस्यणो गदनदपदपतअपिद्दाधास्थामामाङ्मेङ्स्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु॥प्रादिषु तिष्ठतीति प्रादिस्थः तस्मात् निमित्तात् षकाररेफऋवर्णरूपात् परस्य नेर्णत्वं गदादिषु परेषु ॥ गद व्यक्तायां वाचि । णद अव्यक्ते शब्दे।पद गतौ ।पत्लृ पतने । एषां चतुर्णामपा निर्देशाद्यङ्लुकि णत्वं न । प्रनिजागदीति प्रनिनानदीति ॥ अपिद्दोति चत्वारः। डुदाञ् दाने । प्रणिददाति । दाण्। प्रणियच्छति । दो प्रणिद्यति देङ् प्रणिदयते ॥ घारूपौ द्वौ । धेट् । प्रणिधयति । डुधाञ् ।प्रणिदधाति॥ष्ठा गतिनिवृत्तौ । माङ् माने। मेङ् प्रणिदाने । षो अन्तकर्मणि।हन् हिंसागत्योः।या प्रापणे। वा गतिगन्धनयोः । द्रा कुत्सायाम्। प्सा भक्षणे।डुवप् बीजतन्तुसन्ताने । वह प्रापणे। शमु उपशमे । चिञ् चयने ।दिह उपचये स्यत्यादीनामेकादशानां श्तिपा निर्देशाद्यङ्लुकि णत्वं न । प्रनिसासेति । प्रनिजंघनीतीति ॥

(सुबोधिनी)—स्वरादेः ॥ दिवादावडित्यनुवृत्तम्।स्वर आदिर्यस्य सः स्वरादिस्तस्य।आरम्भसामर्थ्यात् द्वितीयोऽडित्यर्थः।अटं विना स्वरादित्वमिह विवक्षितमन्यथा दिवादावडित्यग्रे आटि चेति सूत्र्यताम् ॥

(तत्त्वदी०)—स्वरादेरिति॥ अत्राटं विना स्वरादित्वं बोध्यम् विधानसामर्थ्यात्।अन्यथा दिवादावडित्यस्याग्रेऽटूचेति सूत्रितेन द्वितीयाटः संभवात्। यत्तु वासुदेवेन।आद्योच्चारणे स्वरादेः। अन्यथा सर्वस्यैव प्रथमाटा स्वरादित्वादव्यावृत्तेरित्युक्तम्। तन्न। औट ऐज्यत इत्यादावप्रसङ्गात्॥ द्वितीय इति।विधानसामर्थ्यात् प्रथमाबाधेन भवतीत्याशयः।करणसामर्थ्यादेकेनाटा धातुकार्यानन्तरं द्वितीयेन कार्यमित्याह ॥ ए ऐ ऐ ॥

कासादिप्रत्ययादाम् कृसभूपरः ॥ कास् आस् दय अय गुरुनाम्याद्यनेकस्वरेभ्यो णबादौ परे आम् प्रत्ययो भवति। स च कृ अस् भूपरः प्रयोक्तव्यः ॥

(सुबोधिनी)—कासादिप्रत्ययादाम् कृसभूपरः॥कासृ शब्दकुत्सायाम्।आस उपवेशने। दय दाने। अय गतौ।गुरुश्चासौ नामी च गुरुनामी। स आदिर्यस्य च गुरुनाम्यादिर्धातुः। प्रत्ययग्रहणमनेकस्वरोपलक्षकम्। एभ्य आम् प्रत्ययः स्यात्।कीदृशः कृसभुवः परे यस्मात्स कृसभूपर इत्यर्थकथनेन विपर्यासव्यवाहितयोर्निवृत्तिः कथिता। कथं तर्हि 'तं पातयां प्रथममास पपात पश्चात्'। 'प्रभ्रंशयां यो नहुषं चकार'-इत्यादिप्रयोगाः। प्रमादत एव। कृसभुवां क्रियासामान्यवाचित्वादाम्प्रकृतीनां क्रियाविशेषवाचित्वात् तदर्थयोरभेदान्वयो भवति।सामान्यविशेषयोरभेदान्वयो लोकतः सिद्धोऽस्ति। एवं च इन्दांचकार। इन्दांबभूवेत्यादौ एककर्तृकाभूतानद्यतनपरोक्षा परमैश्वर्याभिन्नक्रियेति तुल्यो बोधः। ननु करोतिः सकर्मकः भवतिस्त्वकर्मकः। कथं द्वयोस्तुल्यबोध इति चेदत्राहुः। यदा हि करोतिरुत्पादनार्थकः स्वातन्त्र्येण प्रयुज्यते। तदा तस्य नियमेन सकर्मकत्वं भवति। घटं चक्रे। राज्यं चकारेत्यादौ। यदा तु क्रियान्तरसमानाधिकरणःकरोतिःप्रयुज्यते तदा परसमानाधिकरणः करोतिस्तत्सकर्मकत्वाकर्मकत्वाभ्यां कृत्वा स्वयमपि तथा सकर्मकाकर्मकभावौ भजते। उद्द्वांचकारेति।एवं भ्वस्त्योरप्याम्प्रकृतिसमानाधिकरणत्वेन क्वचित्सकर्मकत्वं बोध्यम्। तथा च 'तस्यातपत्रं बिभरांबभूव' इति माघः॥ 'तपर्तुपूर्तावपि मेदसां भरा विभावरीभिर्बिभरांबभूविरे' इति श्रीहर्षश्च ॥ इत्यत्र क्रियान्तरसमानाधिकरणाद्भवतेः सकर्मकत्वात् कर्मणि लिट्। एवं चानुप्रयुक्त्यर्थगतकारकसंख्यादिविशेषाभिव्यक्तिरनुप्रयोगस्य फलमिति ॥ गुरुनाम्यादिरिति। ईहेव ॥ अनेकस्वरेति किम्। अ इवाचचारेति यौ इत्यत्र प्रत्ययान्तेऽप्यनेकस्वरत्वाभावान्न ॥

(तत्त्वदी०)—कासादीनि। गुरुश्चासौ नामी च [illegible] गुरुनाम्यादिः। [illegible] [illegible] न। तेन च इवाचचार [illegible] इति [illegible]ऽनेक[illegible] ॥

(विदंदरिद्राजागृषांवा) रः ॥ पूर्वस्य ऋवर्णस्याकारः ॥

(सुबोधिनी)-विदंदरिद्राजागृषां वा ॥ एभ्यो वाऽऽम् दरिद्राजागर्त्योरनेकस्वरत्वान्नित्यम् प्राप्तौ वेत्त्योषत्योश्चाप्राप्तौ विकल्पः । विद् ज्ञाने । दरिद्रा दुर्गतौ । जागृ निद्राक्षये । उष दाहे । आमो मस्य नेत्त्वम् । आस्कासोराम्विधानाद् ज्ञापकात् ॥ रः ॥ ऋ अः इति छेदः पूर्वस्य हसादिः शेष इत्यतः पूर्वस्येत्यनुवृत्तम् ॥

(तत्त्वदी०)-अत्रोदितो वेत्यतो वानुवृत्तेराह-विदंदरिद्राजागृषां वेति ॥ दरिद्राजागर्त्योरनेकस्वरत्वान्नित्यप्राप्तौ वेत्त्योषत्योश्चाप्राप्तौ विकल्पः ॥ र इति ॥ ऋ अः इति छेदः । 'पूर्वस्य हसादिः शेषः' इत्यतः पूर्वस्येत्यनुवर्तते । यत्तु वासुदेवेन णबादौ पूर्वस्येत्यनुवर्तेत इत्युक्तम् । तन्न । इत्यप्रत्ययातारादस्थे णबादावीति अस्मात्कृत्वादस्यानुवृत्त्यसंभवात् ॥

धातोर्नामिनः ॥ नाम्यन्तस्यादन्तस्य च धातोर्वृद्धिः ञ्णिति परे ॥ इन्दांचकार, इन्दांचक्रतुः, इन्दांचक्रुः । इन्दांचकर्थ । इन्दामास, इन्दामासतुः, इन्दामासुः । इन्दांबभूव । इन्द्यात् । ऐन्दीत् ॥ णिदि कुत्सायाम् । इदितो नुम् । णपूर्वः । प्रणिन्दाति । प्रनिन्दति । प्रनिन्देत् । प्रणिन्दतु । प्राणिन्दत् । निनिन्द । निन्द्यात् । निन्दिता । निन्दिष्यति । अनिन्दिष्यत् । अनिन्दीत् ॥ दवि पालने । ददन्द ॥ उख गतौ । अप् कर्तरि । उपधालघोर्गुणः । ओखति । ओखेत् । ओखतु । औखत् ॥

(सुबोधिनी)-धातोर्नामिनः ॥ आदिस्वरस्येत्यतो वृद्धिरिति ञ्णितीति चानुवृत्तम् । अत्र हि स्वरस्येति पदमनुवृत्य वाक्यभेदेन व्याख्येयम् । तेन स्वरान्तस्य धातोर्वृद्धिः ञ्णिति । तेन श्वानमाचष्टे शावयति । विद्वांसं विदावयतीत्यादि सिद्धम् । ऋदन्तस्येति अत उपधाया इत्यधात इति योगविभागात्तस्येहाकर्षणाद्वा लब्धम् । तेन च अकार्षीत्यादि सिद्धम् ॥

(तत्त्वदी०)-धातोर्नामिन इति ॥ आदिस्वरस्येत्यतो वृद्धिरिति ञ्णितीति चानुवर्तते ॥ [illegible]

[illegible]

तत्वादयुपपत्तेः ॥ इन्दामासेति ॥ कस्भूपर इत्यत्र पृथग्ग्रहणादस्तेर्भूभावो न । अन्यथा ठि कृभूपर इत्येवोच्येत । आमो मस्पेतत्मास्कासोर्विधानान्न अन्यथा मित्त्वादन्त्यस्वरात्परत्र विधानादा- स्कासे : सकारात्पूर्वविधाने सवर्णदीर्घत्वे वैलक्षण्याभावात् ।

(असवर्णे स्वरे पूर्वस्येवर्णोवर्णयोरियुवौ) उवोख, ऊखतुः, ऊखुः । उवोखिथ । औखीत् ॥ लुञ्च अपनयने ॥ अञ्चु गतिपूज- नयोः ॥ अञ्चति । अञ्चेत् । अञ्चतु । आञ्चत् । आनञ्च । अच्यात् । पूजायां अञ्च्यात् । अञ्चिता । अञ्चिष्यति । आञ्चिष्यत् । आञ्चीत् ॥ आछि आयामे । आञ्छति । आञ्छेत् । आञ्छत् ॥

(सुबोधिनी)-असवर्णे स्वरे पूर्वस्येवर्णोवर्णयोरियुवौ ॥ धातोः पूर्वस्ये- वर्णोवर्णयोरियुवौ भवतः असवर्णे स्वरे । पूर्वं द्वित्वं पश्चादुकारस्योपधाया लघोरिति गुणे कृते पूर्वस्योव् । उवोख । कित्त्वाद्गुणाभावे ऊखतुः । अत्र उ उख् अतुस् इति स्थिते पर्जन्यवल्लक्षणप्रवृत्तिरिति न्यायात् पूर्वस्य ह्रस्वस्यापि ह्रस्वे कृते सवर्णदीर्घः ततो 'ह्रस्वः' इति पुनर्ह्रस्वो न । लक्ष्ये लक्षणं सकृदेव प्रवर्त्तते इत्युक्तत्वात् । नुग- शामिति नुक् । आनञ्च । गतौ नो लोप इति नो लोपः । अच्यात् । आछि आयामे । आयामो दैर्घ्यम् ॥

(आञ्छेर्नुग्वा णादौ) आञ्छ आनाञ्छ ॥ हुर्छा कौटिल्ये ॥

(सुबोधिनी)-आञ्छेर्नुग्वा णादौ ॥ आञ्छेः पूर्वस्य नुग् वा णादौ परे । नुगशामिति नित्ये प्राप्ते विकल्पः ॥

ग्वोर्विहसे ॥ हूर्छति । हूर्छतु । जुहूर्छ । हूर्छ्यात् । हूर्छिता । हूर्छिष्यति । अहूर्छिष्यत् । अहूर्छीत् । युच्छ प्रमादे । युच्छति ॥ वज गतौ ॥

(शसददवादिगुणभूताकाराणां नैत्वपूर्वलोपौ) ववाज । वव- जतुः । अवाजीत् ॥ व्रज गतौ । व्रजति । व्रजेत् । व्रजतु । अव्र- जत् । वव्राज । व्रज्यात् । व्राजिता । व्रजिष्यति । अव्रजिष्यत् ॥

(सुबोधिनी)-शसददवादिगुणभूताकाराणां नैत्वपूर्वलोपौ ॥ एषामेत्वपू- र्वलोपौ न । शसु हिंसायाम् । दन्त्यान्तः । दद दाने । वकारो दन्त्यौष्ठ्यः आदौ यस्य स वादिः । गुणशब्देन भूत उत्पादितः गुणभूतः गुणभूतश्चासौ अकारश्च गुणभूता- कारः शशरतुरित्यादौ गुणशब्देन क्रियमाणोऽर् तदवयवोऽकारः । लुलविथेत्यादौ तु गुणशब्देन क्रियमाणो य ओकारस्तत्स्थानिकस्यावादेशस्यावयवोऽकारस्तस्यैत्वपूर्व- लोपौ न ॥

(तत्त्वदी०)-**शसददेति** ॥ शशप्लुतगताविति तालव्यान्तस्य ग्रहणमिति कश्चिद्भ्राम तद्भाष्यविरोधादुपेक्ष्यम ॥ **गुणभूतेति** ॥ गुणो भवतीति गुणशब्देन भावितो योऽकारस्तस्येत्यर्थः । तथा च शशरतुरत्रापि गुणे कृतेऽवयवस्यास्य न । लुलवियेत्यत्र ओकारे गुणे तस्यापि तदवयवस्यास्य न । गुणभूतत्वं साक्षात्परम्परासाधारणम् । तेनोक्तप्रयोगद्वयनिर्वाहः एतश्च लोपः पचामिति सूत्रे चकारादधिकाराल्लभ्यते ॥

(वदिव्रज्योः सौ नित्यं वृद्धिः) अव्राजीत् ॥ अज गतौ क्षेपणे च । अजति । अजेत् । अजतु । आजत् ॥

(सुबोधिनी)-**वदिव्रज्योः सौ नित्यं वृद्धिः** ॥ एतयोर्नित्यं वृद्धिः सौ परे ॥ अतो हसादेरिति विकल्पप्राप्तौ नित्यविधानम् ॥

(तत्त्वदी०)-**वदिव्रज्योरिति** ॥ अतो हसादेरिति विकल्पप्राप्तौ नित्यम् ॥

(अजेरचतुर्षु वीवसादौ वा) विवाय ॥

(सुबोधिनी)-**अजेरचतुर्षु वीवसादौ वा** ॥ अजेर्वीत्यादेशोऽनपि वसादावनपि तु वा ॥ गुरुत्वात् सर्वादेशः ॥

नुधातोः । विकरणस्य नोर्धातोश्चिवर्णोवर्णयोरियुवौ स्वरे । अनेकस्वरस्यासंयोगपूर्वस्य तु य्वौ ॥

(सुबोधिनी)-**नुधातोः** ॥ य्वोर्धातोरिति सूत्रं य्वौ वेति चानुवृत्तम् । क्नुप्रत्ययसंबन्धिनो नु इत्यस्य न ग्रहणं निरनुबन्धकग्रहणे न सानुबन्धकस्येत्युक्तत्वात् । णु स्तुताविति धातोरपि न कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणमिति परिभाषितत्वात् पारिशेषात् नु इत्यस्य विकरणस्य ग्रहणम् । नुप्रत्ययान्तस्य धातोश्चिवर्णोवर्णयोरियुवौ । अनेकस्वरस्यासंयोगपूर्वस्य तु नोर्धातोश्चिवर्णोवर्णयोर्य्वौ धातोर्विहिते स्वरादौ परे । शक्नुवन्ति । शिश्रियतुः । लुवन्ति । असंयोगपूर्वस्यानेकस्वरस्य तु सुन्वन्ति । निन्यतुः जुह्वति ॥ अनेकस्वरस्येति किम् । रियाति । पियाति । रि पि गतौ । रुवन्ति । नुप्रत्ययान्तस्यानेकस्वरत्वाव्यभिचारात् प्रत्युदाहरणं न ॥ धातोर्विहिते इति किम् । सुधीशौ ॥

(तत्त्वदी०)-**नुधातोरिति** य्वोर्धातोरिति य्वौ वेति च पूर्वसूत्रद्वयमनुवर्तते । अत्र च धातोर्विहिते स्वरादौ परे इति बोध्यम् । तेन सुधीशावत्र पदादिस्वरे न । त्रस्तत्रे ह्यत्र (?) क्नोरपि न ग्रहणं नुग्रहणेन निरनुबन्धकग्रहणे न सानुबंधकस्येति परिभाषया विकरणस्यैव नोर्ग्रहणात् । ण्णु स्तुताविति धातोरपि न ग्रहणं कृत्रिमत्वात् ॥

(उवर्णान्तेषु हुन्वोरेवापि) विव्यतुः ॥

(सुबोधिनी)-**उवर्णान्तेषु हुन्वोरेवापि** ॥ अपि आद्विषये चतुर्षु अनेकस्वरस्यासंयोगपूर्वस्य धातोरुवर्णस्य वत्वं न । हुन्वोरेव वत्वं चतुर्षु । अत्रापि तु जुहुवतुः । विव्यतुरित्यत्र य्वोर्वि ह्रस्वे इति दीर्घो न यत्वस्यासिद्धत्वात् ॥

(तत्त्वदी०)-उवर्णान्तेषु हुन्वोरेवापीति ॥ हु दानादनयोः । नोर्विकरणस्य अपि सन्निधाने इत्यर्थः । तेन जुहूषति चिन्वतीत्यत्र न तु बोभुवतीत्यत्रापि । एतच्चानुवृत्त्या लभ्यते ॥

(**स्वरान्तादत्वतश्च तादौ नित्यानिटस्थपो वेट्**) विवयिथ । विवेथ । आजिथ । विव्ययुः । विव्य । आजिव । आजिम । वीयात् ॥

(सुबोधिनी)-स्वरान्तादत्वतश्च तादौ नित्यानिटस्थपो वेट् ॥ स्वरान्ता-त्तादौ नित्यानिट आद्योच्चारणेऽत्वतस्तादौ नित्यानिटश्च धातोः परस्य थप इड् वा भवति ॥ अत् विद्यते यस्य स अत्वान् तस्मात् ॥ स्वरान्तात् किम् । विभेदिथ ॥ थपः किम् । पपिव ॥ तादौ नित्यानिटः किम् । सस्वरिथ । स्वरतिसूतीत्यनेन वेट्कोऽयम् ॥ आद्योच्चारण इति किम् । चकर्षिथ ॥ अत्वतः किम् । विभेदिथ ॥ तपरः किम् । रराधिथ ॥ तादाविति किम् । जग्रहिथ । 'वुः से' इत्यनेन सप्रत्ययेऽयं नित्यमनिट् । नित्यानिटः किम् । आनञ्जिथ । ऊदित्वाद्वेट्कोऽयम् ॥

(तत्त्वदी०)-अत्वत इति ॥ अद्विद्यते यस्य सोऽत्वान् । तस्मादित्यर्थः ॥ नित्यानिटः किम् । संक्ता । सञ्जिता ॥

नैकस्वरादनुदात्तात् ॥ आद्योच्चारणेऽनुदात्तादेकस्वराद्धातोः पर-स्य वसादेरिण्न स्यात् ॥

(सुबोधिनी)-नैकस्वरादनुदात्तात् ॥ आद्योच्चारणे इत्युभयत्रान्वेति । आद्यो-च्चारणेऽनुदात्तादेकस्वराद्धेत्यर्थः तेन विभित्सतीत्यत्र सान्ते अनेकस्वरत्वेऽपीण्निषेधो भवत्येव ॥

(तत्त्वदी०)-नैकस्वरादिति ॥ आद्योच्चारणे इति उभयत्रान्वेति । आद्योच्चारणेऽनुदात्ता-देकस्वरादित्यर्थः । तेन विभित्सतीत्यत्र सान्तेऽनेकस्वरत्वेऽपि इण्निषेधो भवत्येव ॥

" अनिट् स्वरान्तो भवतीति दृश्यतामिमांस्तु सेटः प्रवदन्ति तद्विदः । अदन्तमृदन्तमृतां च वृङ्वृञौ श्विडीङिवर्णेष्वथ शीङ्श्रि-ञावपि ॥ १ ॥ गणस्थमूदन्तमुतां च रुस्नुवौ क्षुवं तथोर्णोति-मथो युणुक्ष्णुवः ॥ इति स्वरान्ता निपुणैः समुच्चितास्ततो हला-न्तानपि सन्निबोधत ॥ २ ॥ शकिस्तु कान्तेष्वनिडेक इष्यते घसिश्च सान्तेषु वसिः प्रसारणी ॥ रभिश्च भान्तेष्वथ मैथुने यभिस्ततस्तृ-तीयो लभिरेव नेतरे ॥ ३ ॥ यमिर्मकारान्तेष्वनिडेक इष्यते रमि-श्च यश्च श्यनि पठ्यते मनिः । नमिश्चतुर्थो हनिरेव पञ्चमो गमिस्तु षष्ठः प्रतिषेधवाचिनाम् ॥ ४ ॥ दिहिर्दुहिर्मेहतिरोहती वहिर्नहि-स्तु षष्ठो दहतिस्तथा लिहिः　　इमेऽनिटोऽष्टाविह मुक्तसंशयाः

[illegible] समासाश्रित [illegible] । [illegible] परत्वं [illegible] [illegible] [illegible] प्रकरणेन [illegible] [illegible] [illegible] त्रिपत्यगान्तइति

[illegible] ॥ गोपाभ्यात्-कृष्णात् । गोपा-

[illegible] । अगोपागोप-अगोपरीत ॥

[illegible] ॥ [illegible] समासे गत तस्य॥ [illegible] [illegible] [illegible] । [illegible] किम । [illegible] [illegible] [illegible] मागुत् । गत । [illegible] । [illegible] [illegible] नाभिजन इति [illegible] ।

[illegible] ॥ [illegible] ॥

[illegible] ॥ [illegible] । [illegible]

[illegible] । [illegible] ।

[illegible] ॥

[illegible] ॥

[illegible]

[illegible] ॥

[illegible]

(सुबोधिनी)-गमां छः ॥ गम्लृ गतौ । यम उपरमे । इषु इच्छायाम् । एते गमादयः । बहुवचनमाद्यर्थम् ॥

(तत्त्वदी०)-गमामिति ॥ बहुवचननिर्देशस्य फलमाह-गमादय इत्यादि ॥

(यमिरमिनमातां सक्सेरिट् पे) अयंसीत. अयंसिष्टाम् ॥ णम प्रह्वत्वे शब्दे च । नेमिथ- ननन्थ। अनंसीत् ॥ ईर्क्ष्य ईर्ष्य ईर्ष्यायाम् । ईर्क्ष्यति । ऐर्क्ष्यीत । ऐर्ष्यीत् ॥ गम्लृ गतौ । गच्छति ॥

(सुबोधिनी)-यमिरमिनमातांसक् सेरिट् पे॥एषां सक् स्यात् एभ्यःसेरिट् पे परे ॥ अयंसीत्, अयंसिष्टाम् । व्यरंसीत, व्यरंसिष्टाम् । अनंसीत्, अनंसिष्टाम् । पे किम् । उदायत । अरंसाताम् ॥

गमां स्वरे ॥ गमहनजनखनघसामुपधाया लोपः स्यात्स्वरे क्ङिति न तु ङे ॥ जग्मतुः । जगमिथ-जगन्थ ॥

(सुबोधिनी)-गमां स्वरे ॥ गम्लृ गतौ । हन् हिंसागत्योः । खनु अवदारणे । घस्लृ अदने । एषामुपधाया लोपः स्यात् स्वरादौ क्ङिति प्रत्यये न तु ङे । नो वेत्यतो व्यवहितार्थं वेदानुवर्तनात् जग्मतुः । जघ्नतुः । चख्नतुः । जक्षतुः ॥ ङे किम् । अगमत् ॥

(तत्त्वदी०)-गमां स्वर इति ॥ [illegible] नो वेत्यतो [illegible]-न तु ङे [illegible] न ॥

हन्नृतः स्यपः ॥ हन्तेर्ऋदन्ताच्च परस्य स्यप इट् भवति । गमेस्तु पे गमिष्यति ॥

(सुबोधिनी)-हन्नृतः स्यपः । [illegible] [illegible] हन्तृ [illegible] [illegible] इट् न ।

(तत्त्वदी०)-हन्नृतः [illegible]

[illegible]

[illegible] ॥ [illegible] ।

[illegible]

(सुबोधिनी)-[illegible]

द्युतादिभ्योऽस्यतिवक्तीति च लब्धम्।पुषादिश्च दिवाद्यन्तर्गणो ग्राह्यः लित्साहचर्यात् लितो हि प्रायेणानिटः तत्साहचर्यात्पुषोऽप्यनिड् ग्राह्यः स च दिवादेः न भ्वादेः सेट्त्वात् न चुरादिर्ञिना व्यवधानाच्च ॥

(तत्त्वदी०)-लित्पुषादेरिति ॥ ऌ इत् यस्य स लित् । पुष् आदिर्यस्य स पुषादिः । लिच्च पुषादिश्चानयोः समाहारः लित्पुषादिस्तस्य । नुमोऽनित्यत्वात्क्लीबत्वस्यैव वा पुंस्त्वम् ॥ ननु ञेरङ् द्विश्चेत्यनन्तरोक्तसूत्रादङनुवृत्तेः किं ङग्रहणेनेति चेत्सत्यम् । ङग्रहणं योगविभागेनान्यतोऽपि विधानार्थम् । तेन द्युतादिभ्योऽपि अस्यतिवक्तिख्यातिभ्यश्च भवति । अथैकयोगनिर्दिष्टन्यायेनाङि द्वित्वं भवेदिति वाच्यम् । ञेरिति ग्रहणात् । ण्यन्तादेवाङि द्वित्वविधानात् न त्वन्यस्मात् । अङि लघोर्ह्रस्व उपधाया इति ह्रस्वस्तु लित्पुषादेर्दीर्घोपधत्वाभावादेव न द्वित्वाभावेन पूर्वपदत्वाप्रसङ्गाच्च॥

(म्रुचादेर्वा ङः) अम्रुचत्-अम्रोचीत् । अम्लुचत्-अम्लोचीत् ॥ ग्रुचु ग्लुचु चौर्ये । अग्रुचत्-अग्रोचीत् । अग्लुचत्-अग्लोचीत् ॥ ग्लुञ्चु गतौ । अग्लुचत्-अग्लुञ्चीत् ॥ ञिफला विशरणे ॥

(सुबोधिनी)-म्रुचादेर्वा ङः ॥ म्रुचु म्लुचु ग्रुचु ग्लुचु ग्लुञ्चु इति म्रुचादयः॥ ञिफला विशरणे । विशरणमवयवानां विभागः ॥

(तॄफलभजत्रपां किति णादौ सेटि थपि चैत्वपूर्वलोपौ)

फेलतुः । फेलिथ ॥

(सुबोधिनी)-तॄफलभजत्रपां किति णादौ सेटि थपि चैत्वपूर्वलोपौ । तरतेरकारस्य गुणशब्देन भावितत्वात् फलभजोस्तु वैरूप्यसंपादकादेशत्वात् त्रपतेश्च एकहसमध्यस्थत्वाभावादप्राप्ते विधिः । तेरतुः । तेरुः । फेलतुः । फेलुः । भेजतुः । भेजुः । त्रेपे । त्रेपाते ॥

ऌान्तस्य ऌसमीपाकारस्य सौ नित्यं वृद्धिः ॥ अफालीत् ॥

फल निष्पत्तौ । फेलतुः । अफालीत् ॥ चर गतिभक्षणयोः । अचारीत् ॥ जि जये ॥

(सुबोधिनी)-ऌान्तस्य ऌसमीपाकारस्य सौ नित्यं वृद्धिः ॥ अतो हसादेरिति विकल्पस्यापवादः ॥ ऌान्तस्य किम्। अल्पीत्।अरणीत्। अत्र ऌसमीपत्वेऽपि ऌान्तत्वाभावान्न नित्यं वृद्धिः ॥ ऌसमीपाकारस्य किम् । श्वल्ल आशुगमने । अश्वल्लीत्।अत्र अस्य ऌसमीपत्वेऽपि अनन्यऌसमीपत्वाभावान्न वृद्धिः॥जि जये । जय उत्कर्षप्राप्तिः । अकर्मकोऽयम् ॥

(तत्त्वदी०)-ऌान्तस्येति॥ऌान्तस्य किम् । अल्पीत् । अरणीत् । अत्र ऌसमीपत्वेऽपि ऌान्तत्वाभावान्न ॥ ऌसमीपाकारस्य किम् । श्वल्ल आशुगमने ह्रस्वस्य अश्वल्लीत् । अत्र

ऌसमीपत्वेऽपि । अन्त्यलसमीपत्वाभावात् । अतो हसादेरिति प्राप्तविकल्पस्यापवादः । जि जय इति ॥ जय उत्कर्षप्राप्तिः ॥

(सपरोक्षयोर्जेर्गिः) जिगाय, जिग्यतुः, जिग्युः । जिगयिथ-जिगेथ । जीयात् । अजैषीत् ॥ कृष विलेखने । कर्षति । चकर्ष । चकर्षिथ ॥

(सुबोधिनी)-सपरोक्षयोर्जेर्गिः ॥ जेर्गिः स्यात् सप्रत्यये णवादौ च । द्वित्वनिमित्तयोरिति व्याख्येयम् । तेन यङ्लुगंताज्जेर्गादेशो न जेजयांचकारेत्यत्र ॥ कृष विलेखने । विलेखनमाकर्षणम् ॥

(तत्त्वदी०)-सपरोक्षयोरिति ॥ परोक्षशब्देन तदर्थकणवादिग्रहः । द्वित्वनिमित्तयोरिति ...येयम् । यथाश्रुतव्याख्याने तु यङ्लुगंताज्जेर्गादेशः स्यात् ॥

झसे दृशाम् ॥ दृशसृजकृषमृषतृपदृपसृपां झसेऽरो रो रश्च ॥

(...)-रारो झसे दृशाम् ॥ अश्च आश्च तयोः समाहारः अं तेन ...य अरः । अरः स्याने आरः स्थाने च रो भवति । तेन द्रक्ष्यति ...उभयत्रापि गुणवृद्धिस्थाने र आदेशः सिध्यति । बहुवचनं त्वाद्यर्थम् । ...गे । सृज विसर्गे । कृष विलेखने । मृश आमर्शने । स्पृश स्पर्शने । तृप ... दृप हर्षमोहनयोः । सृप्लृ गतौ ॥

(कृषादीनां वा) क्रष्टा-कर्ष्टा ॥

(सुबोधिनी)-कृषादीनां वा ॥ कृषादीनां षण्णां तु वाऽरः स्थाने रः ॥

षढोः कः से ॥ धातोः षढयोः कत्वं स्यात्से परे ॥

क्रक्ष्यति-कर्क्ष्यति । अक्राक्षीत्-अकार्क्षीत् ॥

(सुबोधिनी)-षढोः कः से । धातोरित्यनुवृत्तम् ॥ से किम् । क्रष्टा ॥ षढोः किम् । त्रप्स्यति ॥ धातोः किम् । लिट्सु ॥

(तत्त्वदी०)-षढोःकःसे इति ॥ धातोरिति ॥ अत्र धातुग्रहणस्यानुवर्तनं विधेयम् । तेन धातोरेव धातोर्न तु नामत्वविशिष्टस्यापि । अतो लिट्सु इत्यत्र नातिप्रसङ्गः । न चात्र क्ययः बाधकत्वं तदपवादकत्वादस्य । न चात्र नामत्वेन धातुत्वमिति भणितव्यम् । तेन तदभावात् ॥

(कृषमृषस्पृशमृशतृपदृपां वा सिः)हशषान्तात्सक् ॥ हान्ताच्छान्तात्षान्तान्नाम्युपधादनिटः सक्प्रत्ययः स्याद्द्व्यादिपरो न तु दृशेः ॥ सेरपवादः । अकृक्षत ॥ सृप्लृ गतौ । सर्पति । स्रप्ता-सर्प्ता । असृपत् ॥ क्रुश आह्वाने रोदने च । क्रोशति । क्रोष्टा । अक्रुक्षत् ... शिष हिंसायाम् ॥

(सुबोधिनी)-धिन्विकृण्व्योर्वस्य लोपो गुणाभावः उप्रत्ययश्चाब्रविषये ॥ आभ्यामुप्रत्ययः स्यात् धातोर्वकारस्य लोपो गुणाभावश्च चतुर्षु । अपोऽपवादः ॥ धिवि प्रीणने। कृवि हिंसायाम् । नूप इति गुणे धिनोति ॥

ओर्म्मोर्वा लोपः ॥ असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा वमयोः॥धिन्वः-धिनुवः, धिन्मः-धिनुमः । मिपि तु गुणो बाधकः । धिनोमि ॥

(सुबोधिनी)-ओर्म्मोर्वा लोपः ॥ उकारः प्रत्ययावयवः प्रत्ययरूपश्च गृह्यते ओर्वाहेरित्यतो वेत्यनुवृत्तम् । तस्यासंयोगपूर्वस्य प्रत्ययस्येत्यर्थः॥प्रत्ययोकारस्य किम् । युवः । युमः ॥ असंयोगपूर्वस्य किम्॥शक्नुवः। तक्ष्णुमः॥धिनोमीत्यत्र परत्वाद्गुणः ॥

(तत्त्वदी०)-ओर्म्मोर्वा लोप इति ॥ ओर्वाहेरित्यतो वेत्यनुवर्त्य व्यवस्थया संयोगपूर्वप्रत्ययोकारलाभः । उकारश्च प्रत्ययस्तदवयवश्च ॥

ओर्वा हेः ॥ असंयोगपूर्वात्प्रत्ययोकाराद्धेर्लोपो वा भवति ॥धिनु-धि, तात् ॥कृवि हिंसाकरणगतिषु । कृणोति । कृण्वन्ति । चकृण्व ॥ अक्षू व्याप्तौ । (अक्षेर्वा नुप्रत्ययोऽब्विषये) अक्ष्णोति । अक्ष्णुवंति । अक्षति । आनक्षिथ-आनष्ठ । अक्षिता-अष्टा । अक्षिष्यति-अक्ष्यति । आक्षीत्, आक्षिष्टाम् । आक्षीत्, आष्टाम्, आक्षुः । तक्ष त्वक्षू तनूकरणे ॥

(सुबोधिनी)-ओर्वा हेः॥वेति न विकल्पार्थं किं तु प्रत्ययसंबन्धिनोऽसंयोगपूर्वादित्यस्यार्थस्य प्रतिपादनार्थम् । उःप्रत्ययरूपः प्रत्ययावयवश्च गृह्यते ॥प्रत्ययसंबन्धिनः किम् । युहि । रुहि । असंयोगपूर्वात्किम् । शक्नुहि ॥अक्षू व्याप्तौ । व्याप्तिः कात्स्न्यम् । अक्षेर्वा नुप्रत्ययोऽब्विषये । अक्षेर्नुप्रत्ययो वा स्यात् चतुर्षु ।अपोऽपवादः लटि स्कोरिति कलोपः । षढोः कः से इति कः।षत्वम् ।अक्ष्यति ।लुङि ऊदित्त्वादेट् आक्षीत् । आक्षिष्टाम् । इडभावपक्षे तु आक्षीत्।झसादिति सिलोपे आष्टाम्, आक्षुः॥

(तत्त्वदी०)-ओर्वाहेरिति॥वाशब्दोऽत्र न विकल्पार्थः किंतु व्यवस्थार्थः तत्फलं तूक्तमेव।

(तक्षेस्तनूकरणे नुर्वाऽब्विषये) तक्ष्णोति-तक्षति वा काष्ठम् ततक्षिथ-ततष्ठ । अतक्षीत्, अतक्षिष्टाम् । अताक्षीत्, अताष्टाम् ॥ तनूकरणे किम् । वाग्भिः संतक्षति । भर्त्सयतीत्यर्थः ॥ णिक्ष चुम्बने । प्रणिक्षति । निक्षति ॥ ग्लै म्लै हर्षक्षये ॥

(सुबोधिनी) तक्षेस्तनूकरणे नुर्वाऽब्विषये ॥ तनूकरणेऽर्थे तक्षेर्नुप्रत्ययो वा चतुर्षु । अपोऽपवादः । ग्लै म्लै हर्षक्षये । हर्षक्षयो धातुक्षयः ॥

(सुबोधिनी)-कृषमृषस्पृशमृशतृपदृपां वा सिः ॥ एभ्यो वा सिः स्यात् पक्षे हशषान्तात्सक् ॥ तृपदृपभ्यां षादित्वात्तु ङः हशषान्तात्सक् । अनिटोऽनामिवत इत्यनुवृत्तम् ॥ हशषान्तात्किम् । अतिप्त । नाम्युपधात्किम् । अगाढ ॥ अनिटः किम् । औहिष्ट॥दृशेस्तु अद्राक्षीत् । हश्च शश्च षश्च हशषाः।ते अन्ते यस्य स तस्मात् । अत्रान्तग्रहणं चिन्त्यम् । हशषादिति पाठ्यम् । तेन च धातोर्विशेषणादन्तलाभः ॥

(तत्त्वदी०)-हशषान्तात्सगिति ॥ हश्च शश्च षश्च ते अन्ते यस्य स तस्मात् । अत्र अनिटोऽनामिवत इति पूर्वसूत्रान्नामिवत इत्यनुवर्त्य स च विशेषार्थतया विवक्षणान्नाम्युपधात्वलाभः। इत्यभिप्रेत्याह-नाम्युपधादिति ॥ तेन स्तृंहेरस्ताक्षीदित्येव रूपमिति बोध्यम् । हशषादित्येव युक्तं धातोर्विशेषणत्वेनान्तलाभात् ॥

(इषुसहलुभरिषरुषामनपि तस्येड्वा) रेषिता-रेष्टा । रोष्टा-रोषिता । अशिक्षत् ॥ उष गतौ । ओषति । ओषाञ्चकार-उवोष ॥ मिह सेचने ॥

(सुबोधिनी)-इषुसहलुभरिषरुषामनपि तस्येड्वा ॥ इषु इच्छायाम् । षह मर्षणे । लुभ गार्ध्ये । रुष रिष हिंसायामेभ्यः परस्य तकारस्य इड्वा भवति अनपि परे ॥ विदद्दरिद्रेत्याम् । उपधाया लघोरिति गुणः । ओषांचकार । असवर्णे स्वरे इत्युव् । उवोष ॥ मिह सेचने । सेचनमार्द्रीकरणम् ॥

ढि ढो लोपो दीर्घश्च॥ ढे परे ढस्य लोपः पूर्वस्य चानृतो दीर्घः । मेढा । षढोः कः से । अमिक्षत् ॥ दह भस्मीकरणे । देहिथ-ददग्ध । धक्ष्यति । अधाक्षीत्, झसात् अदाग्धाम् ॥ इवि व्याप्तौ । इन्वति । इन्वांचकार । ऐन्वीत्॥हिवि दिवि धिवि जिवि प्रीणने। हिन्वति॥

(सुबोधिनी)-ढि ढो लोपो दीर्घश्च ॥ अनृतः किम् ऊर्गृढात् ॥ हो ढ इति ढत्वम् । तथोर्ध इति तस्य धः । ष्टुभिः ष्टुः इति ढः । ढलोपे मेढा । हशषान्तात् इति सक् । अमिक्षत् ॥ हिवि दिवि धिवि जिवि प्रीणने । प्रीणनं तर्पणम् । इदितो नुमिति नुम् । हिन्वति ॥

(तत्त्वदी०)--ढि ढोलोप इति ॥ वान्यत्रेत्यतो वानुवृत्तेर्व्यवस्थयाऽनृतः पूर्वस्येति बोध्यम् । ढ्रि ढ्रो लोपो दीर्घश्चेति सुवचम् । एवं च रिलोपो दीर्घश्चेति न सूत्रणीयम् ॥ प्रीणन इति ॥ प्रीणन वृत्ति,तर्पण च ॥

(धिन्विकृण्व्योर्वस्य लोपो गुणाभाव उप्रत्ययश्चाग्विषये) विकरणस्य नुप्रत्ययस्योप्रत्ययस्य च गुणो भवति पिति परे ॥ धिनोति ॥

)–इस्यालोपः ॥ आदन्तस्य धातोरातो लोप उसि परे ॥

१ ५८। भूतमात्रे दिवादिपरो ङो वा द्वित्वं च)आतोऽनपि ॥ अदधत् ॥ दृशिर् प्रेक्षणे ॥

(सुबोधिनी)–धेटो भूतमात्रे दिवादिपरो ङो वा द्वित्वं च ॥ धेटो ङप्रत्ययो वा स्याद्द्वित्वं च ङुङि ।सिरपवादः॥पक्षे यमिरमिनमातामिति सक्।अधासिव ॥ शाछेति सिलोपे अधात् ॥ दृशिर् प्रेक्षणे । प्रेक्षणं दर्शनम् ॥

दृशादेः पश्यादिः॥ चतुर्ष्वपि दृशऋसृशदयदम्राघ्राध्मास्नादाणूस्थां पश्यऋच्छधौशीयसीदपिवजिघ्रधममनयच्छतिष्ठाः ॥ पश्यति ॥ ददर्श, ददृशतुः ॥

(सुबोधिनी)–दृशादेः पश्यादिः ॥ दृशिर् प्रेक्षणे । ऋ गतौ । सृ गतौ । शद्लृ शातने । षद्लृ विशरणादौ। पा पाने।पा रक्षणे इति तु न गृह्यते लुग्विकरणत्वात् । घ्रा गन्धोपादाने । ध्मा शब्दाग्निसंयोगयोः। म्ना अभ्यासे। दाण् दाने ।ष्ठा गतिनिवृत्तौ । एषामेकादशानां यथासंख्यमेकादश पश्यादय आदेशा भवन्ति अप्रत्यये परे ॥

(तत्त्वदी०)–दृशादेः पश्यादिरिति॥पा पाने इत्यस्यैव ग्रहणं न तु पा रक्षणेइत्यस्यापि लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति केचित्। तन्न ।न्यायेन सिद्धौ साहचर्यस्यातिकत्वात् ॥

(सृजिदृशोस्थपो वेट्) ददर्शिथ–दद्रष्ठ । द्रष्टा । अद्राक्षीत्, अद्राष्टाम् ॥

(सुबोधिनी)–सृजिदृशोस्थपो वेट्॥कादेणादेरिति नियमान्नित्ये प्राप्ते विभाषेयम् । लुटि इरितो वेति ङः ॥

(ऋवर्णदृशोऽङि गुणः)अदर्शत् ॥ ऋ गतौ । ऋच्छति । आर्च्छत् ॥

(सुबोधिनी)–ऋवर्णदृशो गुणः॥ऋवर्णान्तस्य धातोर्दृशेश्च गुणः स्यात् ङप्रत्यये ॥ ङभावे अनिटोऽनामिवत इति वृद्धिः । ततो रारो झसे दृशामित्यागेर: अत उपधाया इति पुनर्वृद्धौ अद्राक्षीत् ॥

॥ अनपि ॥

नी)-संध्यक्षराणामा ॥ संध्यक्षरान्तानां धातूनामा अनपि॥ धातोः गोभ्याम् । नौभ्याम् ॥

। णब् डौ ॥ आदन्ताद्धातोः परो णब् डौ ॥ जग्लौ ॥

)-आतो णब् डौ ॥ आत इति धातोर्विशेषणात्तदन्तविधिः । काररूपाच्च धातोः परो णब् डौ स्यात् अइवाचचारीति औ ॥

०)-आतो णब् डाविति ॥धातोर्विशेषणत्वात्तदन्तलाभ इत्यभिप्रेत्याह-आद् ॥ आदन्तादाकाररूपाच्चेति बोध्यम् । णवित्यत्रानुबन्धद्वयग्रहणम् । प्रथमपुरुषबहुवचने तिमसं ...णाय डित्करणम्। आतो युग्वारणाय णित्त्वं वा स्यानिवत्त्वात् तज्ज्ञापकं ...मेव । नित्यत्वात्प्रथमप्राप्तोऽपि युक् सावकाशन्यायेन वारितः ॥

आतोऽनपि ॥ धातोरातो लोपोऽनपि क्ङिति स्वरे इटि च ॥ जग्लतुः जग्लिथ-जग्लाथ ॥

(सुबोधिनी)-आतोऽनपि॥आत इति योगविभागात् सेटि थपि चेति लब्धम्॥

(तत्त्वदी०)-आतोऽनपि ॥ आत इति योगविभागात्सेटि थपि चेत्यस्य लाभः ॥

(संयोगादेरादन्तस्य कितिलिङ्येकारो वा) ग्लायात्-ग्लेयात्। अग्लासीत् ॥ कै गै रै शब्दे । जगौ ॥

(सुबोधिनी)-संयोगादेरादन्तस्य किति लिङ्येकरो वा ॥ संयोगादेरादन्तस्य धातोरेत्वं वा किति लिङि ॥

दादेरे ॥ अपिदाधामागेहाक्पिबतिसोस्थामात एकारो भवत्याशीर्यादादौ ये ॥ गेयात्। अगासीत् । स्त्यै ष्ट्यै शब्दसंघातयोः । स्त्यायति । तस्त्यौ। स्त्यायात्-स्त्येयात् । अस्त्यासीत् ॥ दैप् शोधने । ददौ । दायात् । अदासीत्॥धेट् पाने । दधौ। धेयात् । अधासीत् । सिलोपपक्षे । अधात् । अधाताम् ॥

(सुबोधिनी)-दादेरे ॥ इह दारूपास्त्रयः । डुदाञ् दाने । दाण दाने । दो अवखण्डने । देङ् रक्षणे गृह्यते लिङि कित्त्वासंभवात् ॥ धारूपौ द्वौ । डुधाञ् धारणपोषणयोः । धेट् पाने । दाश्च दाश्च दाश्च दाः धाश्च धाश्च धौ दाश्च धौ च दाधा इति विग्रहः । दाप् लवने । दैप् शोधने । एतौ पित्त्वात् न ग्राह्यौ ॥ मा माने।माङ् मेङौ नेह गृह्येते लिङि कित्त्वासंभवात्।गै शब्दे । गाङ् गताविति तु न गृह्यते लिङि कित्त्वासंभवात् ॥ ओहाक् त्यागे । पा पाने। षोऽन्तकर्मणि। ष्ठा गतिनिवृत्तौ।एषामेत्वं किति लिङि । देयात् । धेयात्। मेयात्। हेयात् । पेयात्। अवसेयात्। स्थेयात्॥ किति किम् । दासीष्ट ।

द्रादेरित्यत्रदादेरित्यतोदादेरित्यस्यानुवृत्त्यैवासिद्धेऽत्रदादेरितिग्रहणसामर्थ्यादे-
पे इति॥ एतदप्युक्तयुक्तेर्लभ्यते ष्ट्यै स्त्यै इति।अत्र वासुदेवः नामधातुष्व-
युक्तवान्तद्भाष्यविरुद्धम्।पृथक्पाठस्तु तिष्ट्यासति अतिष्ट्यासदित्यत्रपत्वार्थः॥

पः) अधुः ॥

-इस्यालोपः ॥ आदन्तस्य धातोरातो लोप उसि परे ॥

[illegible] ५८। भूतमात्रे दिवादिपरो डो वा द्वित्वं च)आतोऽनपि ॥
अदधत् ॥ दृशिर् प्रेक्षणे ॥

(सुबोधिनी)-धेटो भूतमात्रे द्विवादिपरो डो वा द्वित्वं च॥ धेटो
डप्रत्ययो वा स्यात्द्वित्वं च छुडि ।सिरपवादः॥यमिरमिनमातामिति सक्।अधा-
सीत् ॥ शाछेति सिलोपे अधात् ॥ दृशिर् प्रेक्षणे । प्रेक्षणं दर्शनम् ॥

दृशादेः पश्यादिः॥ चतुर्ष्वपि दृशऋसृशद्पदपाघ्राध्माम्नादाणृ-
स्थां पश्यऋच्छधौशीयसीदपिबजिघ्रधममनयच्छतिष्ठाः ॥ पश्य-
ति ॥ ददर्श, ददृशतुः ॥

(सुबोधिनी)-दृशादेः पश्यादिः ॥ दृशिर् प्रेक्षणे । ऋ गतौ । सृ गतौ ।
शद्लृ शातने । पद्लृ विशरणादौ। पा पाने।पा रक्षणे इति तु न गृह्यते लुग्विकरण-
त्वात् । घ्रा गन्धोपादाने । ध्मा शब्दाग्निसंयोगयोः। म्ना अभ्यासे। दाण दाने ।ष्ठा
गतिनिवृत्तौ । एषामेकादशानां यथासंख्यमेकादश पश्यादय आदेशा भवन्ति अप्-
प्रत्यये परे ॥

(तत्त्वदी०)-दृशादेः पश्यादिः [illegible] न तु [illegible]
[illegible]
[illegible] ॥

(सृजिदृशोरमपो वेट्) दद्रष्ठिथ-दद्रष्ट । द्रष्टा । अद्राक्षीत्,
अद्राक्षात् ॥

(सुबोधिनी)-सृजिदृशोरमपो वेट्॥ [illegible]
मः । [illegible] ॥

(ऋवर्णदृशोर्ङे गुणः) [illegible] । ऋ गतौ । [illegible] । [illegible] ॥

(सुबोधिनी)-[illegible]
[illegible] ॥ [illegible]
[illegible]

(गुणोर्तिसंयोगाद्योः ॥ अर्तेः संयोगादेर्ऋदन्तस्य च गुणो यकि यङि किति णादावाशीर्यादादौ च ये ॥ आरतुः, आरुः ॥

(सुबोधिनी)-गुणोर्तिसंयोगाद्योः ॥ अर्त्तीतिभ्वादिह्वाद्योर्ग्रहणम्। लुका निर्देशः सौत्रस्तन्निर्देशो यङ्लुङ्निवृत्त्यर्थः। व्याख्यानात् ऋत इति लभ्यते।तच्च संयोगादित्वेन विशिष्यते। तेन अर्तेः संयोगादेःऋदन्तस्य च धातोर्गुणः यग्यङोः परयोः कितोर्लिङ्लिङोश्च ॥ संयोगादेरिति किम्। क्रियात् ॥

(तत्त्वदी०) गुणोर्तिसंयोगाद्योरिति॥अर्तिश्च संयोगादिश्च तौ तयोः॥ऋदन्तस्य चेति ॥ अर्तिसाहचर्यादेवैतल्लभ्यते ॥

(अत्त्यर्तिव्ययतीनां थपो नित्यमिट्)आरिथ।अर्यात् ।अर्ता । अरिष्यति । आरिष्यत् ॥

(सुबोधिनी)-अत्त्यर्तिव्ययतीनां थपो नित्यमिट्॥अद भक्षणे।ऋ गतौ । व्येञ्संवरणे । स्वरान्तादत्वतश्चेति विकल्पे प्राप्ते विधिः ॥

(सर्तिशास्त्यर्तिभ्यो ङो लुङि सेरपवादः)स्वरादेः। आरत्, आरताम् । अर्तेर्ह्वादेरिति केचित् । आर्षीत्, आर्ष्टाम् ॥ सृ गतौ । धावति । अधावत् । शीघ्रगतावेवायम् । अन्यत्र सरति । ससार, सस्रतुः । ससर्थ । सस्रुव, सस्रुम ॥

(सुबोधिनी)-सर्तिशास्त्यर्तिभ्यो ङो लुङि ॥ इह लुका निर्देशात् सर्त्यर्ती जौहात्यादिकावेव गृह्येते । तेन भ्वाद्योर्न ङ इति केचित् ॥ शासु अनुशिष्टौ। अस्यैव ग्रहणं न तु आङः शासु इच्छायामित्यस्य।परस्मैपदिसर्त्यर्तिभ्यां साहचर्यात परस्मैपदिनः शासेर्ग्रहणात् क्रादेरिति नेट् । ससर्थ। सस्रुव ॥

(तत्त्वदी०)-शीघ्रगतावेवेति ॥ एतच्च विदो नवानामित्यतो वेत्यस्यानुवृत्तेर्व्यवस्थया बोध्यम् ॥

यादादौ॥ये या दौ धातोः ऋतो रिङ् भवति ङो व्यवधानार्थस्तेन ये इति न दीर्घः ॥ स्रियात् । सर्ता । सरिष्यति । असरत्, असरताम्॥स्रु गतौ । स्रवति।अस्रवत्।सुस्राव, सुस्रुवतुः।सुस्रोथ। स्रूयात । स्रोता ॥

(सुबोधिनी)-यादादौ॥ ये धातोर्ऋतो रिङ् स्यात् किति लिङि ॥ ङकारोऽन्त्यादेशार्थो न किं तु मध्यव्यवधानार्थः ॥

(तत्त्वदी०)-ङो व्यवधानार्थ इति ॥ न त्वन्त्यादेशार्थः । धातोरविकारान्यर्थानिर्दिष्टत्वेनैतल्लाभात् । व्यवधानफलमाह-तेनेति ॥

(श्रिस्रुद्रुभ्यो ङो धातोश्च द्वित्वं लुङि सेरपवादः) असुस्रुवत् ॥ द्रु गतौ । दुदविथ-दुद्रोथ । द्रोता । आद्रौषीत् ॥ द्रवति । दुद्रोथ । दुद्रुव । अदुद्रुवत् ॥ श्रु श्रवणे ॥

(सुबोधिनी)–श्रिस्रुद्रुभ्यो ङो धातोश्च द्वित्वं लुङि ॥ एभ्यो ङप्रत्ययः स्यादेषां द्वित्वं च लुङि न तु सिः ॥

(श्रुवः शृआदेशो नुप्रत्ययश्चाव्विषये) नृपः । शृणोति । शृणोमि । ओम्मोर्वा लोपः । शृणुवः–शृण्वः, शृणुमः–शृण्मः । शृणुयात् । शुश्राव । श्रूयात् । अश्रौषीत् ॥ शद्लृ शातने ॥

(सुबोधिनी)–श्रुवः शृआदेशो नुप्रत्ययश्चाव्विषये श्रुवो ॥ नुप्रत्ययः स्यात् धातोः शृ इत्यादेशश्च चतुर्षु । अपोऽपवादः । षद्लृ शातने । शातनं विशीर्णता ॥

(तत्त्वदी०)–शातन इति ॥ विशीर्णतायामित्यर्थः ॥

(शीयादेशे आत्) शीयते । अशीयत । शशाद । शेदिथ–शशत्थ । शत्ता । अशदत् ॥ षद्लृ विशरणगत्यवसादनेषु । सीदति ॥

(सुबोधिनी)–शीयादेशे आत् ॥ शदेरात्मनेपदं भवति शीयादेशे कृते सति । षद्लृ विशरणगत्यवसादनेषु । विशरणमवयवानां विभागः । अवसादो नाशः ॥

(सदिस्वञ्जोर्लिटि परस्य न पः) निषसाद । सत्ता । सत्स्यति । असदत् ॥ पा पाने । पिबति । पपौ । पेयात् । पाता । पास्यति । दादेः पे । अपात् ॥ घ्रा गन्धोपादाने जिघ्रति । जघ्रौ । घ्रेयात् । घ्रायात् । घ्रास्यति । अघ्रासीत्–अघ्रात् ॥ ध्मा शब्दाग्निसंयोगयोः । धमति । दध्मौ । ध्मेयात्–ध्मायात् । अध्मासीत् ॥ ष्ठा गतिनिवृत्तौ । तिष्ठति तस्थौ । दादेरे । स्थेयात् ॥ म्ना अभ्यासे । मनति । मम्नौ । म्नायात्- म्नेयात् । अम्नासीत् ॥ दाण् दाने । यच्छति । ददौ । देयात् । अदात् ॥ ह्वृ कौटिल्ये । ह्वरति । जह्वार । गुणोर्ति-संयोगाद्योः । जह्वरतुः ॥

(सुबोधिनी)–सदिस्वञ्जोर्लिटि परस्य न पः ॥ द्वित्वात्परस्यैतयोः सस्य षो न लिटि । अड्द्वित्वव्यवधानेऽपीति प्राप्तो निषेधः ॥ लिटि किम् । निषिषत्सति । पिबतीत्यत्र पिबादेशोऽदन्तः । अदे इत्यलोपः । अत एवोपधाया लघोरिति गुणो न । अकारयुक्तोच्चारणसामर्थ्याद्वा ॥ घ्रा गन्धोपादाने । गन्धोपादानं गन्धग्रहणम् । गाच्छासेति वा सिलुक् । पामिध्मादीत्यकौ । अघ्रात्–अघ्रासीत् ॥ ध्मा शब्दाग्निसंयोगयोः । शब्दशब्देन वंशादिकरणो वायुरिह गृह्यते । वेणुं शङ्खं धमतीति मृदङ्गं धमतीति प्रयोगो न । अग्निसंयोगे सुवर्णं धमति अग्निना संयुनक्तीत्यर्थः । म्ना

(गुणोर्त्तिसंयोगाद्योः ॥ अर्तेः संयोगादेर्ऋदन्तस्य च गुणो यकि यङि किति णादावाशीर्यादादौ च ये ॥ आरतुः, आरुः ॥

(सुबोधिनी)-गुणोर्त्तिसंयोगाद्योः ॥ अर्त्तीति भ्वादिह्लाद्योर्ग्रहणम्। लुका निर्देशस्तु सौत्रिस्तन्निर्देशो यङ्लुङ्निवृत्त्यर्थः। व्याख्यानात् ऋत इति लभ्यते। तच्च संयोगादित्वेन विशिष्यते। तेन अर्तेः संयोगादेः ऋदन्तस्य च धातोर्गुणः यग्यङोः परयोः कितोर्लिङ्लिङोश्च ॥ संयोगादेरिति किम्। क्रियात् ॥

(तत्त्वदी०) गुणोर्त्तिसंयोगाद्योरिति॥ अर्तिश्च संयोगादिश्च तौ तयोः॥ ऋदन्तस्य चेति ॥ अर्तिसाहचर्यादेवैतल्लभ्यते ॥

(अत्त्यर्तिव्ययतीनां थपो नित्यमिट्) आरिथ। अर्यात्। अर्ता। अरिष्यति। आरिष्यत् ॥

(सुबोधिनी)-अत्त्यर्तिव्ययतीनां थपो नित्यमिट्॥ अद भक्षणे। ऋ ग... व्ञ संवरणे। स्वरान्तादत्वतश्चेति विकल्पे प्राप्ते विधिः ॥

(सर्तिशास्त्यर्तिभ्यो ङो लुङि सेरपवादः) स्व... आरताम्। अर्तेर्ह्लादेरिति केचित्। आर्षीत्, ... धावति। अधावत्। शीघ्रगतावेवायम्। ... सस्रतुः। ससर्थ। सस्रिव, सस्रिम ॥

(सुबोधिनी)-सर्तिशास्त्यर्तिभ्यो ङो लुङ ॥ ... जौहोत्यादिकावेव गृह्येते। तेन भ्वाद्योर्न ङ इति केचित् ॥ शासु अ... ग्रहणं न तु आङः शासु इच्छायामित्यस्य। ... पादिनः शासेर्ग्रहणात् ऋादेरिति नेट्। ...

(तत्त्वदी०)-... वातोर... ...न्त्सीत् ॥ तॄफलेत्येत्वपूर्वलोपौ। तेरतुः। ...

ऋत इर् ॥ ऋकारस्य इर् भव...

(सुबोधिनी)-ऋत इर् ॥ धातोर्ऋ... य्वोर्वीति दीर्घः। तीर्यात् ॥

ईटो ग्रहाम् ॥ ग्रहादीनामिट ईव...

(सुबोधिनी)-ईटो ग्रहाम् ॥ ग्रहादेः ... मिति बहुवचनेन वक्ष्यमाणव्यवस्था ॥

(तत्त्वदी०)-न तु णादाविति ऊदितो वेत्य...

(वृङ्वृञ्ऋदन्तानां वा) तरिता-त...

पते । तितेपे । तेपिषीष्ट । अतेपिष्ट ॥ ष्टिपृ । स्तेपते । तिष्टिपे । तेपिषीष्ट ॥ ष्टेपृ । स्तेपते । तिष्टेपे । स्तेपिषीष्ट ॥ जभीजृभि गात्रविनामे । (रधिजभोः स्वरे नुम्) जम्भते । अजम्भिष्ट ॥ जृम्भते । जजृम्भे ॥ ष्टुभ स्तम्भे । विष्टोभते । तुष्टुभे । स्तोभिता । स्तोभिषीष्ट ॥ क्षमूष् सहने । क्षमते चक्षमे । चक्षमिषे—चक्षंसे ॥

मो नो धातोः॥ मान्तस्य धातोर्मकारस्य नः स्यात् झसे पदान्ते वमयोश्च ॥ चक्षमिवहे—चक्षण्वहे। चक्षमिमहे—चक्षण्महे । अक्षमिष्ट-अक्षंस्त ॥ क्नूयी शब्दे उन्दे च । क्नूयते । अक्नूयिष्ट॥ क्ष्मायी विधूनने । क्ष्मायते । चक्ष्माये । अक्ष्मायिष्ट ॥ स्फायी ओप्यायी वृद्धौ । स्फायते । पस्फाये । अस्फायिष्ट । प्यायते ॥

(सुबोधिनी)—स्वजतेर्णादेर्वा कित्त्वम्॥ स्वजतेः परस्य लिटो वा कित्त्वं भवति। सदिस्वञ्जोरिति परस्य न षः । परिषस्वजे । झसादिति सिलोपः । अस्वङ्क्त॥तृफलभजत्रपामित्येत्वपूर्वलोपौ । त्रेपे । ऊदितो वेति वेट् । त्रप्सीष्ट—त्रपिषीष्ट।लुङि झसादिति सिलोपः।अत्रप्त॥तिपृतेपृ ष्टिपृ ष्टेपृ क्षरणे।आद्योऽनिट्।क्षीरस्वामी त्वयं सेडिति बभ्राम। ऋादेर्णादेरिति नित्यमिट् । तितिपिषे। सिस्योःउपधाभूतस्य नामिनो गुणो नानिटि सिप्रत्यये सीष्टादौ च परे । लुङि झसादिति सिलोपः । अतिप्त॥जभी जृभि गात्रविनामे। गात्रस्वेदे इत्यर्थः । ईदित्त्वात् आदीदित इति क्तक्तवत्वोर्नेट् । रधिजभोःस्वरे नुम् । एतयोर्नुमागमःस्यात् स्वरे ॥ रध हिंसायाम् ।ञिप्रत्यये तु रन्धयतीत्यत्र ञिनिमित्ता प्राप्ति वृद्धिर्नित्येन नुमा बाध्यते । स्वरे किम् । रद्धा। जब्धा॥ष्टुभ स्तम्भे ।स्तम्भो निरोधः ॥ क्षमूष् सहने । षकारः षिद्भिदादिभ्योऽङ् इत्यङ्प्रत्ययार्थः । मो नो धातोरिति मस्य नः । अवकुप्वन्तरेऽपीति णत्वम् । चक्षण्वहे ॥ क्नूयी शब्दे उन्दे च। उन्दः क्लेदनमार्द्रीभाव इत्यर्थः ॥

(तत्त्वदी०)—परिषस्वजे इति। कित्त्वान्नलोपः । सदिस्वञ्जोरिति परस्य षत्वनिषेधः ॥ त्रप्सीष्टेति ॥ ऊदितो वेति वेट् ॥ चक्षण्महे इति॥इटभावपक्षे वमयोश्चेति मस्य नत्वम् ॥ क्नूयी शब्दे उन्दे चेति ईदित्त्वं क्तक्तवतोरिडभावार्थम् ।

(लिड्यङोः प्यायः पी) पिप्ये ॥

(सुबोधिनी)—लिड्यङोः प्यायः पी ॥ लिटि यङि च प्यायः पी । आदौ परत्वात् पीभावे पश्चात् पीशब्दस्य द्वित्वे कृते नुधातोरिति यः । पिप्ये । यङि पेपीयते ॥

(तत्त्वदी०)—पिप्ये इति ॥ [illegible] पुनः [illegible] द्वित्वम् । [illegible] ॥

(श्वयतेरितो लोपो ङे) अश्वत् ॥

(सुबोधिनी)-श्वयतेरितोलोपो ङे॥श्वयतेरिकारस्य लोपःस्यात्ङप्रत्यये।अश्वत्॥

(श्वयतेर्ङे द्वित्वं वा एरलोपः) अशिश्वियत् ॥ घस्लृ अदने । घसति । घसेत् । घस्ता । घत्स्यति।अघत्स्यत्॥इति पप्रक्रिया ॥

(सुबोधिनी)--श्वयतेर्ङे द्वित्वं वा एरलोपः ॥श्वयतेर्वा द्वित्वं भवति इकारस्य लोपाभावश्च ङे परे । नुधातोरितीय्। अशिश्वियत् ॥ इति सुबोधिन्यांपप्रक्रिया॥

(तत्त्वदी०)--श्रीविशालनगरस्थायिलोकेशकरशर्मणा। कृतायां दीपिकायां हि परस्मैपदपूरणम्॥

इति तत्त्वदीपिकायां पप्रक्रिया ॥

एध वृद्धौ ॥ एधते । एधांचक्रे ॥

(सुबोधिनी)--एध वृद्धौ ॥ अकारोऽनुदात्त आत्मनेपदार्थः ॥

(तत्त्वदी०)--एध वृद्धाविति ॥ अकारोऽनुदात्त आत्मनेपदार्थः ॥

(आमो भ्वसोर्नात्कर्तरि) एधामास । एधांबभूव । ऐधिष्ट ॥ ईक्ष दर्शनांकनयोः । ईक्षांचक्रे । ऐक्षिष्ट ॥ ष्वष्क गतौ । ष्वष्कते । ष्वष्किषीष्ट । अष्वष्किष्ट ॥ वेष्ट वेष्टने । विवेष्टे ॥ चेष्ट चेष्टायाम् । अचेष्टिष्ट ॥ ऋज गतौ स्थैर्ये च । अर्जते । आनृजे । आर्जिष्ट । ष्वञ्ज परिष्वङ्गे । स्वजते ॥

(सुबोधिनी)--आमो भ्वसोर्नात्कर्तरि ॥ आम्प्रत्ययान्तात्परयोर्भ्वसोः कर्तर्यर्थे आत्मनेपदं न भवति । भावकर्मणोस्त्वात्मनेपदमेव । नामधातुष्वष्कष्ठिवामिति सत्वाभावः । ष्वष्कते ॥ आनृजे इत्यत्र द्वित्वम्। हसादिः शेषः।र इत्यत्वम् । आभ्वोरित्यात्वम् । नुगशामिति नुक् ॥ ष्वञ्ज परिष्वङ्गे। परिष्वङ्गःआलिङ्गनम्।अपि रञ्जेति नलोपः ॥

(तत्त्वदी०)--नात्कर्तरीति॥आत् आत्मनेपदम् । कर्तरीत्युक्तेर्भावादात्मनेपदमेव॥ष्वष्केति।नामधातुष्वष्कष्ठिवामिति सत्वनिषेधः॥ आनृजे इति॥ द्वित्व हसादिः शेषः र इत्यत्वम्। आभ्वोरित्यात्वम् । नुगशामिति नुक् ॥

(स्वजतेर्णादेर्वा कित्त्वम्) सदिस्वञ्जोर्लिटि परस्य नषः ॥ परिषस्वञ्जे-परिषस्वजे ।स्वङ्क्षीष्ट । स्वङ्क्ता । स्वङ्क्ष्यते । अस्वङ्क्त, अस्वङ्क्षाताम् । पर्यष्वङ्क्त-पर्यस्वङ्क्त॥ त्रपूष् लज्जायाम् । त्रपते त्रेपे । ऊदितो वा । त्रपिषीष्ट-त्रप्सीष्ट । अत्रपिष्ट-अत्रप्त ॥तिपृ तेपृ ष्टिपृ ष्टेपृ क्षरणे । तेपते । तितिपे । तिप्सीष्ट । अतिप्त ॥ तेपृ । ते-

१--नाऽय सर्वत्रेति लक्ष्यानुसारिणी व्यवस्था,यत्र लिंग वचन चास्ति तत्रैवास्य प्रयोगः ॥

पते । तितेपे । तेपिषीष्ट । अतेपिष्ट ॥ ष्टिपृ । स्तेपते । तिष्टिपे । तेपिषीष्ट ॥ ष्टेपृ । स्तेपते । तिष्टेपे । स्तेपिषीष्ट ॥ जभीजृभि गात्रविनामे । (रधिजभोः स्वरे नुम्) जम्भते । अजम्भिष्ट ॥ जृम्भते । जजृम्भे ॥ ष्टुभ स्तम्भे । विष्टोभते । तुष्टुभे । स्तोभिता । स्तोभिषीष्ट ॥ क्षमूष् सहने । क्षमते चक्षमे । चक्षमिषे–चक्षंसे ॥

मो नो धातोः ॥ मान्तस्य धातोर्मकारस्य नः स्यात् झसे पदान्ते वमयोश्च ॥ चक्षमिवहे–चक्षण्वहे। चक्षमिमहे–चक्षण्महे । अक्षमिष्ट-अक्षंस्त ॥ क्नूयी शब्दे उन्दे च । क्नूयते । अक्नूयिष्ट॥ क्ष्मायी विधूनने । क्ष्मायते । चक्ष्माये । अक्ष्मायिष्ट ॥ स्फायी ओप्यायी वृद्धौ । स्फायते । पस्फाये । अस्फायिष्ट । प्यायते ॥

(सुबोधिनी)–स्वजतेर्णादेर्वा कित्त्वम्॥ स्वजतेः परस्य लिटो वा कित्त्वं भवति। सदिस्वञ्जोरिति परस्य न षः । परिषस्वजे । झसादिति सिलोपः । अस्वङ्क्त॥तृफलभजत्रपामित्येत्वपूर्वलोपौ । त्रेपे । ऊदितो वेति वेट् । त्रप्सीष्ट–त्रपिषीष्ट।लुङि झसादिति सिलोपः।अत्रप्त॥तिपृतेपृ ष्टिपृ ष्टेपृ क्षरणे।आद्योऽनिट्।क्षीरस्वामी स्वयं सेडिति बभ्राम। क्रादेर्णादेरिति नित्यमिट् । तितिपिषे। सिस्योःउपधाभूतस्य नामिनो गुणो नानिटि सिप्रत्यये सीष्टादौ च परे । लुङि झसादिति सिलोपः । अतिप्त॥जभी जृभि गात्रविनामे। गात्रखेदे इत्यर्थः । ईदित्त्वात् आदीदित इति क्तक्तवत्वोर्नेट् । रधिजभोःस्वरे नुम् । एतयोर्नुमागमःस्यात् स्वरे ॥ रध हिंसायाम् ।ञिप्रत्यये तु रन्धयतीत्यत्र ञिनिमित्तापि वृद्धिर्नित्येन नुमा बाध्यते । स्वरे किम् । रद्धा। जब्धा॥ष्टुभ स्तम्भे ।स्तम्भो निरोधः ॥ क्षमूष् सहने । षकारः षिद्भिदादिभ्योऽङ् इत्यङ्प्रत्ययार्थः । मो नो धातोरिति मस्य नः । अवकुप्वन्तरेऽपीति णत्वम् । चक्षण्वहे ॥ क्नूयी शब्दे उन्दे च। उन्दः क्लेदनमार्द्रीभाव इत्यर्थः ॥

(तत्त्वदी०)–परिषस्वजे इति। कित्त्वान्नलोपः । सदिस्वञ्जोरिति परस्य षत्वनिषेधः । त्रप्सीष्टेति ॥ ऊदितो वेति वेट् ॥ चक्षण्महे इति॥इडभावपक्षे वमयोश्चेति मस्य नत्वम् ॥ क्नूयी शब्दे उन्दे चेति ईदित्त्वं क्तक्तवतोरिडभावार्थम् ।

(लिड्यङोः प्यायः पी) पिप्ये ॥

(सुबोधिनी)–लिड्यङोः प्यायः पी ॥ लिटि यङि च प्यायः पी । आदेशे परत्वात् पीभावे पश्चात् पीशब्दस्य द्वित्वे कृते नुधातोरिति यः । पिप्ये । यङि पेपीयते ॥

(तत्त्वदी०)–पिप्ये इति ॥ [illegible] ॥

(श्वयतेरितो लोपो ङे) अश्वत् ॥

(सुबोधिनी)-श्वयतेरितोलोपो ङे॥श्वयतेरिकारस्य लोपःस्यात्ङप्रत्यये।अश्वत्॥

(श्वयतेर्ङे द्वित्वं वा एरलोपः)अशिश्वियत् ॥ घस्लृ अदने।

घसति । घसेत् । घस्ता । घत्स्यति।अघत्स्यत्॥इति पप्रक्रिया ॥

(सुबोधिनी)--श्वयतेर्ङे द्वित्वं वा एरलोपः ॥श्वयतेर्वा द्वित्वं भवति इकारस्य लोपाभावश्च ङे परे । नुधातोरितीय्। अशिश्वियत् ॥ इति सुबोधिन्यांपप्रक्रिया॥

(तत्त्वदी०)--श्रीविद्यानगरस्थायिलोकेशकरशर्मणा। कृतायां दीपिकायां हि परस्मैपदपूरणम्॥

इति तत्त्वदीपिकाया पक्रिया ॥

एध वृद्धौ ॥ एधते । एधांचक्रे ॥

(सुबोधिनी)--एध वृद्धौ ॥ अकारोऽनुदात्त आत्मनेपदार्थः ॥

(तत्त्वदी०)--एध वृद्धाविति ॥ अकारोऽनुदात्त आत्मनेपदार्थः ॥

(आमो भ्वसोर्नात्कर्तरि)एधामास। एधांबभूव । ऐधिष्ट ॥

ईक्ष दर्शनांकनयोः । ईक्षांचक्रे । ऐक्षिष्ट ॥ ष्वष्क गतौ। ष्वष्कते । ष्वष्किषीष्ट । अष्वष्किष्ट ॥ वेष्ट वेष्टने । विवेष्टे ॥ चेष्ट चेष्टायाम् । अचेष्टिष्ट ॥ ऋज गतौ स्थैर्ये च । अर्जते । आनृजे। आर्जिष्ट । ष्वञ्ज परिष्वङ्गे । स्वजते ॥

(सुबोधिनी)--आमो भ्वसोर्नात्कर्तरि ॥ आम्प्रत्ययान्तात्परयोर्भ्वसो कर्त्रर्थे आत्मनेपदं न भवति । भावकर्मणोस्त्वात्मनेपदमेव । नामधातुष्वष्कष्ठिवामिति सत्वाभावः । ष्वष्कते ॥ आनृजे इत्यत्र द्वित्वम्। हसादिः शेषः।र इत्यत्वम्। आभ्वोरित्यात्वम् । नुगशामिति नुक् ॥ ष्वञ्ज परिष्वङ्गे। परिष्वङ्गःआलिङ्गनम्।अपि रञ्जेति नलोपः ॥

(तत्त्वदी०)--नात्कर्तरीति॥आत् आत्मनेपदम् । कर्तरीत्युक्तेर्भावादात्मनेपदमेव॥ष्वष्केति।नामधातुष्वष्कष्ठिवामिति सत्वनिषेधः॥ आनृजे इति॥ द्वित्व हसादिः शेषः र इत्यत्वम्। आभ्वोरित्यात्वम् । नुगशामिति नुक् ॥

(स्वजतेर्णादेर्वा कित्त्वम्)सदिस्वञ्जोर्लिटि परस्य नषः ॥ परिषस्वजे-परिषस्वजे ।स्वङ्क्षीष्ट । स्वङ्क्ता । स्वङ्क्ष्यते। अस्वङ्क्त, अस्वङ्क्षाताम् । पर्यष्वङ्क्त-पर्यस्वङ्क्त॥ त्रपूष् लज्जायाम् । त्रपते । ऊदितो वा । त्रपिषीष्ट-त्रप्सीष्ट । अत्रपिष्ट-अत्रप्त ॥तिपृ तेपृ क्षरणे । तेपते । तितिपे । तिप्सीष्ट । अतिप्त ॥ तेपृ । ते-

* ह्स्यानुसारिणी व्यवस्था,यत्र लिंग वचन चास्ति तमेवास्य प्रयोगः ॥

(मानादीनां पूर्वस्येतो दीर्घः) मीमांसते । वध निन्दायाम् । आदिजबानामिति भः। बीभत्सते ॥ पण व्यवहारे स्तुतौ च । पन च पणायति । स्तुतावेवायः । पणते । पणायांचक्रे। पेणे॥एवं पन् ॥ कमु कान्तौ ॥

(सुबोधिनी)–मानादीनां पूर्वस्येतो दीर्घः॥एषां पूर्वस्येकारस्य दीर्घःस्यात्। मान विचारणे। वध निन्दायाम् । दान आर्जवे । शान तेजने । इत्यादि । माने-र्जिज्ञासायां सः मीमांसते।जिज्ञासां करोतीत्यर्थः।वध निन्दायाम्। निन्दा परापवादः। वधेश्चित्तविकारे सः । आदिजबानामिति भः। खसे चपा इति तः । बीभत्सतेग्लानिं करोतीत्यर्थः ॥ पण व्यवहारे स्तुतौ च । पन च । क्रयविक्रयरूपो व्यवहारः । पनेरपि स्तुतावित्यनेन संबध्यते । पृथङ्निर्देशात् । पनिसाहचर्यात् पणेरपि स्तुतावेवायप्रत्ययः स्तुतावनुबन्धस्य केवले चरितार्थत्वादायप्रत्ययान्तादात्मनेपदं न भवति । पणायति। यत इत्यल्लोपे पणायांचकार । भट्टिस्तु व्यवहारेऽप्यायप्रत्ययं कृतवान् । "न चोपलेभे वणिजां पणायाम्" इति व्यवहारमित्यर्थः । आयान्तादङ्प्रत्यये आप्॥कमु कान्तौ । कान्तिरिच्छा॥ णिङभावे उदित्त्वात् क्त्वायामिड्विकल्पः।कमित्वा–कान्त्वा । क्तक्तव-त्वोस्तु क्वचिद्वेट् इति निषेधात् । कान्तः कान्तवान् ॥

(तत्त्वदी०)–पन चेति ॥ व्यवहारे स्तुताविति चार्थः ॥ पणायतीति। व्यवहारे पणते इत्यत्र चरितार्थत्वादनुबन्धस्यायप्रत्ययान्तत्वात् ॥

(कमेः स्वार्थे णिङनपि तु वा) कामयते । कामयांचक्रे।चकमे।

(सुबोधिनी)–कमेः स्वार्थे णिङनपि तु वा॥ कमेर्णिङ् स्याच्चतुर्षु नित्यमन्यत्र वा धात्वर्थे ॥

ञेरङ् द्विश्च ॥ ञ्यन्ताद्धातोः कर्तरि अङ् लुङि ॥ सेरपवादः । धातोश्च द्वित्वम् ॥

(सुबोधिनी)–ञेरङ् द्विश्च ॥ ञेरित्यस्य प्रत्ययत्वात्तदन्तलाभः । अप् कर्तरी-त्यतो मण्डूकप्लुत्या कर्तरीत्यनुवृत्तम्। ङकारोऽङि लघाविति विशेषणार्थः।अङि परे चकारात् ञ्यन्तस्य धातोर्द्वित्वम् । तच्च नित्यत्वात् ञिलोपे कृते प्रवर्त्तते ॥ कर्तरि किम् । अकारयिषातां घटौ कुलालेन ॥

(तत्त्वदी०)–ञेरङ् द्विश्च ॥ अस्य प्रत्ययत्वात्तदन्तलाभः।अप् कर्तरीत्यतो मण्डूकप्लुत्या कर्तरीत्यनुवर्तते ॥ कर्तरि किम् । अकारयिषातां घटौ कुलालेन। अत्राहुः। ङकारोऽङि लघाविति विशेषणार्थः । चकारस्य वाक्यभेदेन व्याख्यानात् । श्रिश्रुद्रुभ्यो ङः क्वचिद्विकल्पेनेत्यादि । अत्रेदं वक्तव्यम् । अशिश्रियदित्यादौ ङकारस्य गणप्रतिषेधार्थतया दृष्टत्वेनान्यार्थतायां अन्याय्यत्वात् । अचूचुरदित्यादौ तु ह्रस्वविधिसामर्थ्यादेव न ॥

(दीपजनबुधपूरितायिप्यायिभ्यो वा इण् तनि कर्तरि सेरपवादः)

(सुबोधिनी)-दीपजनबुधपूरितायिप्यायिभ्यो वा इण् तनि कर्तरि सेरपवादः ॥ दीपी दीप्तौ । जनी प्रादुर्भावे । बुध अवगमने।पूरी आप्यायने।एते दिवादयः ॥ ताय् संतानपालनयोः । ओप्यायी वृद्धौ।एतौ भौवादिकौ॥एभ्य इण् प्रत्ययो वा स्यात् कर्त्रर्थे तनि परे सेरपवादः ॥

(तत्त्वदी०)-दीपजनेति ॥ अत्र पण्डिताः। दीपपूरादिभिरात्मनेपदिभिः साहचर्यात् बुध बोधने बुध जनने इति परस्मैपदिनो न ग्रहणम्।तेनाभ्या कर्मव्यतिहारे आत्मनेपदे तनि न भवति॥

लुक् ॥ इणः परस्य तनो लुक् ॥ अप्यायि-अप्यायिष्ट ॥ ताय् संतानपालनयोः । तताये । अतायिष्ट ॥ वल वल्ल संवरणे।वलते। वल्लते ॥टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ । भ्रेजे-बभ्राजे । भ्राश्यते-भ्राशते । भ्रेशे-बभ्राशे। भ्लाश्यते।भ्लाशते। भ्लेशे-बभ्लाशे॥ तिज निशाने क्षमायां च ।गुप्भ्यः। तितिक्षते । तितिक्षांचक्रे ॥ गुप् गोपनकुत्सनयोः । जुगुप्सते ॥ मान विचारणे ॥

(सुबोधिनी)-लुक्॥ इण् तनीत्यत्त इणीति तनीति चानुवृत्तम्।इणीति पञ्चम्या विपरिणमनीयं तनीति षष्ठ्या च । अप्यायि-अप्यायिष्ट॥ताय् संतानपालनयोः। संतानः प्रबन्धः॥टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ।दीप्तिस्तेजः ।फणिराजृभ्राजृ इत्येत्वपूर्वलोपौ । भ्रेजे-बभ्राजे । भ्राशृभ्लाशिति वा यप्रत्ययः । भ्राश्यते ॥ तिज निशाने । निशानं तीक्ष्णीकरणम्। गुप्भ्य इति तिजेः क्षमायां सः । तितिक्षते क्षमां करोतीत्यर्थः ॥ गुप गोपनकुत्सनयोः । गोपनं रक्षणम् । गुपेर्निन्दायां सः । जुगुप्सते । निन्दां करोतीत्यर्थः ॥

तत्त्वदी०)-लुक्॥अत्रेण् तन्यकर्तरीति पूर्वसूत्रादनुवृत्त तनीति षष्ठ्या विपरिणमनीयमिपञ्चम्या । तत्र षष्ठीनिर्देशादन्त्यलोपः।आदेरित्यस्यानुवृत्त्या आदेरपि लोप इति सूत्रपाठपक्षे। लुगिति पाठः । तत्र सर्वस्य तनो लुग्भवतीति।अत्रेदं वक्तव्यम्।अत्र तनीति नानुवर्त्यम्। स्य लुक् स्यात् इत्येव व्याख्येयम् ।तथा चेणः परस्यान्यस्याप्यभावात्तन एव लुग्भविष्यति रितरामित्यत्रातिप्रसङ्गः तत्रासिद्धत्वेन तन इण् परत्वाभावात् ॥ निशाने इति ॥ किरणम् ॥

। पूर्वस्यात इत्से ॥

)-यः से ॥ इ अः से इति पदच्छेदः । पूर्वस्येत्यनुवृत्तम् ॥ तपरः । यदन्तात्सः ॥

से इति ॥ इ अः से इति छेदः ॥

(मानादीनां पूर्वस्येतो दीर्घः) मीमांसते । वध निन्दायाम् । आदिजबानामिति भः। बीभत्सते ॥ पण व्यवहारे स्तुतौ च । पन च पणायति । स्तुतावेवायः । पणते । पणायांचक्रे। पेणे॥एवं पन् ॥ कमु कान्तौ ॥

(सुबोधिनी)–मानादीनां पूर्वस्येतो दीर्घः॥एषां पूर्वस्येकारस्य दीर्घः स्यात्। मान विचारणे। वध निन्दायाम् । दान आर्जवे । शान तेजने । इत्यादि । माने-र्जिज्ञासायां सः मीमांसते।जिज्ञासां करोतीत्यर्थः।वध निन्दायाम्। निन्दा परापवादः। वधेश्चित्तविकारे सः । आदिजबानामिति भः। खसे चपा इति वः । बीभत्सते।ग्लानिं करोतीत्यर्थः ॥ पण व्यवहारे स्तुतौ च । पन च । क्रयविक्रयरूपो व्यवहारः । पनेर्वि स्तुतावित्यनेन संबध्यते । पृथङ्निर्देशात् । पनिसाहचर्यात् पणेरपि स्तुतावेवायप्रत्ययः स्तुतावनुबन्धस्य केवले चरितार्थत्वादायप्रत्ययान्तादात्मनेपदं न भवति । पणायति। यत इत्यल्लोपे पणायांचकार । भट्टिस्तु व्यवहारेऽप्यायप्रत्ययं कृतवान् । "न चोपलेभे वणिजां पणायाम्" इति व्यवहारमित्यर्थः । आयान्तादङ्प्रत्यये आप्॥कमु कान्तौ । कांतिरिच्छा। णिङभावे उदित्त्वात् क्त्वायामिड्विकल्पः।कमित्वा–कान्त्वा । क्तक्तव-त्वोस्तु क्वचिदेदृ इति निषेधात् । कान्तः कान्तवान् ॥

(तत्त्वदी०)–पन चेति ॥ व्यवहारे स्तुताविति चार्थः ॥ **पणायती**ति। व्यवहारे पणते इत्यत्र चरितार्थत्वादनुबन्धस्यायप्रत्ययान्न त्वात् ॥

(कमेः स्वार्थे णिङनपि तु वा) कामयते । कामयांचक्रे।चकमे।

(सुबोधिनी)–कमेः स्वार्थे णिङनपि तु वा॥ कमेर्णिङ् स्याच्चतुर्षु नित्यम-नपि वा धात्वर्थे ॥

णेरङ् द्विश्च ॥ ण्यन्ताद्धातोः कर्तरि अङ् लुङि ॥ सेरपवादः । धातोश्च द्वित्वम् ॥

(सुबोधिनी)–णेरङ् द्विश्च ॥ णेरित्यस्य प्रत्ययत्वात्तदन्तलाभः । अप् कर्तरी-त्यतो मण्डूकप्लुत्या कर्तरीत्यनुवृत्तम्। ङकारोऽङि लघाविति विशेषणार्थः।अङि परे चकारात् ण्यन्तस्य धातोर्द्वित्वम् । तच्च नित्यत्वात् णिलोपे कृते प्रवर्त्तते ॥ कर्तरि किम् । अकारयिषातां घटौ कुलालेन ॥

(तत्त्वदी०)–णेरङ् द्विश्च ॥ अस्य प्रत्ययत्वात्तदन्तलाभः।अप् कर्तरीत्यतो मण्डूकप्लुत्या कर्तरीत्यनुवर्तते ॥ कर्तरि किम् । अकारयिषातां घटौ कुलालेन। अत्राहुः। ङकारोऽङि लघाविति विशेषणार्थः । चकारस्य वाक्यभेदेन व्याख्यानात् । श्रिश्रुद्रुम्यो ङः क्वचिद्विकल्पेनेत्यादि । अत्रेदं वक्तव्यम्। अशिश्रियदित्यादौ ङकारस्य गणप्रतिषेधार्थतया दृष्टत्वेनान्यार्थताया अन्याय्यत्वात् । स चूचुरदित्यादौ तु ह्रस्वविधिसामर्थ्यादेव न ॥

(दीपजनबुधपूरितायिप्यायिभ्यो वा इण् तनि कर्तरि सेरपवादः)

(सुबोधिनी)-दीपजनबुधपूरितायिप्यायिभ्यो वा इण् तनि कर्तरि सेरपवादः ॥ दीपी दीप्तौ । जनी प्रादुर्भावे । बुध अवगमने। पूरी आप्यायने। एते दिवादयः ॥ तायृ संतानपालनयोः । ओप्यायी वृद्धौ। एतौ भौवादिकौ॥ एभ्य इण् प्रत्ययो वा स्यात् कर्त्रर्थे तनि परे सेरपवादः ॥

(तत्त्वदी०)-दीपजनेति ॥ अत्र पाण्डिताः। दीपपूरादिभिरात्मनेपदिभिः साहचर्यात् बुध बोधने, बुध जनने इति परस्मैपदिनो न ग्रहणम्। तेनाभ्यां कर्मव्यतिहारे आत्मनेपदे तनि न भवति॥

लुक् ॥ इणः परस्य तनो लुक् ॥ अप्यायि-अप्यायिष्ट ॥ तायृ संतानपालनयोः । ततायें । अतायिष्ट ॥ वल वल्ल संवरणे। वलते। वल्लते ॥ टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ । भ्रेजे-बभ्राजे । भ्राश्यते-भ्राशते । भ्रेशे-बभ्राशे। भ्लाश्यते। भ्लाशते। भ्लेशे-बभ्लाशे॥ तिज निशाने क्षमायां च ।गुभ्यः। तिक्षते । तितिक्षांचक्रे ॥ गुप् गोपनकुत्सनयोः । जुगुप्सते ॥ मान विचारणे ॥

(सुबोधिनी)-लुक्॥ इण् तनीत्यत इणिति तनीति चानुवृत्तम्। इणिति पञ्चम्या विपरिणमनीयं तनीति षष्ठ्या च । अप्यायि-अप्यायिष्ट॥ तायृ संतानपालनयोः। संतानः प्रबन्धः॥ टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ। दीप्तिस्तेजः ।फणिराजृभ्राजृ इत्येत्वपूर्वलोपौ । भ्रेजे-बभ्राजे । भ्राशुभ्लाशिति वा यप्रत्ययः । भ्राश्यते ॥ तिज निशाने । निशानं तीक्ष्णीकरणम्। गुभ्य इति तिजेः क्षमायां सः । तितिक्षते क्षमां करोतीत्यर्थः ॥ गुप गोपनकुत्सनयोः । गोपनं रक्षणम् । गुपेर्निन्दायां सः । जुगुप्सते। निन्दां करोतीत्यर्थः ॥

(तत्त्वदी०)-लुक्॥ अत्रेण् तन्यकर्तरीति पूर्वसूत्रादनुवृत्त तनीति षष्ठ्या विपरिणमनीयमिणिति पञ्चम्या । तत्र-षष्ठीनिर्देशादन्त्यलोपः। आदेरित्यस्यानुवृत्त्या आदेरपि लोप इति सूत्रपाठपक्षे। क्वचित्तु लुगिति पाठः । तत्र सर्वस्य तनो लुग्भवतीति। अत्रेदं वक्तव्यम्। अत्र तनीति नानुवर्त्यम्। इणः परस्य लुक् स्यात् इत्येव व्याख्येयम् ।तथा चेणः परस्यान्यस्यासम्भवात्तन एव लुग्भविष्यति न चाकारितरामित्यत्रातिप्रसङ्गः तत्रासिद्धत्वेन तनः इण् परत्वाभावात् ॥ **निशाने** इति ॥ निशानं तीक्ष्णकिरणम् ॥

यः से ॥ पूर्वस्यात इत्से ॥

(सुबोधिनी)-यः से ॥ इ अः से इति पदच्छेदः । पूर्वस्येत्यनुवृत्तम् ॥ तपरः किम् । पापचिषति । यङन्तात्सः ॥

(तत्त्वदी०) यः से इति ॥ इ अः से इति छेदः ॥

(मानादीनां पूर्वस्येतो दीर्घः) मीमांसते । बध निन्दायाम् । आदिजबानामिति भः। बीभत्सते ॥ पण व्यवहारे स्तुतौ च । पन च पणायति । स्तुतावेवायः । पणते । पणायांचक्रे। पेणे॥एवं पन् ॥ कमु कान्तौ ॥

(सुबोधिनी)–मानादीनां पूर्वस्येतो दीर्घः॥एषां पूर्वस्येकारस्य दीर्घः स्यात्। मान विचारणे। बध निन्दायाम् । दान आर्जवे । शान तेजने । इत्यादि । मानेर्जिज्ञासायां सः मीमांसते।जिज्ञासां करोतीत्यर्थः।बध निन्दायाम्। निन्दा परापवादः। बधेश्चित्तविकारे सः । आदिजबानामिति भः। खसे चपा इति तः । बीभत्सते।ग्लानिं करोतीत्यर्थः ॥ पण व्यवहारे स्तुतौ च । पन च । क्रयविक्रयरूपो व्यवहारः । पनेरपि स्तुतावित्यनेन संबध्यते । पृथङ्निर्देशात् । पनिसाहचर्यात् पणेरपि स्तुतावेवायप्रत्ययः स्तुतावनुबन्धस्य केवले चरितार्थत्वादायप्रत्ययान्तादात्मनेपदं न भवति । पणायति। यत इत्यल्लोपे पणायांचकार । भट्टिस्तु व्यवहारेऽप्यायप्रत्ययं कृतवान् । "न चोपलेभे वणिजां पणायाम्" इति व्यवहारमित्यर्थः । आयान्तादङ्प्रत्यये आप्॥कमु कान्तौ । कान्तिरिच्छा॥ णिङभावे उदित्त्वात् क्त्वायामिड्विकल्पः।कमित्वा–कान्त्वा । क्तक्तवत्वोस्तु क्वचिद्वेट् इति निषेधात् । कान्तः कान्तवान् ॥

(तत्त्वदी०)–पन चेति ॥ व्यवहारे स्तुताविति चार्थः ॥ पणायतीति। व्यवहारे पणते इत्यत्र चरितार्थत्वादनुबन्धस्यायप्रत्ययान्त त्वात् ॥

(कमेः स्वार्थे णिङनपि तु वा) कामयते । कामयांचक्रे।चकमे।

(सुबोधिनी)–कमेः स्वार्थे णिङनपि तु वा॥ कमेर्णिङ् स्यात्चतुर्षु नित्यम-नपि वा धात्वर्थे ॥

णेरङ् द्विश्च ॥ ण्यन्ताद्धातोः कर्तरि अङ् लुङि ॥ सेरपवादः । धातोश्च द्वित्वम् ॥

(सुबोधिनी)–णेरङ् द्विश्च ॥ णेरित्यस्य प्रत्ययत्वात्तदन्तलाभः । अङ् कर्तरीत्यतो मण्डूकप्लुत्या कर्तरीत्यनुवृत्तम्। ङकारोऽटि लघाविति विशेषणार्थः।अटि परे चकारात् ण्यन्तस्य धातोर्द्वित्वम् । तच्च नित्यत्वात् णिलोपे कृते प्रवर्तते ॥ कर्तरि किम् । अकारयिषातां घटौ कुलालेन ॥

(तत्त्वदी०)–णेरङ् द्विश्च ॥ अस्य प्रत्ययत्वात्तदन्तलाभः।अङ् कर्तरीत्यतो मण्डूकप्लुत्या कर्तरीत्यनुवर्तते ॥ कर्तरि किम् । अकारयिषातां घटौ कुलालेन। अचक्रमत् । ङकारोऽटि [illegible] विशेषणार्थः । चकारस्य वाक्यभेदेन व्याख्यानात् । [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] न ॥

(अपिद्राधास्थामित्सेर्ङित्त्वमाति न तु दीङः)

(सुबोधिनी)-अपिद्राधास्थामित्सेर्ङित्त्वमाति न तु दीङः॥ एभ्यः परस्य सेर्ङित्त्वं भवति । एषामात् इच्च आत्मनेपदे लुङि ॥

लोपो ह्रस्वाज्झसे ॥ ह्रस्वात्परस्य सेर्लोपो झसे॥ अदित, अदिषाताम्॥ त्रायते। तत्रे। अत्रास्त ॥ ष्मिङ् ईषद्धसने । स्मयते । सिष्मिये । स्मेषीष्ट । स्मेता । अस्मेष्ट । डीङ् विहायसा गतौ । डयते । डिड्ये । अडयिष्ट ॥ द्युत दीप्तौ । द्योतते ॥

(सुबोधिनी)-लोपोह्रस्वाज्झसे ॥ सेः इति सूत्रमनुवृत्तम् ॥ ह्रस्वात्किम् । अनेष्टाम् ॥ झसे किम् । अकृषाताम् ॥ डीङ् विहायसा गतौ । आकाशेन गमने ॥

(तत्त्वदी०)-लोपो ह्रस्वाज्झसे ॥ लोपो ह्रस्वझसात्सेरित्येव सूत्रयितुमुचितम् । पृथक्करणस्य व्यर्थत्वात् ॥ डीङ् विहायसा गतौ ॥ विहायसा आकाशेनेत्यर्थः। 'वा तु पुंस्याकाशविहायसी' इत्यमरोक्तेः॥ विहायसामिति त्वपपाठः ॥

(द्युतेः पूर्वस्य संप्रसारणं स्वापेश्च) दिद्युते ॥

(सुबोधिनी)-द्युतेः पूर्वस्य संप्रसारणं स्वापेश्च ॥ द्युतेः पूर्वरूपस्य स्वापेश्च संप्रसारणं भवति । सस्वरयकारस्य इः॥

(द्युतादिभ्यो लुङि वा पं पे ङः) अद्युतत्-अद्योतिष्ट ॥ श्विता वर्णे । अश्वितत्-अश्वेतिष्ट॥ ञिष्विदा स्नेहनमोचनयोः । अश्विदत्-अश्वेदिष्ट ॥ ञिक्ष्विदा च । अक्ष्विदत्-अक्ष्वेदिष्ट ॥ ञिमिदा स्नेहने । अमिदत्-अमेदिष्ट॥ रुच दीप्तावभिप्रीतौ च । अरुचत्-अरोचिष्ट ॥ घुट परिवर्तने । अघुटत्-अघोटिष्ट ॥ रुट लुट लुठ प्रतिघाते । अरुटत्-अरोटिष्ट । अलुटत्-अलोटिष्ट ॥ अलुठत्-अलोठिष्ट ॥ शुभ दीप्तौ । अशुभत्-अशोभिष्ट ॥ क्षुभ संचलने । अक्षुभत्-अक्षोभिष्ट॥ णभ तुभ हिंसायाम् । नेभे । अनभत्-अनभिष्ट ॥ स्रंसु ध्वंसु भ्रंसु अवस्रंसने । अस्रसत्-अस्रंसिष्ट॥ ध्वंसु गतौ च । अध्वसत्-अध्वंसिष्ट ॥ स्रम्भु विश्वासे । अस्रभत्-अस्रम्भिष्ट ॥ वृतु वर्तने । वर्तते ॥

(सुबोधिनी)—तनादेस्तथासोर्वा सेर्लुक् ॥ तनादेः परस्य सेर्लुग् वा भवति तासि थासि च परे॥अतत-अतनिष्ट।षणु दाने । [illegible] तेन [illegible] संनन्ति, [illegible] । [illegible] सायात्-सन्यात्।असात-असनिष्ट । असाथाः-असनिष्ठाः॥क्षणु क्षि । हिंसायाम् ।

(सुबोधिनी)–झसादिति ढेर्द्धिः । क्षवे इति षस्य डत्वम् । ष्टुत्वम् । अनुस्वारपरसवर्णौ । शिणूढ्ढि हसात्परस्य झासस्येति डलोपे शिणड्ढि । लिन्तुषोदीर्घरिति ङःअशिषत् ॥ भञ्जो आमर्दने । ओदित्करणं ल्वाद्योदिति ञीत नत्वार्थम् । भग्नः ॥ भुज पालनाभ्यवहारयोः । भुजोऽपालने इत्यात्मनेपदं वक्ष्यते ॥

(तृहो नमि कृते इमागमः पिति हसे) तृणेढि । अतृणेट् । अतर्हीत् । इदितो नुम् ॥ नमः ॥ नम्प्रत्ययात्परस्य नस्य लोपः ॥ हिनस्ति, हिंस्तः, हिंसन्ति । धे सलोपः । हिन्धि । अहिनः । जिहिंस । अहिंसीत् ॥ उन्दी क्लेदने । उनत्ति, उन्तः, उंदन्ति, औनत् । औन्दन् । उन्दांचकार । औन्दीत् ॥ अञ्जू व्यक्तिम्लक्षणकान्तिगतिषु । अनक्ति । नुगशाम् । ऊदितो वा । आनञ्जिथ–आनङ्क्थ । अञ्जिता–अङ्क्ता ॥

(सुबोधिनी)–तृहो नमि कृते इमागमः पिति हसे ॥ तृहेः पूर्वं नम् । ततः इम् स्यात् पिति हसे परे ॥ नमः प्रकरणात्प्रत्ययस्य ग्रहणम् । उन्दी क्लेदने । क्लेदनमार्द्रीभावः । नम इति नलोपः । उनत्ति । उन्द्यात् । उनत्तु । औनत् । उन्दांचकार । उद्यात् । उन्दिष्यति । औन्दिष्यत् । औन्दीत् ॥ अञ्जू व्यक्तिम्लक्षणकान्तिगतिषु । व्यक्तिर्विवेचनम् । म्रक्षणं स्निग्धता । नुगशामिति नुक् आनञ्ज ॥

(तत्त्वदी०)–तृहो नमि कृते इति ॥ यद्येवं न स्यात्तर्हि येन नाप्राप्तन्यायेन मा नम् बाध्येत । अबाधने वा पूर्वमिमेव स्यादिति शङ्कानिवृत्त्येनमि कृतेइति । नमःप्रकरणन्यात्प्रत्ययस्यग्रहणम् ॥

(अञ्जेः सेर्नित्यमिट्) आञ्जीत् ॥ तञ्चू संकोचने । तनक्ति । अतञ्चीत् । अताङ्क्षीत् । ओविजी भयचलनयोः । विनक्ति ॥

(सुबोधिनी)–अञ्जेः सेर्नित्यमिट् ॥ अञ्जेः परस्य सिप्रत्ययस्य इडागम ऊदित्वाद्विकल्पे प्राप्ते इदम् ॥

(विजेरिडादिप्रत्ययो ङित्) विविजिथ । विजिता । अविजीत् ॥ वृजी वर्जने । वृणक्ति । अवर्जीत् ॥ पृची संपर्के । पृणक्ति । अपर्चीत् ॥ इति पम् ॥

(सुबोधिनी)–विजेरिडादिप्रत्ययो ङित् ॥ विजेः परस्य इट्सहितस्य प्रत्ययस्य ङित्त्वं स्यात् ॥ इति सुबोधिन्यां पम् ॥

ञिइन्धी दीप्तौ । इन्द्धे । इन्धीत । ऐन्द्ध । इन्धांचक्रे । ऐन्धिष्ट । खिद दैन्ये । खिन्ते । खित्सीष्ट । अखित्त ॥ विद विचारणे । विन्ते । वित्सीष्ट । अवित्त ॥ इति रुधादयः ॥

ऋषी गतौ । ऋषति । आनर्ष ॥ ओव्रश्चू छेदने । वृश्चति । वव्रश्च, वव्रश्चतुः,वव्रश्चुः । वव्रश्चिथ–वव्रष्ठ । व्रश्चिता–व्रष्टा । व्रश्चिष्यति–व्रक्ष्यति । अव्रश्चीत्–अव्राक्षीत्,अव्राष्टाम् ॥ व्यच् व्याजीकरणे । विचति । विव्याच, विविचतुः । विच्यात् । व्याचिता । व्यचिष्यति । अव्याचीत्–अव्यचीत् ॥ उछि उञ्छे । उञ्छति । उञ्छांचकार । औञ्छीत् ॥ उच्छी विवासे । उच्छति । उच्छांचकार । औच्छीत् ॥ ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु । ऋच्छति ॥

(सुबोधिनी)–तुगशामिति तुक्।आनर्श।ओव्रश्चू छेदने।ग्रहामिति संप्रसारणम्। वृश्चति ॥ लिटि णवादौ पूर्वस्येत्यनेन पूर्वरेफस्य ऋकारः।ततो न संप्रसारणे संप्रसारणमिति परिभाषया निषेधात्सकृत्सूत्रं प्रवर्तते इति न्यायाद्वा पुनर्वस्य संप्रसारणं न वव्रश्च । ऊदितो वेति वेट् । वव्रश्चिथ । स्कोरिति सलोपः । छशषेति षत्वं ष्टुत्वम् । वव्रष्ठ।ऊदितो वेतीटि अव्रश्चीत् ॥ इडभावे स्कोरिति सलोपः। छशषेति षत्वं षढोरिति कः । ततः सस्य षत्वम् । अव्राक्षीत् ॥ नन्वत्र शकारस्य कथं लोपः। उच्यते। "नकारजावनुस्वारपञ्चमौ झलि धातुषु।सकारजः शकारश्चे षाट्टवर्गस्तवर्गजः॥१॥"- इति । व्यच व्याजीकरणे । व्याजीकरणं छद्मकरणम् । ग्रहामिति संप्रसारणं णवादौ पूर्वस्येति पूर्वस्य संप्रसारणं च । विविचतुः। अतो हलादेरिति वा वृद्धिः।अव्याचीत्–अव्यचीत् ॥ उछि उञ्छे । उच्छी विवासे । स्वदेशं परित्यज्य देशान्तरे गमनं विवासः । संप्रति धातुपाठे इमौ भ्वादिगणे पठितौ । इह पुनः पाठस्तु उञ्छन्तीत्यत्र वाशीपोःशतुरिति नुमूविकल्पार्थः। अप्प्रत्यये तु अप्पयोर्नित्यमिति नित्यं नुम् । उञ्छन्ती ॥

(ऋच्छेर्नाम्) (ऋच्छेर्लिटि गुणः) तुगशाम्।आनर्च्छ,आनर्च्छतुः । ऋच्छिता ॥ उब्ज आर्जवे । उब्जांचकार ॥ उज्झ त्यागे । उज्झांचकार ॥ लुभ विमोहने । लुभति–लोभिता–लोब्धा । अलोभीत् ॥ तृप तृम्प तृफ तृम्फ तृप्तौ । तृपति । अतर्पीत् । (तृफादीनामप्रत्यये नुम्)तृम्फति॥तुप तुम्प तुफ तुम्फ हिंसायाम्।तुपति तुतोप।अतोपीत्। तुम्पति।अतुम्पीत् ।तुफति। तुतोफ । अतोफीत् । तुम्फति । तुतुम्फ । अतुम्फीत् ॥ दृप दृम्फ उत्क्लेशे। दृपति । दृम्फति ॥ ऋफ ऋम्फ हिंसायाम्।ऋफति । ऋम्फति । ऋम्फांचकार ॥ गुफ गुम्फ ग्रन्थे । गुफति । गुम्फति । अगुम्फीत् ॥ उभ उम्भ पूरणे । उभति । उवोभ । औभीत् । उम्भति । उम्भांचकार । औम्भीत् ॥ शुभ शुम्भ शोभार्थे । शुभति ।अशोभीत् । शुम्भति ।

(भ्रस्जो रसो रमनपि वा) बभर्ज-बभ्रज्ज, बभर्जतुः-बभ्रज्जतुः । बभर्जिथ-बभ्रज्जिथ-बभर्ष्ठ-बभ्रष्ठ । स्वरान्तादत्वतश्चेति वेट् । क्ङिति संप्रसारणं बाधकम् । भृज्ज्यात् । अभ्राक्षीत्-अभार्क्षीत् । अभ्रष्ट-अभर्ष्ट ॥ क्षिपप्रेरणे । क्षिप्सीष्ट । अक्षैप्सीत् । अक्षिप्त ॥ कृष विलेखने । कृक्षीष्ट । क्रष्टा-कर्ष्टा । अक्राक्षीत्-अकार्क्षीत् । अकृक्षत, अकृक्षाताम्, अकृक्षन्त ॥ मिल संगमे । मिलति । मिमिले । अमेलीत् । अमेलिष्ट ॥ मुचॢ मोचने । **मुचादेर्मुम् ॥**

मुचॢलुपॢविदॢलिपॢषिच्कृत्पिश्खिदामप्रत्यये मुम् ॥ मुञ्चति । मुक्षीष्ट । लित्पुषादेर्ङः । अमुचत् । अमुक्त ॥ लुपॢ छेदने । लुम्पति । लुलोप । लुप्सीष्ट । अलुपत् । अलुप्त ॥ विदॢ लाभे । विन्दति । अविदत् । अवेदिष्ट । अनिडयमित्येके । वेत्ता ॥ लिप उपदेहे । लिम्पति । लिपिसिचीति ङः । अलिपत् । अलिपत-अलिप्त ॥ षिच क्षरणे । सिञ्चति । सिषिचिषे । असिचत् असिचत-असिक्त ॥ इत्यात्पे ॥

(सुबोधिनी)–**भ्रस्जो रसो रमनपि वा** ॥ भृज्जे रेफस्योपधायाश्च स्थाने रमगमो वा स्यात् अनापि ॥ मित्वादन्त्यात् स्वरात्परो भवति ॥ स्थानषष्ठीनिर्देशात् रकारोपधयोर्निवृत्तिः। वभर्ज-वभ्रज्ज,वभर्जतुः-वभ्रज्जतुः । थपि वभर्जिथ । स्वरान्तादत्वतश्चेति वेट् । वभ्रज्जिथ । स्कोरिति सलोपः। छशषेति षः। वभर्ष्ठ-वभ्रष्ठ। आति । वभर्जे । वभ्रज्जे । क्ङिति रमागमं वाधित्वा संप्रसारणम् । भृज्ज्यात् । भर्क्षीष्ट-भ्रक्षीष्ट । भर्ष्टा-भ्रष्टा । भर्क्ष्यति--भ्रक्ष्यति । भर्क्ष्यते-भ्रक्ष्यते । अभर्क्ष्यत्-अभ्रक्ष्यत् । अभर्क्ष्यत--अभ्रक्ष्यत । अभार्क्षीत्--अभ्राक्षीत् । अभर्ष्ट--अभ्रष्ट ॥ कृष विलेखने । कृषादीनां वेति वा रः । क्रष्टा--कर्ष्टा । सिस्योरिति न गुणः । कृक्षीष्ट । कृषस्पृशमृशेति वा सिः । अनिटो नामिवत इति वृद्धिः। अक्राक्षीत्--अकार्क्षीत् । पक्षे हशषान्तादिति सक् । अकृक्षत् । सिस्योरिति न गुणः । अकृष्ट । साकि अकृक्षत । आति सको लोपःस्वरे इत्यलोपः। अकृक्षाताम् ॥ मिल संगमे । अस्मिन्नेव गणे परस्मैपदिषु मिल संश्लेषणे इति धातुपाठे पठ्यते इह तस्य पुनःपाठःकर्त्रर्यात्मनेपदार्थः । मिलति । मिलते । मुचादेर्मुम् । मुचॢ मोचने । लुपॢ छेदने । विदॢ लाभे । लिप उपदेहे । षिच क्षरणे । कृती छेदने । पिश अवयवे । खिद परिघाते । विदॢ व्याघ्रभूतिमते सेट्कः। वेदिता । भाष्यमते त्वनिट्कः । वेत्ता ॥ लिप उपदेहे । उपदेहो वृद्धिः । लिपिसिचीति ङः । अलिपत् । आति तु वा ङः । अलिपत । झसादिति सिलोपः । अलिप्त ॥ ॥ इत्यात्पे ॥

(तत्त्वदी०)–**रसोरिति** ॥ रश्च सु च रमौ तयोः । रेफसकारयोरादेशो भवतीत्यर्थः ॥

ऋषी गतौ । ऋषति । आनर्ष ॥ ओव्रश्चू छेदने । वृश्चति । वव्रश्च, वव्रश्चतुः, वव्रश्चुः । वव्रश्चिथ-वव्रष्ठ । व्रश्चिता-व्रष्टा । व्रश्चिष्यति-व्रक्ष्यति । अव्रश्चीत्-अव्राक्षीत्, अव्राष्टाम् ॥ व्यच् व्याजीकरणे । विचति । विव्याच, विविचतुः । विच्यात् । व्याचिता । व्यचिष्यति । अव्याचीत्-अव्यचीत् ॥ उछि उञ्छे । उञ्छति । उञ्छांचकार । औञ्छीत् ॥ उच्छी विवासे । उच्छति । उच्छांचकार । औच्छीत् ॥ ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु । ऋच्छति ॥

(सुबोधिनी)-तुगशामिति तुक्। आनर्श। ओव्रश्चू छेदने। ग्रहादामिति संप्रसारणम्। वृश्चति ॥ लिटि णवादौ पूर्वस्येत्यनेन पूर्वरेफस्य ऋकारः। ततो न संप्रसारणे संप्रसारणमिति परिभाषया निषेधात्सकृत्सूत्रं प्रवर्तते इति न्यायाद्वा पुनर्वस्य संप्रसारणं न वव्रश्च । ऊदितो वेति वेट् । वव्रश्चिथ । स्कोरिति सलोपः । छशषेति षत्वं ष्टुत्वम् । वव्रष्ठ। ऊदितो वेतीटि अव्रश्चीत् ॥ इडभावे स्कोरिति सलोपः। छशषेति षत्वं षढोरिति कः । ततः सस्य षत्वम् । अव्राक्षीत् ॥ नन्वत्र शकारस्य कथं लोपः। उच्यते। ‘नकारजावनुस्वारपञ्चमौ झलि धातुषु। सकारजः शकारश्चे षाट्टवर्गस्तवर्गजः॥१॥’ इति । व्यच व्याजीकरणे । व्याजीकरणं छद्मकरणम् । ग्रहादामिति संप्रसारणं णवादौ पूर्वस्येति पूर्वस्य संप्रसारणं च । विविचतुः। अतो हलादेरिति वा वृद्धिः। अव्याचीत्-अव्यचीत् ॥ उछि उञ्छे । उच्छी विवासे । स्वदेशं परित्यज्य देशान्तरे गमनं विवासः । संप्रति धातुपाठे इमौ भ्वादिगणे पठितौ । इह पुनः पाठस्तु उञ्छन्तीत्यत्र वाद्योपोःशतुरिति नुम्विकल्पार्थः। अप्प्रत्यये तु अप्यपोरान्नित्यमिति नित्यं नुम् । उञ्छन्ती ॥

(ऋच्छेर्नाम्) (ऋच्छेर्लिटि गुणः) तुगशाम्। आनर्च्छ, आनर्च्छतुः । ऋच्छिता ॥ उब्ज आर्जवे । उब्जांचकार ॥ उज्झ त्यागे । उज्झांचकार ॥ लुभ विमोहने । लुभति-लोभिता-लोब्धा । अलोभीत् ॥ तृप तृम्प तृफ तृम्फ तृप्तौ । तृपति । अतर्पीत । (तृफादीनामप्रत्यये नुम्) तृम्फति ॥ तुप तुम्प तुफ तुम्फ हिंसायाम् । तुपति तुतोप । अतोपीत । तुम्पति । अतुम्पीत । तुफति । तुतोफ । अतोफीत । तुम्फति । तुतुम्फ । अतुम्फीत ॥ दृप दृम्फ उत्क्लेशे । दृपति । दृम्फति ॥ ऋफ ऋम्फ हिंसायाम् । ऋफति । ऋम्फति । ऋम्फांचकार ॥ गुफ गुम्फ ग्रन्थे । गुफति । गुम्फति । अगुम्फीत ॥ उभ उम्भ पूरणे । उभति । उवोभ । औभीत । उम्भति । उम्भांचकार । औम्भीत ॥ शुभ शुम्भ शोभार्थे । शुभति । अशोभीत । शुम्भति ।

अशुम्भीत् ॥ दृभी ग्रन्थे । दृभति । अदर्भीत् ॥ चृती हिंसाग्रन्थनयोः । चृतति । नृतनृदच्चृतेत्तीड्वा । चर्तिष्यति-चर्त्स्यति । अचर्तीत् ॥ विध विधाने । विधति । वेधिता ॥ लिख अक्षरविन्यासे । लिखति । लेखिता ॥ कुट कौटिल्ये । कुटति । चुकोट ॥

(सुबोधिनी)-ऋच्छेर्नाम्॥ऋच्छतेराम् प्रत्ययो न लिटि ॥ गुरुनामित्यादाम्प्राप्ते निषेधः॥ ऋच्छेर्लिटि गुणः ॥ ऋच्छतेर्गुणः स्याल्लिटि॥ लुभ विमोहने । विमोहनमाकुलीकरणम् । इषसहेति वेट् । लोभिता-लोब्धा॥तृप तृम्फ तृप्तौ॥कृषस्पृशमृशेति सिविकल्पस्तु पौषादिकस्यैव ङस्यापवादत्वात् । तेनात्र नित्यं सिः।अतर्पीत् ॥तृम्फादीनामप्रत्यये नुम् । आदिशब्दः प्रकारे । तेन येऽत्र नकारानुषक्तास्ते तृम्फादयः । अप्रत्ययस्य ङित्त्वान्नो लोप इति नलोपे कृते नुम् । तृम्फति । दृप दृम्फ उत्क्लेशे उत्क्लेशः पीडा । चृती हिंसाग्रन्थनयोः । ईदित्करणमादीदित इतीण्निषेधार्थम्।यद्यप्यस्य वेट्कत्वादिण्निषेधः सिद्ध्यति तथापि क्वचिद्वेट् इत्यस्यानित्यतां ज्ञापयितुमीदित्करणम् । तेन 'धावितमिभराजधिया' इत्यादि सिद्धमिति ॥ नृतनृदेति वेट्। चर्त्स्यति ॥ विध विधाने । विधानं करणम् ॥ कुट कौटिल्ये । कुटिलस्य भावः कौटिल्यं तस्मिन् ॥

(तत्त्वदी०)-गुरुनामित्यादाम्प्राप्त इत्याह--ऋच्छेरिति॥ ह्रस्वच्छकारस्य द्वित्वे संयोगपरत्वाल्लघूपधत्वाभावाद्गुणाप्राप्तौ लिटि गुण इति ॥

(कुटादेर्ङिणब्र्जः प्रत्ययो ङित्) चुकुटिथ । कुटिता । अकुटीत् ॥ पुट संश्लेषणे । पुटति । पुपोट । अपुटीत् ॥ कुच संकोचने । कुचति । चुकोच । अकुचीत् ॥ गुज शब्दे । गुजति।गुजिता । अगुजीत्॥गुड रक्षायाम् । गुडति । गुडिता । अगुडीत् ॥ कुड शब्दे । कुडति । कुडिता ॥ डिप क्षेपे । डिपिता ॥ छुर छेदे । कुरुच्छुरोर्न दीर्घः ।छुर्यात् । छुरिता ॥ स्फुट विकसने । स्फुटति ॥ मुट आक्षेपप्रमर्दनयोः । मुटति । मुमोट । मुटिता ॥ त्रुट छेदे । त्रुट्यति--त्रुटति । तुत्रोट । त्रुटिता ॥ तुट कलहकर्मणि । तुटति तुटिता । तुटिष्यति ॥ चुट छुट छेदे । चुटिता। छुटति।छुटिता ॥ जुट बन्धने । जुटति । जुटिता ॥ कड मदे । कडति । अकडीत् ॥ लुठ संश्लेषणे । लुठति । लुठिता ॥ कुड घनत्वे । कुडिता ॥ कुड बाल्ये । कुडति ॥ पुड उत्सर्गे । पुडिता ॥ घुट प्रतीघाते । घुटिता ॥ स्फुर स्फुरणे । स्फुरिता ॥ स्फुल संचलने । स्फुलिता ॥

(सुबोधिनी)-कुटादेर्ङिणब्र्जः प्रत्ययो ङित् ॥ कुटादिगणात्परः प्रत्ययो ङित् स्यात् ञितं णितं च वर्जयित्वा ॥ ङित्त्वान्न गुणः । चुकुटिथ ॥ छुर छेदने ।

च्छोर्वि हसे इत्यनेन दीर्घे प्राप्ते कुरुच्छुरोरिति निषेधः। छुर्यात्॥ त्रुट छेदे। भ्राशभ्लाशेति वा यः। त्रुट्यति-त्रुटति॥ कडेर्धातुपाठे भ्वादौ पठितस्य पुनरत्र पाठः शतृप्रत्यये वादीपोरिति नुम्विकल्पार्थः। पूर्वपाठस्तु कडन्तीति नित्यनुमर्थः॥ कुड घनत्वे। घनत्वं सान्द्रता॥

(निर्निर्विभ्यः स्फुरतिस्फुलत्योः सस्य षो वा) निष्फुरति-निस्स्फुरति-निःस्फुरति। निष्फुरति-निस्फुरति। निष्फुलति। निस्स्फुलति-निःस्फुलति। निष्फुलति-निस्फुलति॥ णू स्तवने। अनुवीत्॥ धू विधूनने। अधुवीत्॥ गु पुरीषोत्सर्गे। जुगुविथ-जुगुथ। गूयात्। गुता॥ ध्रु गतिस्थैर्ययोः। ध्रुता। अध्रुषीत्॥ इति कुटादयः॥ कृती छेदने। मुचादेर्मुम्। कृन्तति। नृततृदचृतछृदकृत्योऽसेः सादेरिड्वा। कर्तिष्यति-कर्त्स्यति। अकर्तीत्॥ गॄ निगरणे॥

(सुबोधिनी)-निर्निर्विभ्यः स्फुरतिस्फुलत्योः सस्य षो वा॥ एभ्यः परस्यानयोः सस्य वा षत्वं भवति॥ णू दीर्घान्तः। 'परिणूतगुणोदयः' इत्यत्र क्ति इतीण्निषेधः। कुटादेरिति ङित्वान्न वृद्धिः। नुधातोरित्युव्। अनुवीत्॥ लोपो ह्रस्वादिति सिलोपः। अगुताम्। वृत्ताः। कुटादयः॥ कृती॥ मुचादेरिति मुम्। कृन्तति। नृततृदेति वेट्। कर्तिष्यति-कर्त्स्यति॥

(गिरतेः स्वरे रस्य लो वा) गिरति-गिलति। गरिता-गरीता-गलिता-गलीता। अगारीत्-अगालीत्॥ स्पृश स्पर्शने। स्प्रष्टा-स्पर्ष्टा। अस्प्राक्षीत्-अस्पार्क्षीत्-अस्पृक्षत्। प्रच्छ ज्ञीप्सायाम्। ग्रहां ज्विति च। पृच्छति। पप्रच्छिथ-पप्रष्ठ। अप्राक्षीत्॥ सृज विसर्गे। सृजति। सृजिदृशोरस्थपो वेट्। ससर्जिथ-सस्रष्ठ। स्रष्टा। अस्राक्षीत्॥ टुमस्जो शुद्धौ। मज्जति। मस्जिनशोर्झलि नुम्। ममज्जिथ-ममङ्क्थ। मङ्क्ता। अमाङ्क्षीत्॥ विच्छ॥ गतौ। आयः। विच्छायति। विच्छायांचकार-विविच्छ॥ इषु इच्छायाम्। गमां छः। इच्छति। इच्छेत्। इष्यात्। ऐच्छत्। इयेष। इयेषिथ। एषिता-एष्टा। ऐषीत्॥ विश प्रवेशने। वेष्टा। अविक्षत्॥ मृश आमर्शने। अम्राक्षीत्-अमार्क्षीत्-अमृक्षत्॥ रि पि गतौ। रियति। पियति। रेता। पेता॥ धि धारणे। धियति॥ क्षि निवासगत्योः। क्षियति॥ षू प्रेरणे। सुवति। सविता॥ कॄ विक्षेपे। किरति। चकार, चकरतुः, चकरुः।

(सुबोधिनी)–गिर०॥गिरतेः रेफस्य लत्वं वा स्यात् स्वरे परे ॥वृङ्वृञ्ऋदन्तानां वेति वा इटो दीर्घः ।गरिता–गरीता॥स्पृशकृषादीनां वेति वा रकारः ।छशषेति षत्वं ष्टुत्वम् । स्प्रष्टा–स्पर्ष्टा । कृषस्पृशेति वा सिः । अनिटो नामिवत इति वृद्धिः । अस्प्राक्षीत्–अस्पार्क्षीत् । पक्षे हशषान्तदिति सक् ।अस्पृक्षत् ॥ प्रच्छ ज्ञीप्सायाम् । ज्ञातुमिच्छा ज्ञीप्सा । वुण्प्रत्यये प्रच्छकः । षिद्भिदामङिति भिदादित्वादङ्प्रत्यये संप्रसारणे च पृच्छा । ततो ञिर्ङित्करणे इति ञ्यन्तात् वुण्प्रत्यये तु पृच्छकः । ग्रहामिति संप्रसारणम् । पृच्छति । ऋसंयोगादित्यकित्त्वान्न संप्रसारणम्॥ पप्रच्छतुः स्वरान्तादत्वत इति वेट् । पप्रच्छिथ–पप्रष्ठ । सृजिदृशोस्थपो वेति थपि वेट्।ससर्जिथ । रारो झसे दृशामिति रः। सस्रष्ठ ॥ टुमस्जो शुद्धौ । ट्वितोऽथुः । मज्जथुः । श्चुत्वेन सस्य शः । झवे जबा इति शस्य जः । मज्जति। मस्जिनशोरिति नुम् ।स्कोरिति स-लोपः ॥ मङ्क्ता॥ विच्छ ॥ तुदादिपाठसामर्थ्यादायप्रत्ययान्तादपि अः न त्वप् । तेन विच्छायन्तीति विच्छायतीत्यत्र वादीपोरिति नुम्विकल्पः । आय इत्यायप्रत्ययः। विच्छायति । आयादयोऽनपि वेति वा आयः। कासादिप्रत्ययादित्याम् । यत इत्य-लोपः। विच्छायांचकार ॥ इषु ॥ भाष्यवार्तिकमतेऽनुदित् । गमां छ इति छः। इच्छति । इषुसहेति वेट्। एषिता–एष्टा ॥ विश प्रवेशने ॥ हशषान्तादिति सक् । अविक्षत् ॥ मृश आमर्शने । आमर्शनं स्पर्शः । कृषस्पृशमृशेति वा सिः। कृषादीनां वेति वा रः । अम्राक्षीत्–अमार्क्षीत्। हशषान्तादिति सक्। अमृक्षत्॥रि पि। नुधातो-रितीय् । रियति । पियति ॥कॄ॥ ऋत इतीर्।किरति।ऋसंयोगादित्याकित्त्वाद्गुणः। चकरतुः । वृङ्वृञ्ऋदन्तानामिति वेटो दीर्घः । करिता–करीता ॥

(तत्त्वदी०)–गिरतेरिति व्यवस्थितविकल्पोऽयम् । तेन गल इति कण्ठे नित्य विधेस्तु गर इत्यत्र न ॥ प्रच्छ ॥अथ कथं'वक्तारं पृच्छकं श्रोतॄन्'इति ।प्रच्छकमित्येव पाठ इति बहवः। पृच्छकमिति पाठे तु भिदादेराकृतिगणत्वादङि.पृच्छा तत्करोतीति ञ्यन्ताद्वुणि बोध्यम्॥विच्छ॥ तुदादिपाठसामर्थ्यादायप्रत्ययान्तादपि अ एव न त्वप्।तेन विच्छायतीविच्छायन्ती त्यत्र वादीपोरिति नुम्विकल्पः ।किंचित्तु तुदादिपाठादिदमेव विकल्पयन्ति तन्मते तुदादिपाठस्य केवले विच्छती विच्छ-न्तीत्यत्र चरितार्थत्वादायप्रत्ययान्तादेव न त्वः । तेन विच्छायन्तीत्यत्र नित्यमेव नुम् ॥इषु॥ उदित्पाठस्तु भाष्यवार्तिकमतः॥ रियतीति॥रि अ ति इति स्थिते उपधाया लघोरिति गुणः प्राप्तो बहिरङ्गत्वान्निवारितः । तथा हि । इय् अकारापेक्षत्वेन अन्तरङ्गः अल्पाश्रितत्वात्। गुणस्तु अ-कारतिपेक्षत्वेन बहिरङ्गः बह्वपेक्षत्वात् ॥

(उपात्किरतेः सुट् छेदेऽर्थे)

(सुबोधिनी)–उपात्किरतेः सुट् छेदेऽर्थे ।।उपोपसर्गात् परस्य किरतेः सुडा-ः स्यात् छेदे वाच्ये नान्यत्र ॥

(हिंसायां प्रतेश्च) उपस्किरति। प्रत्यस्किरत् ॥ रुजो भङ्गे। अरौक्षीत्। अरौक्ताम् ॥ भुजो कौटिल्ये। भोक्ता। अभौक्षीत्, अभौक्ताम् ॥ छुप स्पर्शे। छोप्ता। अच्छौप्सीत्॥ रुश रिश हिंसायाम्। रोष्टा, रोष्टारौ। अरुक्षत् ॥ रेष्टा। अरिक्षत्॥ लिश गतौ। लेष्टा। अलिक्षत् ॥ खिद परिघाते। मुचादेर्नुम्। खिन्दति। खेत्ता। अखेत्सीत् ॥ पिश अवयवे। पिंशति। पेशिता ॥ इति पम् ॥ ॥ जुषी प्रीतिसेवनयोः। जुषते ॥ ओविजी भयचलनयोः। विजते ॥

(सुबोधिनी)-हिंसायां प्रतेश्च॥ उपात् प्रतेश्च किरतेः सुट् स्यात् हिंसायाम्। अड्भ्यासव्यवधानेऽपि सुट् कात्पूर्व इति वक्तव्यम् ॥ उपास्किरत्। उपचस्कार। 'उरोविदारं प्रतिचस्करे नखैः' इति माघः। कर्मणि लिट् ॥ लिश् गतौ। शल इगुपधादनिटः क्सः। अलिक्षत् ॥ मुचादेरिति नुम्। खिन्दति। अयं दैन्येऽपि। दिवादौ रुधादौ च वर्तते ॥ पिश अवयवे ॥ मुचादेरिति नुम्। पिंशति। अयं दीपनायामपि। 'त्वष्टा रूपाणि पिंशतु'। दीपयत्वित्यर्थः ॥ इति सुबोधिन्यां पम् ॥ ओविजी ॥ प्रायेणायमुत्पूर्वः। उद्विजते ॥

(विजेरिडादिप्रत्ययो ङित्) विजिता ॥ ओलजी ओलस्जी व्रीडे। लेजे। ललज्जे ॥ पृङ् व्यायामे ॥

(सुबोधिनी)-विजेरिडादिप्रत्ययो ङित्॥ विजेः पर इडादिः प्रत्ययो ङित्। इह ओविजी तुदादिः रुधादिश्च गृह्यते न तु विजिर् पृथग्भावे इति जुहोत्यादिः व्याख्यानात् ॥ पृङ् व्यायामे। प्रायेणायं व्याङ्पूर्वः ॥

अयकि ॥ ऋतो रिङ् भवत्यकारे प्रत्यये यकि च ॥ तुधातोः। व्याप्रियते। व्यापरिष्यते। व्यापृत, व्यापृषाताम् ॥ मृङ् प्राणत्यागे ॥

(सुबोधिनी)-अयकि ॥ निर्दिष्टत्वादकारस्यैवोपादानम् [illegible] व्यवधानार्थम्। तेन ये इति न दीर्घः ॥

(म्रियतेर्लुङ्लिङोश्च [illegible]) म्रियते। ममार। ममर्थ। मृषीष्ट। अमृत ॥ दृङ् आदरे। आद्रियते। आदद्रे। आदृषीष्ट। आदर्ता। आदृत ॥ धृङ् अवस्थाने। ध्रियते। अध्रियत। धर्ता। ह्रस्वादङ्गात्। अधृत ॥ इति तुदादयः ॥

(सुबोधिनी)-म्रियतेर्लुङ्लिङोश्च [illegible] ॥ [illegible]

(तत्त्वदी०)–खच इति॥भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः॥खच्नातीति॥स्तोः श्चुभिश्चुरिति श्चः ॥

(खवो वस्य औ ने) खौनाति । हिठ्णाति ॥ इति पम् ॥

वृङ् संभक्तौ । वृणीते । वव्रे । वरिषीष्ट–वृषीष्ट । अवरिष्ट–अवृत ॥ ॥ इति क्र्यादयः ॥

(सुबोधिनी)–खवो वस्य औ ने खवेर्धातोर्वकारस्य औत्वम् भवति नाप्रत्यये परे ॥ परत्वादौत्वे हसान्तत्वाभावात् हसादान इति न। खौनीहि। ष्टुत्वम्। हिठ्णाति ॥ ॥ इति पम् ॥ वृङ् संभक्तौ ॥संभक्तिर्भजनम् । क्रादेरिति नेट्। वव्रे॥वृङ्वृञ्ॠदन्तात्सिस्योरिड् वा । वरिषीष्ट–वृषीष्ट । वृङ्वृञ्ॠदन्तानामिति वेटो दीर्घः। वरीता–वरिता । इडभावे लोपो ह्रस्वादिति सिलोपः । अवृत । इत्यादि ॥ इति सुबोधिन्यां क्र्यादयः ॥

(तत्त्वदी०)–कृतायामिह टीकायां लोकेशकरशर्मणा।बाधवं दुष्टबुद्धीनामगमत्क्र्यादिसाधनम्॥

इति तत्त्वदीपिकायां क्र्यादयः ॥ ९ ॥

अथ चुरादयः ।

चुर स्तेये॥ चुरादेः ॥ स्वार्थे ञिः ॥ चोरयति । चोरयते ।चोरयांचकार । चोर्यात् । अचूचुरत् ॥ चिति स्मृत्याम् । चिन्तयति । अचिचिन्तत् । चुरादेर्ञिर्वेति केचित् ॥ चिन्तति ॥ यत्रि सङ्कोचने । यन्त्रयति । अययन्त्रत । ओलडि उत्क्षेपणे । ओलण्डयति । ओलण्डति । ओलण्डांचकार । औलण्डत् । ओकार इदित्येके । लण्डयति । अललण्डत्।लण्डति। अलण्डीत्॥पीड अवगाहे । पीडयति । पीडयते। पीडयांचक्रे ॥

(सुबोधिनी)–चुर स्तेये ॥चुरादेः॥स्वार्थे ञिः॥ चुर आदिर्यस्य स चुरादिस्तस्मात् चुरादेर्गणात् स्वार्थे ञिः स्यात् ॥ उपधाया लघोरिति गुणः । धातुत्वात् तिङ्गुणादेशौ । 'ञित्स्वरितेत उभे' इत्युभयपदम् । चोरयति । चोरयते । चोरयेत् । चोरयेत । चोरयतु । चोरयताम् । अचोरयत् । अचोरयत। चोरयामास । चोरयांचक्रे । ञेरिति । ञिलोपः। चोर्यात् । चोरयिषीष्ट। चोरयिता । चोरयिष्यति । चोरयिष्यते । अचोरयिष्यत् । अचोरयिष्यत । इति अचूचुरत् । अचूचुरत॥चिति स्मृत्याम्॥चिन्तेति पठितव्ये इदित्करणं ञिप्रत्ययस्य पाक्षिकत्वे ज्ञापकम् । सर्वेऽपि चुरादयो विकल्पेन ञिप्रत्ययं लभन्ते इत्यर्थः । तेन चिन्त्यात्, चिन्त्यते इत्यादौ 'न लोपः' इत्यनेन लोपो न ॥ यत्रि संकोचने। यन्त्रेति पठितं अकथनात्तु इदित्करणा-

न्नतीति माधवेनोक्तं तच्चिन्त्यम् । यन्त्र इत्यत्र नकारे पठितेऽपि नो लोप इति न-लोपो न लभ्यते नकारस्यानुपधात्वात् । चिन्त्यादित्यत्र तु चिन्त स्मृत्यामिति नकारो-पपाठे नस्य लोपःस्यादेवेति तद्वारणाय क्रियमाण इकारस्तु ज्ञापक इति भावः ॥ लडि उत्क्षेपणे ओदित्करणं लघ्वोदितश्चेति धातोरव्यवहितस्य तकारस्य नत्वार्थमिति ह्लात् नेडित्येके । ओदिद्ध्लादिड्व्यवधानेऽपि नत्वमित्यन्ये । लण्डनः ॥

(तत्त्वदी०)—**चुरादेः** ॥ चुर आदिर्यस्य स तस्मात् । तद्गुणसंविज्ञानो बहुव्रीहिः । अनुवृत्ता-वयवभेदसमुदायस्यान्यपदार्थत्वेनाश्रयणादेकवचनम् । ननु धातोः प्रेरणेइत्यनेनैव चुरादेरपि स्यात्किम-नेनेत्यत आह—**स्वार्थे** इति ॥ **णिर्वे**ति ॥ अयं भावः । चितेति पठितव्ये इदित्करणं णेः पाक्षिक-त्वे लिङ्गम् । तेन चिन्त्यादित्यादौ नलोपो न ॥ **यत्रि** ॥ यन्त्रेति पठितुं युक्तम् । इदित्त्वाभावेऽपि उपधाभूतनकाराभावे नलोपाभावात् ॥

(भ्राजभासभाषदीपजीवमीलपीडांवोपधाया ह्रस्वोऽङ्परे णौ)

अपीपिडत्-अपिपीडत ॥ प्रथ प्रख्याने । प्राथयति ॥

(सुबोधिनी)—भ्राजभासभाषदीपजीवमीलपीडां वोपधाया ह्रस्वोऽङ्परे णौ ॥ एषामुपधाया ह्रस्वो वा स्यात् अङ्परो यस्मात्सोऽङ्परस्तस्मिन् णिप्रत्यये परे ॥ भ्राजृ भासृ दीप्तौ । भाष व्यक्तायां वाचि । दीपी दीप्तौ । जीव प्राणधारणे । मील निमीलने । पीड अवगाहे । ह्रस्वपक्षे लघोर्दीर्घ इति पूर्वस्य दीर्घः । अपीपिडत् । ह्रस्वाभावे अपिपीडत् ॥ प्रथ प्रख्याने । प्रख्यानं कथनम् । स्वार्थे णौ ज्ञपादिभ्य इति वक्ष्यमाणेन मित्त्वाभावान्न ह्रस्वः । प्राथयति ॥

(स्मृदृत्वरप्रथम्रदस्तॄस्पशां पूर्वस्याऽदङ्परे णौ इत्त्वापवादः)

अपप्रथत् ॥ पृथ प्रक्षेपे । पर्थयति ॥

(सुबोधिनी)—स्मृदृत्वरप्रथम्रदस्तॄस्पशां पूर्वस्यादङ्परे णौ इत्त्वाप वादः ॥ एषां द्वित्वे पूर्वस्य अत्वं स्यात् अङ्परे णौ । अत इत्यादिन्यस्यापवादः ॥ स्मृ चिन्तायाम् । दृ भये । ञित्वरा संभ्रमे । प्रथ प्रख्याने । म्रद मर्दने । स्तॄ आच्छा-दने । स्पश बाधनस्पर्शनयोः ।

(उपधाया ऋवर्णस्य ऋदाङ्परे णौ इगागमापवादः) अपीपृ-

थत्-अपपर्थत ॥ [illegible] । [illegible] ॥ श्रण दाने । विश्राण-यति । अशिश्रणत्-अशश्राणत् ॥ नट [illegible] । अनीनटत् ॥

(सुबोधिनी)—उपधाया ऋवर्णस्य ऋत् वाङ्परे णौ इगागमापवादः ॥ [illegible]

[illegible]

रेषामृदुपधानामुपधाया लघोरिति अपीपृथदित्यादावर् प्राप्त इति विवेकः ॥ श्रण दाने ॥ प्रायेणायं विपूर्वः । विश्राणनं वितरणम् ॥

(तत्त्वदी०)—इररारामिति ॥ दीर्घोपधे उपधाया ऋत इति इर् प्राप्तः । मृजेर्वृद्धिरित्यार् प्राप्तः लघूपधत्वे त्वर् प्राप्तः ॥

ज्ञप ज्ञानज्ञापनयोर्मित् ।

(सुबोधिनी)—ज्ञप ज्ञानज्ञापनयोर्मित् ॥ ज्ञप धातुर्ज्ञाने ज्ञापने च ञिप्रत्ययं लभते मित्संज्ञकश्च । 'प्रतिपज्ज्ञप्तिचेतनाः' ॥

मितां ह्रस्वः ॥ मितां धातूनामुपधाया ह्रस्वो ञौ ॥ ज्ञपयति । अजिज्ञपत् ॥

(सुबोधिनी)—मितां ह्रस्वः ॥ म् इत् येषां ते मितः तेषाम् । घटादयो मित इत्यादि मित्संज्ञकानां ग्रहणम् ॥

(तत्त्वदी०)—मितां ह्रस्वः ॥ म् इत् येषां ते तथा तेषाम् ॥

यम वेष्टने मित् । यमयति । अयीयमत् ॥

(सुबोधिनी)—यम वेष्टने मित् ॥ चुरादौ यमधातुर्वेष्टने मित् न तु भोजने । यमयति चन्द्रम् । परिवेष्टते परिवेषं करोतीत्यर्थः। यमधातुश्चुरादौ घटादौ च घटादौ तु यच्छतिर्भोजनतोऽन्यत्र । मित्त्वेति भोजने एव मित्संज्ञकः । यमयति ब्राह्मणान् भोजयतीत्यर्थः । अन्यत्र आयामयति द्रावयति व्यापारयति वेत्यर्थः। जनी जॄषित्य मन्तत्वादेव सर्वार्थेषु मित्त्वे सिद्धे विशेषार्थं वचनम् ॥

(तत्त्वदी०)—यमयति ॥ परिवेष्टन इत्यर्थः ॥

चह चप परिकल्कने मित् । चहयति । अचीचहत् । चपयति । अचीचपत् ।

(सुबोधिनी)—चह चप परिकल्कने मित् । परिकल्कनं दम्भः शाठ्यं च । अदन्तेषु कथादिषु वक्ष्यमाणस्य तु अदन्तत्वेनाग्लोपित्वान्नाङ्कार्यम्। अचचहत् ॥

(तत्त्वदी०)—परिकल्कने ॥ परिकल्कन दम्भ शाठ्य च । कथनमित्यन्ये ॥

रह त्यागे मित् । रहयति । अरीरहत् ॥

(सुबोधिनी)—रह त्यागे मित ॥ कथादेस्तु अररहत् ॥

बल प्राणने मित । बलयति । अबीबलत ॥

चिञ् चयने मित ।

(सुबोधिनी)- चिञ् चयने मित ॥ रचनायां मिदयम ॥

(चिस्फुरोर्णौवान्तं वा)

(सुबोधिनी)-चिस्फुरोर्णौवात्वं वा ॥ अनयोरात्वं वा स्यात् णिप्रत्यये परे॥

रातो ञौ पुक् ॥ ऋधातोरादन्तस्य च पुक् ञौ॥ चपयति । अचीचपत् । चययति । अचीचयत् ॥ स्वार्थे ञौ ज्ञपादिभ्योऽन्ये मितो न ॥ कृत संशब्दने ॥

(सुबोधिनी)-रातो ञौ पुक्॥ आ च आश्चानयोः समाहारो रात् तस्य आत्वे पुकि ह्रस्वे चपयति । आत्वाभावे चययति । स्वार्थे ञौ ज्ञपादिभ्योऽन्ये मितो न । तेन शमादीनाममन्तत्वप्रयुक्तं मित्त्वं न । मुख्यमते पञ्च ज्ञपादयः । मतान्तरे सप्त । कृत संशब्दने ॥

(तत्त्वदी०)-रातो ञौ-॥आ च आश्च रात् तस्य रातः। ऋ इत्यनेनोभयोरपि ग्रहणम् । तेन ऋच्छन्तम् इयृतं वा प्रेरयतीति विग्रहे अर्पयतीति भवति। ज्ञपादिभ्य इति ॥ सप्तम्य इति मतान्तर बोध्यम् । तेन शमादीनाममन्तत्वप्रयुक्तं मित्त्वं न ॥

(धातोरुपधाया ऋुत इर्) कीर्तयति।अचीकृतत्।अचीकीर्तत् ॥

(सुबोधिनी)-धातोरुपधाया ऋुत इर् ॥ ननु ऋुत इर् इति सूत्रे धातोर्ऋुत इर् इति व्याख्याने सिद्धमिष्टं किमनेन सूत्रेणेति चेन्मैवम् । तथाहि सति ऋकारीयति इत्यत्रापि इर्प्रसंगः स्यात् । उपधाया ऋवर्णस्य ऋटेति पक्षे अटि लघौ ह्रस्व इति इत्वे कृते लघोर्दीर्घ इति दीर्घः । अचीकृतत् । पक्षे अचिकीर्तत् ॥

(आकुस्मादात्मनेपदिनः) चित संचेतने । चेतयते । अचीचितत ॥ दशि दंशने । दंशयते । अददंशत । आकुस्मीयमात्मनेपदं ञिसन्नियोगेनैव ॥ दशति । नलोपो न सञ्जिसाहचर्यात् भ्वादेरेव तत्र ग्रहणात् ॥ तत्रि कुटुम्ब धारणे । तन्त्रयते । कुटुम्बयते । अततन्त्रत । अचुकुटुम्बत ॥ मत्रि गुप्तभाषणे । मन्त्रयते । शम् लक्ष आलोचने । शामयते । लक्षयते । अशीशमत । अललक्षत दिवु परिकूजने । देवयते ॥ गृ विज्ञाने । गारयते । अजीगरत । विद् चेतनाख्याननिवासेषु । वेदयते । अवीविदत ॥

(सुबोधिनी)-आकुस्मादात्मनेपदिनः॥ कुस्मनाम्नो वेति [illegible]
[illegible] ॥ चित संचेतने ॥ [illegible]
[illegible]

रिकंमर्थमदन्तत्वमुच्यते । वोपदेवस्तु धातोर्नामिन इति वृद्धौ कृतायां रातो ञौ पुकि अर्थापयते इति रूपमाह । शाकटायनस्तु कथादीनां सर्वेषां पुकमाह । तन्मते कथापयति । गणापयतीत्यादि ॥ ॥ इति सुबोधिन्यां चुरादयः ॥

(तत्त्वदी०)–प्रयोजनान्तरमाह–अग्ग्लोपिन इति ॥ अश्च इश्च उश्च आ च ते तथा तान् लोपयतीति स तथा तस्य अङ्कार्यं नाद्वित्वे सतीकारदीर्घत्वादि न ॥ गण संख्याने । संख्यानिमित्तो ज्ञानविशेषः संख्यानमेकत्वादि तेन च तन्निष्ठः क्रियाविशेषो लक्ष्यते ॥ अङ्क अङ्ग पदे लक्षणे च । लक्षण चिह्नकरणम् ॥ ॥ इति तत्त्वदीपिकायां चुरादयः ॥ १० ॥

कृतायामिह टीकायां लोकेशकरशर्मणा ।
इय दशगणी पूर्णा माननीया मनीषिभिः ॥

अथ ण्यन्तप्रक्रिया ।

धातोः प्रेरणे ॥ धातोः प्रयोजकव्यापारेऽर्थे ञिप्रत्ययः॥ भवन्तं प्रेरयति । भावयति । भावयते । भावयांचकार ।

(सुबोधिनी)–धातोः प्रेरणे ॥ प्रयोजकः प्रेरकः स च चेतनाचेतनसाधारण्येन विवक्षितः । स च क्वचित्सिद्धः क्वचित् फलरूपः । देवदत्तः पाचयति, गमयतीत्यादौ सिद्धः । भिक्षा वासयति, संग्रामो वासयतीत्यादौ तु फलरूपः । तस्य व्यापारः प्रेरणम् । भृत्यादेर्निकृष्टस्य प्रवर्त्तना प्रेरणमाज्ञेत्यर्थः । धातोर्ञिः प्रत्ययः स्यात्प्रेरणेऽर्थे । ननु यदि धातोः प्रेरणे ञिर्भवति लोट् च तदा ञेर्लोटश्च पर्यायता स्यात् । ततश्चेदानीं पृच्छतु भवानिति वक्तव्ये प्रच्छयतीति ञिप्रत्ययेनापि प्रयुज्येतेति चेन्मैवम् । प्रयोज्यप्रवृत्त्युपहिता या प्रयोजकनिष्ठप्रवृत्तिः सा ञिप्रत्ययस्यार्थः । प्रयोज्यप्रवृत्त्यनुपहिता प्रयोजकप्रवृत्तिस्तु लोडर्थ इत्युभयोर्भेदः। उक्तं च । "द्रव्यमात्रस्य तु प्रैषे पृच्छादेर्लोड् विधीयते । सक्रियस्य यदि प्रैषस्तदा स विषयो णिचः ॥" भवन्तं प्रेरयति भावयति । ञित्स्वरितेत उभे इत्युभयपदम् । भावयते । भावयेत् । भावयेत । भावयतु । भावयताम् । अभावयत् । अभावयत । कासादिप्रत्ययादित्याम् । भावयांबभूव । भावयांचक्रे । ञेरिति ञिलोपः । भाव्यात् । भावयिषीष्ट । भावयिता। भावयिष्यति । भावयिष्यते । अभावयिष्यत् । अभावयिष्यत ।

(तत्त्वदी०)–दशगणीं निरूप्य स्वार्थञिप्रसंगात्प्रेरणार्थं ञिं दर्शयति–धातोः प्रेरणे ॥ प्रेरण चानेकविधम् प्रेषणाध्येषणतत्समर्थाचरणभेदात् । तत्र भृत्यादेर्निकृष्टस्य प्रवर्तना प्रेषणमाज्ञेति यावत् । गुर्वादेः प्रवर्तनाध्येषणं प्रार्थनेति यावत् । तत्समर्थाचरण तदनुकूलव्यापारकरणम् । तच्चानुमित्युपदेशानुग्रहान्नदानादिरूपम्। तत्र यस्यानुमतिं विनार्थो निवर्तते तस्य राजादेरनुमत्या प्रयोजकत्वम् । वैद्यादेस्तूपदेशेन पलायमानं निरोधेनानुग्रहेण चौरस्यान्नदानेन सर्वत्रायं प्रकरणादिलभ्यः । स-

नानुगतप्रेरणमात्रं ण्यर्थः। अथ पृच्छतु मा भवानित्यत्रास्त्विति चेदुच्यते। प्रयोज्यप्रवृत्त्युपहितप्रवृत्तिर्ण्यर्थः । केवला तु लोडर्थ इति । उक्तं च । "द्रव्यमात्रस्य तु प्रैषे पृच्छादेर्लोङ् विधीयते। क्रियस्य यदा प्रैषस्तदा स विषयो णिचः" इति ॥ अथ कथं भिक्षा वासयति, कारीषोऽग्निरध्यापयतीत्यत्र ञिः भिक्षादेश्चाचेतनतया प्रेरणस्य च चेतनधर्मत्वात् इति चेन् शृणु। अत्राप्यानुकूल्याचरणमेव प्रयोजकव्यापारित्वेनाध्यारोप्यते। यतो भिक्षा अपि प्रचुरा व्यञ्जनवत्यश्च लभ्यमाना वासं प्रयुञ्जते। तथा कारीषोऽग्निरेकान्ते निर्वाते प्रज्वलित शीतकृतमुपद्रवमध्ययनविरोधिनमपनयन्नध्ययनेऽनुकूलो भवतीति । ञिचाद्युभयमाह—भावयतीत्यादि ॥

(अङ्सयोः पूर्वस्योकारस्येत्वम् पवर्गयलजकारेष्ववर्णपरेषु परतः) अबीभवत् ॥ मूङ् बन्धने । मावयति । अमीमवत् ॥ यावयति । अयीयवत् ॥ अरीरवत । लावयति । अलीलवत् ॥ अजीजवत् ॥

(सुबोधिनी)—अङ्सयोः पूर्वस्योकारस्येत्वं पवर्गयलजकारेष्ववर्णपरेषु परतः ॥ द्वित्वपूर्वरूपस्य उत इत्वं भवति अवर्णःपरो येभ्यस्तेऽवर्णपरास्तेषु पवर्गयलजेषु परेषु ॥ अवर्णपरेषु किम् । बुभूषति ॥ पवर्गयलजेषु किम्। ऊर्णुनुविषति ॥ भू सत्तायाम् । एरङ् द्विश्चेति अङि कृते द्वित्वे च भूभू इति जातं तत उत्तरस्य वृद्ध्यावादेशौ ततोऽङि लघौ ह्रस्वे कृते अङ्सयोरिति पूर्वस्येत्वं ततो दीर्घः । अबीभवत । अवीभवत । मूङ् बन्धने । अमीमवत् ॥ यु मिश्रणे । अयीयवत ॥ रु शब्दे । अरीरवत्॥ लूञ् छेदने । अलीलवत् ॥ जु गतौ । सौत्रोऽयं धातुः । अजीजवत ॥

(स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनामङ्सयोः पूर्वस्येत्वं वावर्णपरे धात्वक्षरे परे) असिस्रवत्–असुस्रवत। अशिश्रवत्–अशुश्रवत् । अदिद्रवत्–अदुद्रवत । अपिप्रवत–अपुप्रवत । अपिप्लवत्–अपुप्लवत् । अचिच्यवत–अचुच्यवत । न णिः । अशशासत् । अडुढौकत् ॥

(सुबोधिनी)—स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनामङ्सयोः पूर्वस्येत्वं वावर्णपरे धात्वक्षरे परे ॥ स्रु गतौ । श्रु श्रवणे । द्रु गतौ । प्रुङ् प्लुङ् च्युङ् गतौ । असम्बन्धोऽत्रावर्णपरः ॥ अवर्णपरे किम् । शुश्रूषति ॥ असिस्रवत्–असुस्रवत् । अदिद्रवत्–अदुद्रवत । अचिच्यवत्–अचुच्यवत ॥

(ण्यन्तात् ञिः) चोरयति । अचूचुरत् ॥

(सुबोधिनी)—ण्यन्तात् ञिः ॥ [illegible] ॥ [illegible] चोरयति । [illegible] ।

(ह्रीव्लीरीक्नुयीक्ष्मायीणां णौ पुक्) ह्रेपयति।अजिह्रिपत्॥ व्लेपयति। अविव्लिपत् ॥ रेपयति। अरीरिपत् ॥

(सुवोधिनी)–ह्रीव्लीरीक्नूयीक्ष्मायीणां णौ पुक्॥एषां पुक् णौ। ह्री लज्जायाम्। व्ली वरणे। रीङ् क्षये। क्नूयी शब्दे उन्दे च। क्ष्मायी विधूनने ॥

(तत्त्वदी०)–ह्रेपयतीति॥उपधाया लघोरित्यत्रोपधाया इत्यस्य योगविभागाद्धातोरुपधाया नामिनो गुणो भवति। तेन गुरोरपि भवति ॥

(यवयोर्वसे हकारे च लोपः)क्नोपयति।अचुक्नुपत् ॥ क्ष्मापयति। अचिक्ष्मपत् ॥

(सुवोधिनी)–यवयोर्वसे हकारे च लोपः ॥यकारवकारयोर्लोपः स्यात् वस्प्रत्याहारे हकारे च परे ॥

(दुषेर्णौ दीर्घः वा चित्तविरागे) चित्तं दूषयति–दोषयति वा कामः। अदूदुषत् ॥

(सुवोधिनी)–दुषेर्णौ दीर्घः ॥ दुष्यतेरुपधाया ऊत्स्यात् णौ। दूषयति। दुष वैकृत्ये दिवादिः। णौ किम्। दोषः।वा चित्तविरागे।चिती संज्ञाने इत्यस्मात् क्तः। चित्तम्। विरागोऽप्रीतता। दूषयति–दोषयति वा चित्तं कामः। चित्तं दुष्यति।स्नानसंध्यादौ विरक्तं भवति। तत् प्रयुङ्क्ते इत्यर्थः

(तत्त्वदी०)–दु०वाचित्त० ॥वाक्यभेदेन व्याख्येयम्।दुषेर्दीर्घो णौ।दूषयति।नतश्चित्तविरागे वा। चित्तविरागोऽप्रीतता ॥

(स्फायो वः) णौ ॥ स्फावयति। अपिस्फवत् ॥ अट्ट उद्यमे। अट्टयति। आट्टिटत् ॥ अर्च पूजायाम्। अर्चयति। आर्चिचत् ॥ उन्दी क्लेदने। उन्दयति। औन्दिदत् ॥ उब्ज आर्जवे। उब्जयति। औब्जिजत् ॥ द्रा कुत्सायाम्। द्रापयति। अदिद्रपत् ॥

(सुवोधिनी)–स्फायो वः ॥स्फायो वन्तं स्यात् णौ परे॥ अट्ट उद्यमे।स्वरादेः पर इति टिशब्दस्य द्वित्वे आट्टिटत् ॥ अर्च पूजायाम्। आर्चिचत् ॥ [illegible] । उपधाह्रस्वो द्वित्वात्प्रागेव भवति। ततो धिशब्दस्य द्वित्वे मा भवानर्दिधत् ॥ उन्दी क्लेदने। दिशब्दस्य द्वित्वे औन्दिदत् ॥ उब्ज आर्जवे। उपदेशे दकारोपधोऽयम्। द्वित्वविषये स्वरात्परः [illegible] इति निषेधात् जिशब्दस्य द्वित्वे कृते दकारो निपातनादस्य बः ॥ द्रा कुत्सायाम्। पूर्वं ह्रस्वः। ततो द्वित्वे इत्वे च अदिद्रपत् ॥

(रभिलभोः स्वरे नुम् त्वलिटोः) रम्भयति। अररम्भत् ॥ डुलभष् प्राप्तौ। लम्भयति। लम्भयेत्। अललम्भत् ॥ लाभयति

निशानेऽपीति पाठान्तरम् । निशानं तीक्ष्णीकरणम् । पशुं संज्ञपयति मारयतीत्यर्थः । विष्णुं विज्ञपयति । संतोषयतीत्यर्थः । संज्ञपयति रूपम् । माधवमते दर्शयतीत्यर्थः । मतान्तरे तु बोधयतीत्यर्थः । प्रज्ञपयति शरम् । तीक्ष्णं करोतीत्यर्थः । कथं तर्हि 'विज्ञापना भर्तृषु सिद्धिमेति' इति 'तज्ज्ञापयत्याचार्यः' इति च । अत्र ज्ञाधातोर्ज्ञौ मित्त्वाद्ध्रस्वेन भावितव्यमिति । शृणु । माधवमतेऽचाक्षुषज्ञाने मित्त्वाभावात् । ज्ञापनमात्रे मित्त्वमिति मते तु ज्ञा नियोगे इति चौरादिकस्य धातूनामनेकार्थत्वाद्बोध्यम् ॥ कम्पने चलि ॥ चलयति शाखाम् । कम्पनादन्यत्र तु शीलं चालयति । अन्यथा करोतीत्यर्थः ॥ हरतीत्यर्थ इति स्वामी । सूत्रं चालयति । क्षिपतीत्यर्थः ॥ मदी हर्षदैन्ययोः ॥ मदयति ॥ हर्षयति ग्लेपयति वा । दैन्यं करोतीत्यर्थः । अन्यत्र मादयति । चित्तविकारमुत्पादयतीत्यर्थः ॥ ॥ ध्वन शब्दे ॥ ध्वनयति घण्टाम् । अन्यत्र ध्वानयति । अस्पष्टाक्षरमुच्चारयतीत्यर्थः ॥

(तत्त्वदी०)–मारणेति ॥ मारणं हिंसनम् । निशामनं चाक्षुषज्ञानम् । 'तज्ज्ञापयत्याचार्यः' 'विज्ञापना भर्तृषु सिद्धिमेति' इत्यादौ ज्ञापनसामान्ये मित्त्वाभावान्न ह्रस्वः ॥ कम्पने चलिः ॥ चलयतीति शाखामिति शेषः । अन्यत्र शीलं चालयति अन्यथाकरोतीत्यर्थः ॥ मदयतीति ॥ अन्यत्र मादयति चित्तविरागमुत्पादयतीत्यर्थः ॥ ध्वनयतीति ॥ घण्टामिति शेषः । अन्यत्र ध्वानयति अस्पष्टाक्षरमुच्चारयतीत्यर्थः ॥

(जनीजॄष्क्नसुरञ्जोऽमन्ताश्च) जनयति । जरयति । क्नसु कौटिल्ये दीप्तौ च क्नसयति ॥

(सुबोधिनी)–जनीजॄष्क्नसुरञ्जोऽमन्ताश्च । जनी प्रादुर्भावे । जॄष् वयो[हा]नौ । क्नसु ह्वरणदीप्त्योः । त्रयोऽपि दिवादयः । रञ्ज रागे । दिवादिर्भौवादिकश्च । अ[...] कमिगम्यादयः । जॄषिति षिन्निर्देशाज्जीर्यतेर्ग्रहणम् । जॄणातेस्तु जारयति ॥

अत्र ण्यन्तेः [...]पस्यैव तद्वीज [...]त्वा- [...]नमत्वा- [...]काचोऽ- [...]र्हि केवलन

(तत्त्वदी०)–अमंताश्च ॥ अम् अन्ते येषा ते शमादय इत्यर्थः ॥

(रञ्जेर्णौ मृगरमणे नलोपः) रजयति मृगान् । अरीरजत् । अन्यत्र वस्त्रं रञ्जयति । अररञ्जत् ॥ शमयति ॥ दमयति ॥

(सुबोधिनी)–रञ्जेर्णौ मृगरमणे नलोपः ॥ रञ्जेर्नस्य लोपः स्या[त्] आखेटेऽर्थे । रजयति मृगान् । मृगेति किम् । रञ्जयति पक्षिणः । रमण[...] यति मृगान् [...]नेन ॥ शमु दमु उपशमे । दैवादिकौ । अशी[...] ॥ १ ॥

([...] ञ्जेर्णौ इत्यादि ॥ मृगरमणमाखेटः । मृगेति किम् ।

किम् । [...] तृणदानेन ।

दर ॥ स्वद् चित्तावेगे । स्वदयति । अचिस्वदत् ॥ त्वरयति । [illegible]त्वरत ॥ ज्वर रोगे । ज्वरयति ॥ नट नृत्तौ । नटयति। अनीनटत ॥ नक्क नृत्तौ । नक्कयति ॥ लगे संगे। लगयति ॥ ज्वल दीप्तौ । [illegible]यति ॥ स्मृ आध्याने । स्मरयति । असस्मरत् ॥ दॄ भये । [illegible]यति । अददरत ॥ नॄ नये । नरयति । अनीनरत् ॥ श्रा पाके । [illegible]यति अशिश्रपत् ॥

([illegible])—[illegible] गमिरबोधने ॥ इणो गमिः स्यात् [illegible] [illegible] । बोधने तु । प्रत्याययति । गतिपूर्वस्येणो ज्ञानार्थता। स्वरादेः [illegible] [illegible] । प्रत्यायित ॥ [illegible] मितः॥ [illegible] [illegible] इति [illegible] ।मितां ह्रस्वः [illegible] णमि वा दीर्घे इति [illegible] [illegible] । [illegible] ॥ [illegible] [illegible] । [illegible] कथं तर्हि 'कमलवनोद्घाटनं कुर्वते ये' [illegible] ॥ [illegible] । [illegible] पूर्वत्वात् ॥ [illegible] । [illegible] पूर्वत्वात् ॥ [illegible] [illegible] पूर्वत्वात् ॥ [illegible]

[illegible]

निशानोर्ज्ञपति पाठान्तरम् । निशानं तीक्ष्णीकरणम् ।पशुं संज्ञपयति मारयतीत्यर्थः। विष्णुं विज्ञपयति । संतोषयतीत्यर्थः । संज्ञपयति रूपम्। माधवमते दर्शयतीत्यर्थः । मतान्तरे तु बोधयतीत्यर्थः । प्रज्ञपयति शरम् । तीक्ष्णं करोतीत्यर्थः।कथं तर्हि 'विज्ञापना भर्तृषु सिद्धिमेति' इति 'तज्ज्ञापयत्याचार्यः' इति च। अत्र ज्ञाधातोर्णौ मित्त्वाङ्गत्वेन भावितव्यमिति । शृणु । माधवमतेऽचाक्षुषज्ञाने मित्त्वाभावात् । ज्ञापनमात्रे मित्त्वमिति मते तु ज्ञा नियोगे इति चौरादिकस्य धातूनामनेकार्थत्वाद्बोध्यम् ॥कम्पने चलि ॥ चलयति शाखाम्।कम्पनादन्यत्र तु शीलं चालयति।अन्यथा करोतीत्यर्थः॥ हरतीत्यर्थ इति स्वामी । सूत्रं चालयति । क्षिपतीत्यर्थः ॥ मदी हर्षदैन्ययोः ॥ मदयति:।।हर्षयति ग्लेपयति वा। दैन्यं करोतीत्यर्थः।अन्यत्र मादयति।चित्तविकारमुत्पादयतीत्यर्थः ॥ ॥ ध्वन शब्दे ॥ ध्वनयति घण्टाम् । अन्यत्र ध्वानयति । अस्पष्टाक्षरमुच्चारयतीत्यर्थः ॥

(तत्त्वदी०)-मारणेति ॥ मारणं हिंसनम् । निशामनं चाक्षुषज्ञानम्।'तज्ज्ञापयत्याचार्यः' विज्ञापना भर्तृषु सिद्धिमेति' इत्यादौ ज्ञापनसामान्ये मित्त्वाभावान्न ह्रस्वः ॥कम्पने चलिः॥ चलयतीति शाखामिति शेषः । अन्यत्र शील चालयति अन्यथाकरोतीत्यर्थः ॥ मदयतीति ॥ अन्यत्र मादयति चित्तविरागमुत्पादयतीत्यर्थः ॥ ध्वनयतीति ॥ घण्टामिति शेषः।अन्यत्र ध्वानयति अस्पष्टाक्षरमुच्चारयतीत्यर्थः ॥

(जनीजॄष्क्नसुरञ्जोऽमन्ताश्च) जनयति । जरयति। क्नसु कौटिल्ये दीप्तौ च क्नसयति ॥

(सुबोधिनी)-जनीजॄष्क्नसुरञ्जोऽमन्ताश्च । जनी प्रादुर्भावे । जॄष् वयोहानौ । क्नसु ह्वरणदीप्त्योः । त्रयोऽपि दिवादयः। रञ्ज रागे।दैवादिको भौवादिकश्च।अमन्ताः शमिगम्यादयः। जॄषिति षिन्निर्देशाज्जीर्यतेर्ग्रहणम् । जॄणातेस्तु जारयति ॥ अत्र ... तद्वीज ... भवा ... काचोऽ ...

(तत्त्वदी०)-अमंताश्च ॥ अम् अन्ते येषा ते शमादय इत्यर्थः ॥

(रञ्जेर्णौ मृगरमणे नलोपः) रजयति मृगान् । अरीरजत्। अन्यत्र वस्त्रं रञ्जयति । अररञ्जत् ॥ शमयति ॥ दमयति ॥

(सुबोधिनी)-रञ्जेर्णौ मृगरमणे नलोपः ॥ रञ्जेर्नस्य लोपः स्यात् ... आखेटेऽर्थे । रजयति मृगान्। मृगेति किम्। रञ्जयति पक्षिणः।रमण यति मृगान् तृणदानेन ॥ शमु दमु उपशमे । दैवादिकौ । अमीत्... ॥१ ॥

(तत्त्वदी०)-रञ्जेर्णौ... ... मृगेति किम् ।

किम् । रजयति मृगान् ...

अथ सान्तप्रक्रिया ।

इच्छायामात्मनः सः ॥ धातोरात्मन इच्छायामर्थे सप्रत्ययो भवति॥(द्विश्च)आत्मनः भवितुमिच्छति बुभूषति। बुभूषांचकार । अबुभूषीत् ॥

(सुबोधिनी)—इच्छायामात्मनः सः॥इच्छायाः क्रियारूपत्वेन कर्तारं विनाऽनुपपन्नत्वात् कर्तुराक्षेपात् इच्छा कर्ता इष्यमाणं वस्तु यदि स्वसंबन्धित्वेनैव इच्छति तदा धातोः सप्रत्यय इत्यर्थः । तेन शिष्याणां पठनमिच्छति गुरुरित्यादौ सो न ॥ द्विश्च ॥ सप्रत्ययान्तस्य धातोर्द्वित्वं स्यात् । भवितुमिच्छतीति कर्मनियतत्वादिषु कर्मेति लब्धम् । धातोः प्रत्ययविधानात् तदर्थत्वं लब्धम् । तेन इषिकर्मार्थवाचकाद्धातोरिच्छायां सप्रत्ययः स्यात् । तुम् तु स्वार्थिकः साध्यावस्थां क्रियामाह।स च लौकिके वाक्ये प्रयुज्यते । केवलस्य धातोः प्रयोगानर्हत्वात्। अलौकिके तु धातुमात्रं प्रयुज्यतेऽतः तुमः कथं लोप इति नो शङ्क्यम् अत्रात्मशब्दस्तु स्वशब्दस्य पर्यायः । संबन्धसामान्ये षष्ठी । आत्मनः स्वस्येत्यर्थः । स्वशब्देन हि इषिकर्तैव गृह्यते ॥

(तत्त्वदी०)—इच्छायामात्मनः सः ॥ धातोरित्यधिकारात्।इष्टिरिच्छा इषेरिच्छेत्यत एव निपातनात्।आत्मशब्दोऽत्र स्ववाची न तु चेतनद्रव्यवाची आत्मन इत्यस्य व्यर्थतापातात्। इच्छायामात्मकर्तृकत्वाव्यभिचारात्। तथेदिष्यमाणमिच्छाकर्तृसंबन्धि भवति । आहुरपि कर्मणीत्यतः कर्मणो वनुवर्त्य पञ्चम्या विपरिणम्य कर्मणो धातोरिति सामानाधिकरण्येन व्याख्येयम् ॥ इच्छायां [illegible] । कर्तुं याति ॥ आत्मनः किम्। शिष्याणां पठनमिच्छति गुरुः॥स्वसंबन्धित्व चेच्छायास्त्व [illegible] तेन शिष्याणां स्वसंबन्धित्वेऽपि न ॥धातोः किम्।प्रतिष्ठागते इत्यत्र प्रमहितम्याधातोर्मा भूत् । तथा [illegible] स्यात्॥कर्मणः किम्। गमनेनेच्छतीति कारणात्मा भूत्। ननु धातुरेवेन [illegible]—इच्छा चेत्स्वस्वसंबन्धिनीति।तत्र। शिष्याणां पठनमिच्छति गुरुरित्यत्रातिव्याप्ते-[illegible] । तथापि । अत्र पठनस्य [illegible] तत्संबन्धिन्या इच्छायाः सत्त्वात्॥भवितुमिच्छतीति । [illegible] क्रियाया वाचकस्य तुमः स्वार्थिकत्वेन लौकिक एव वाक्यप्रयोगः । [illegible] । न [illegible] ॥ तेन तुमः कथं लोप इति नाशङ्कनीयम्॥ [illegible] [illegible] ।

वुः से ॥ उवर्णान्तादिवर्णान्ताद्ग्रहिगुहिभ्यां च परस्य सस्य नेट् ॥

(सुबोधिनी)—वुः से॥ उश्च इश्च वुः तस्मात् वुः । सौत्रं पुंस्त्वम् । उवर्णान्तादिवर्णान्ताद्ग्रहिगुहिभ्यां च परस्य सस्य नेट् ॥ ग्रहेरित्यत्र [illegible] गृहीतिकत्वेन [illegible] निर्देशः । [illegible] । [illegible] द्वित्वे च [illegible] बुभूषति ॥

(तत्त्वदी०)—वुः से ॥ [illegible] ॥

नानिटि से ॥ इङ्गिते सप्रत्यये गुणो न । ऋत इर् । तितीर्षति ॥ जुघुक्षति ॥ से दीर्घः ॥ स्वरान्तस्य धातोर्दीर्घः स्यात् सप्रत्यये परे ॥ चिकीर्षति ॥ चिचीषति-चिकीषति ॥ जिगीषति॥पुपूषति॥ पः से । पिपक्षति ॥ पिपासति ॥ मुमूर्षति ॥

(सुबोधिनी)-नानिटि से ॥ न इट् यस्य सोऽनिट् तस्मिन् से इत्यस्य विशेषणम् ॥ बुभूषेत् । बुभूषतु । अबुभूषत्।कासादिप्रत्ययादित्याम्।बुभूषांचकार।बुभूष्यात् ।सिसतासीस्यपामितीट् । बुभूषिता । बुभूषिष्यति । अबुभूषिष्यत् । अबुभूषीत् ॥ तॄ प्लवनतरणयोः ॥ ऋत इर् इतीर् । य्वोर्वि इसे इति दीर्घः तरितुमिच्छति तितीर्षति ॥ गुहू संवरणे । सप्रत्यये द्वित्वे च हो ढः इति ढत्वम् । आदिजबानामिति गत्वम्। 'षढोः कः से' इति कत्वम् । किलात्पः स इति षत्वम् । जुघुक्षति ॥ से दीर्घः । स्वरान्तस्य धातोर्दीर्घः स्यात् सप्रत्यये॥ आदौ दीर्घस्तत इर् । चिकीर्षति॥चिनोतेः षणादौ क्विर्वेति किः । चिकीर्षति-चिचीषति ॥ सपरोक्षयोर्जेर्गिरिति गिः ।से दीर्घ इति दीर्घः जिगीषति ॥ पूञ् पवने । पुपूषति ॥ ग्रुः से इतीट् न ॥ डुपचष् पाके । पक्तुमिच्छति पिपक्षति । पः से इति पूर्वस्येकारः॥पा पाने पातुमिच्छति पिपासति ॥ मृ हिंसायाम् पोरुरित्युर् । य्वोर्विहसे इति दीर्घः।मुमूर्षति ॥पृ पालनादौ । पुपूर्षति ॥ भृ भर्त्सनभरणयोः । बुभूर्षति ॥

(तत्त्वदी०)-नानिटि से ॥ न इट् यस्मिन् [illegible] तस्मिन् । से [illegible] । अचितादीर्दिदित्यनेन द्वित्वे सिद्धे [illegible] । [illegible] ।चिकीर्षती-ति॥ आदौ दीर्घस्तत इर् ॥

(रुदविदमुषग्रहिस्वपिप्रच्छिभ्यः सः कित) रुरुदिषति । विविदिषति । मुमुषिषति । ग्रह उपादाने ।हो ढः ।आदिजबानामिति। षढोः कः से । ग्रहीतुमिच्छति जिघृक्षति । सुषुप्सति॥

(सुबोधिनी)-रुदविदमुषग्रहिस्वपिप्रच्छिभ्यः सः कित ॥ [illegible] [illegible] [illegible] ॥

([illegible]) [illegible] । [illegible] । [illegible] । [illegible] ॥ [illegible] ॥

(दम्भेरिच्च) धिप्सति-धीप्सति ॥

(सुबोधिनी)-दम्भेरिच्च ॥ स्वरस्य ईस् स्यात् इच्च पूर्वस्य लोपश्च ॥ अनिटि से उपधानस्य लोप इति न लोपः । आदिजबानामिति धत्वम् । धिप्सति-धीप्सति । णुगन्तो मित्संज्ञको ञ्यन्तो जानातेर्ज्ञपिः पकारान्तश्चौरादिको वा । दम्भिज्ञपिभ्यामिति वेट् । जिज्ञपयिषति । इडभावे 'नानिटि से' इति न गुणः । से दीर्घ इति दीर्घस्तु परत्वात् ञोरिति ञिलोपेन बाध्यते । ज्ञपेः स्वरस्य सादौ से ईत् पूर्वस्य लोपश्च । अनिटि से ज्ञीप्सति ॥

(इवन्तऋधभ्रस्जश्रिस्वृयूर्णुभृसनिभ्यःसस्येड्वा) दिदेविषति॥

(सुबोधिनी)-इवन्तऋधभ्रस्जश्रिस्वृयूर्णुभृसनिभ्यःसस्येड्वा ॥ इवन्तेभ्यः ऋधादिभ्यश्च सस्येड् वा स्यात् ॥ दिवु क्रीडादौ । सिसतासीस्यपामितीट् । दिदेविषति । इडभावे 'नानिटि से' इति न गुणः ॥

(वस्यानिटि से उः) दुद्यूषति । अर्दिधिषति ॥

(सुबोधिनी)-वस्यानिटि से उः ॥ धातोर्वस्य उत्वं स्यात् अनिटि से ॥ यत्वं द्वित्वं च । दुद्यूषति ॥ ऋध वृद्धौ । अर्धितुमिच्छति स्वरादेः पर इति धिस्शब्दस्य द्वित्वे अर्दिधिषति । इडभावे ॥

(ऋधेरनिटि से स्वरस्य इर्द्वित्वलोपश्च)ईर्त्सति । बिभ्रज्जिषति-बिभर्जिषति-बिभ्रक्षति-बिभर्क्षति । शिश्रयिषति । शिश्रीषति । सिस्वरिषति-सुस्वूर्षति । यियविषति-युयूषति । ऊर्णुनविषति-ऊर्णुनविषति-ऊर्णुनूषति । बिभरिषति-बुभूर्षति ॥

(सुबोधिनी)-ऋधेरनिटि से स्वरस्य इर्द्वित्वलोपश्च ॥ ऋकारस्य इर् 'र्वोर्विहसे' इति दीर्घः । खसे चपा झसानामिति तः ईर्त्सति ॥ भ्रस्ज पाके । इट् पक्षे भ्रस्जोरसोरिति अर् । रहाद्यपो द्विरिति द्वित्वम् । बिभर्जिषति । अरभावे श्चुत्वम् झभे जबा इति शस्य जः । बिभ्रज्जिषति । इडभावे स्कोरिति सलोपः । छशषेति षत्वम् । 'षढोः कः से' इति कत्वम् । बिभ्रक्षति-बिभर्क्षति ॥ श्रिञ् सेवायाम् । शिश्रयिषति । इडभावे से दीर्घ इति दीर्घः । शिश्रीषति ॥ स्वृ शब्दोपतापयोः । सिस्वरिषति । इडभावे से दीर्घ इति दीर्घे 'पोरुर्' इत्युर् । द्वित्वम् । सुस्वूर्षति ॥ यु मिश्रणे । अङ्सयोरिति पूर्वोकारस्येत् । यियविषति । इडभावे से दीर्घ इति दीर्घे युयूषति ॥ ऊर्णुञ् आच्छादने । ऊर्णोतेरिडादिप्रत्ययो वा ङिदिति ङित्त्वाद्गुणाभावे नुवादेशिरित्युव् । ऊर्णुनुविषति । ङित्त्वाभावे ऊर्णुनविषति । अतःपूर्वं द्वित्वं पश्चाद्गुणादेशौ । इडभावे से दीर्घ इति दीर्घः ऊर्णुनूषति ॥ भृ भर्त्सनभरणयोः । बिभरिषति । इडभावे पोरुरित्युर् । 'र्वोर्विहसे' इति दीर्घे द्वित्वे च बुभूर्षति॥

(स्तौतिण्यन्तयोरेव षे पूर्वात् सस्य षः) तुष्टूषति॥साधयितु-मिच्छति सिषाधयिषति–सिषेधयिषति ॥ सुष्वापयिषति॥स्तौति-ण्यन्तयोरिति किम् । सिसनिषति । षे इति किम् । सिषासति । तिष्ठासति ॥

(सुबोधिनी)–स्तौतिण्यन्तयोरेव षे पूर्वात्सस्य षः ॥ पूर्वादिलात्परस्य स्तौतिण्यन्तयोरेव सस्य षः स्यात्षभूते से नान्यस्य॥ष्टुञ् स्तुतौ षत्वे से दीर्घ इति दीर्घे च तुष्टूषति।'वुःसे'इति नेट् ॥ साध संसिद्धौ । ण्यन्तः । द्वित्वे 'यःसे ' इति पूर्वस्येत्वे षत्वे च । सिषाधयिषति॥स्तौतिण्यन्तयोः किम्। षिच क्षरणे । सिसिक्षति। उपसर्गात्तु प्रादेश्च तथा तौ सुनमामिति अड्द्वित्वव्यवधानेऽपीति च षत्वम् ।परिषिषिक्षति। वन षन् संभक्तौ। इडभावे जनसनखनामित्यात्वं वा ।सिसनिषति–सिषा-देति षत्वम् ॥

–स्तौतिण्यन्तयोरेव षे इति॥षे इति कृतषत्वनिर्देशात्से स्तौतिण्यन्तस्यापि नेषासतीति ॥ जनसनेत्यात्वविकल्प । षे इति निर्देशादत्र न षत्वनिषेधः ॥

: से उपधानस्य लोपः) तृंहू हिंसायाम् । तितृक्षति।

॥

–अनिटि से उपधानस्य लोपः ॥ धातोरुपधाभूतस्य न- सप्रत्यये ॥तृहू स्तृहू तृंहू हिंसार्थास्तुदादौ । ऊदितो वेति ॥तत्प्रागणयोश्च। त्वे षत्वे च तितृक्षति–तितृंहिषति हान्तादिन्यतरयोर्भ्रमो न कार्यः। सि-

(तत्त्वदी०)–अनिटि से उपाधानस्येति॥गादिः क्वि स्त्वादिकत्वे प्राप्ते वचनम्।कृटत्वा-न व्याख्येयम्। तेन लक्ष्यानुसारेण सस्य कित्त्वाकित्त्वे बोध्ये न्नयोरेवेति नियमात्र षः। टानुबन्ध-नद्धा । विवृक्षति । वृतादिभ्यः स्सतयोर्वा परनिति परस्मैपद इति भिन्ने गुणे अरि स इति भिन्ने ।

(इणः से गमबोधने) एतुमिच्छति तीत्यादि । ण्यन्तान्ते अट्सयोः पूर्वस्येति षिषति ॥ इण्वदिकः। अधिजिगमिषति दिक्षतीत्यादौ तु चेतनत्वाभावेनाम्नः।गमागमिनी (सुबोधिनी)–इणः से गमबोधने ॥

। ॥ एतुमिच्छति गमेः सस्येडितीट्। इ तात्तु स्यादेव) जुगुप्सिषते ॥ इति इस्येत्वम् । प्रतीषिषति॥ इण्वदिकः इ

(इवर्णोवर्णोपधाद्धसादेस्सा दिद्युतिषते–दिद्योतिषते ।,न स्वार्थसान्तात्तु स्यादेव॥"ज्ञापिकन्मतुवर्थीय-लिलेखिषति । लिखिर्थः प्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते॥ १॥" ज्ञापिका-

हिंसायामिस् से दि इः। ज्ञार्थे भः इति वाच्यमेव । न नुर्दपान्तात्
। त्वादित्वे भवः आदिच्छ्रीयः । सन्नन्तार्थः ॥
स्सति गुरुम् ॥

तथा मत्वर्थीयात् मतुबर्थिकः सरूपः प्रत्ययो न भवति।धनवानस्यास्ति ।वत्वन्तात् न वतुः । विरूपस्तु स्यादेव। दण्डिमती शाला । सरूप इत्यनुसंबध्यते। सरूपः सादृश्यं तत्तु अर्थद्वारा । तेनेच्छासान्तादिच्छासो न भवति । स्वार्थसान्तात्तु स्यादेव । गुप्भ्य इति स्वार्थे सप्रत्ययः । तदन्तादिच्छासः । जुगुप्सिषते । 'यः से' इतीत्वे मानादीनामिति दीर्घे च । मीमांसिषते । गुप् गोपने ॥ मान विचारणे ॥ इति सुबोधिन्यां सान्तप्रक्रिया ॥

(तत्त्वदी०)–सान्तात्सो नेति॥अतिशये हसादेर्यङ् द्विश्चेत्यतश्चकारानुवृत्तेरेतद्बोध्यम् ॥

छतायामिह टीकायां लोकेशकरशर्मणा । बाधन दुष्टबुद्धीनामगमत्सान्तसाधनम् ॥

इति तत्त्वदीपिकायां सान्तप्रक्रिया ॥ २ ॥

अथ यङन्तप्रक्रिया।

अतिशये हसादेर्यङ्द्विश्च॥ हसादेरेकस्वराद्धातोर्भृशार्थे पौनःपुन्ये च यङ् प्रत्ययो भवति द्वित्वं च ॥

(सुबोधिनी)–अतिशये हसादेर्यङ् द्विश्च ॥ हस आदिर्यस्य स हसादिस्तस्मादेकस्वराद्धातोर्यङ् स्यात् । यङन्तस्य धातोर्द्वित्वं च अतिशयेऽर्थे । अतिपूर्वात् शीङो भावे स्वराद इत्यः । अतिशयो द्विविधः । पौनःपुन्यम् भृशार्थश्च ॥ अतिशये किम् । पठति ॥ एकस्वरात्किम् । पुनःपुनर्जागर्ति ॥ हसादेः किम् । भृशमीक्षते । भृशं शोभते । भृशं रोचते । इत्यादौ यङ् नेति भाष्यम् ॥ पौनःपुन्ये तु स्यादेव रोरुच्यते शोशुभ्यते ॥

(तत्त्वदी०)–अतिशये हसादेर्यङ् द्विश्च॥ अतिशयनमातिशयः आतिपूर्वात् शीङो भावे स्वराद इत्यप्रत्ययः स च द्विविधः पौनःपुन्यं भृशार्थश्च । स चार्थो यङो द्योत्य एव । हस आदिर्यस्य स तथा तस्मात् द्विरित्यपरं वाक्यं धातोर्द्विर्वचनम्। धातुश्च यङन्त एव न तु यङःप्रकृतिभूतः अटाट्यत इत्याद्यसिद्धेः ॥

यङि ॥ याङि यङ्लुकि च पूर्वस्य नामिनो गुणः ॥ सधातुः । ङित्वादात् भृशं पुनःपुनर्वा भवति बोभूयते । बोभूयांचक्रे । बोभूयिषीष्ट । अबोभूयिष्ट ॥ बोभुज्यते ॥

(सुबोधिनी)–यङि ॥ यङ्प्रत्यये लुकि च पूर्वस्येत्यनुवृत्तम् ॥ भू सत्तायाम् । धातुरिति धातुत्वात्लडादयः ङिदन्तत्वादात्मनेपदम् । पुनःपुनरतिशयेन वा भवति बोभूयते । बोभूयेते । बोभूयन्ताम् । अबोभूयत कामादिप्रत्ययादित्याम् । यत इत्यलोपः। बोभूयांचक्रे।बोभूयिषीष्ट । बोभूयिता। बोभूयिष्यते अबोभूयिष्यत ।अबोभूयिष्ट ॥ भुज पालनादौ । अतिशयेन भुनक्ति बोभुज्यते ॥

(तत्त्वदी०)-यङीति ॥ यङो ङित्त्वादात् ॥ अत्र केचित् । कथं यन्ङतादात् ङितो धातोराद्विधानात् अत्र च यो ङित् स न धातुः यो धातुः स च न ङित् । किं च ङस्य गुणनिषेधादिप्रयोजकत्वेन चरितार्थत्वादात्मनेपदप्रयोजकत्वासंभवः । अवयवे कृतं लिङ्गमचरितार्थं समुदायविशेषकं भवतीत्युक्तेः । अत्रोच्यते । सधातुरित्यनेन यङन्तस्य धातुत्वेन धातोर्ङित्त्वसत्त्वात् । गुणनिषेधार्थं च ङकारप्रश्लेषस्य कर्तव्यत्वात् ॥ बोभूयत इति ॥ भवनानुकूल एकाभिन्नाश्रयको वर्तमानोऽतिशयविशिष्टो व्यापारः ॥

अनपि च हसात् ॥ हसादुत्तरस्य यस्य लोपो भवत्यनपि विषये ॥ बोभुजांचक्रे । बोभुजिता ॥ मोमुह्यते । मोमुहांचक्रे ॥ लेलिह्यते ॥ जोहूयते ॥ वेविद्यते ॥

(सुबोधिनी)-अनपि च हसात् ॥ हसात्परस्य यशब्दस्य लोपोऽनपि ॥ हसात्किम् । लोलूयिता ॥ योयूयिता ॥ आदेः परस्य ॥ परस्य यद्विहितं तत्तस्यादेर्बोध्यमिति यलोपः । यत इत्यलोपः । बोभुजांचक्रे । बोभुजिषीष्ट । अल्लोपस्य स्थानिवत्त्वान्नोपधागुणः ॥ एवं मुह वैचित्त्ये । लिह आस्वादने । हु दानादनयोः । ये इति दीर्घः । जोहूयते । विद ज्ञानादौ । वेविद्यते । डुपचष् पाके ॥

आतः ॥ यङि यङ्लुकि च पूर्वस्यात आकारः ॥ पापच्यते । पापठ्यते ॥

(सुबोधिनी)-आतः ॥ आ अत इति च्छेदः । पूर्वस्येत्यनुवृत्तम् । पापच्यते ॥ पठ व्यक्तायां वाचि पापठ्यते ॥

(तत्त्वदी०)-आत इति ॥ आ आ अत इति च्छेदः । द्वितीयाकारस्य वैयर्थ्यानुपपत्त्या किञ्चिदिष्टं ज्ञाप्यते किं तदिष्टम् अकित्पूर्वस्याकारस्याकार इति तेन नरीनृत्यत इति सिद्धम् ॥[1]

(सिचो यङि न षः) सेसिच्यते ॥

(सुबोधिनी)-सिचो यङि न षः ॥ सिचेः सस्य षत्वं न स्यात् यङ्प्रत्यये परे ॥ षिच क्षरणे । सेसिच्यते ॥

(सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ्) सोसूच्यते । सोमूत्र्यते । मोमूत्र्यते ॥

(सुबोधिनी)-सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् ॥ सूच पैशुन्ये । सूत्र वेष्टने । मूत्र प्रस्रवणे । एते त्रयश्चुरादावदन्ताः । सोसूच्यते । सोसूत्र्यते । मोमूत्र्यते ॥ अट गतौ । गौः कुटिलमटाति । इह ट्यशब्दस्य द्वित्वम् । आत इत्यात्वम् । अटाट्यते । ऋ गतौ । कुटिलमृच्छति गुणोर्त्तिसंयोगाद्योरिति गुणः ॥

१ मत इत्यनेन मतोपपत्तौरिदं चिन्त्यम् ।

तथा मत्वर्थीयात् मतुवर्थिकः सरूपः प्रत्ययो न भवति। धनवानस्यास्ति । वत्वन्तात् न वतुः । विरूपस्तु स्यादेव। दण्डिमती शाला । सरूप इत्यनुसंबध्यते। सरूपः सादृश्यं तत्तु अर्थद्वारा । तेनेच्छासान्तादिच्छासो न भवति । स्वार्थसान्तात्तु स्यादेव । गुप्तेः इति स्वार्थे सप्रत्ययः । तदन्तादिच्छासः । जुगुप्सिषते । 'यः से' इतीत्वे मानादीना-मिति दीर्घं च । मीमांसिषते । गुपू गोपने ॥ मान विचारणे ॥ इति सुबोधिन्यां सान्तप्रक्रिया ॥

(तत्त्वदी०)–सान्तात्सो नेति॥ अतिशये हसादेर्यङ् द्विश्चेत्यतश्चकारानुवृत्तेरिति॥
कृतायामिह टीकायां लोकेशकरशर्मणा । बाधन दुष्टबुद्धीनामगमत्सान्तसाधनम् ॥

इति तत्त्वदीपिकायां सान्तप्रक्रिया ॥ १ ॥

अथ यङन्तप्रक्रिया ।

अतिशये हसादेर्यङ्द्विश्च॥ हसादेरेकस्वराद्धातोर्भृशार्थे पौनःपुन्ये च यङ् प्रत्ययो भवति द्वित्वं च ॥

(सुबोधिनी)–अतिशये हसादेर्यङ् द्विश्च ॥ हस आदिर्यस्य स हसादिस्तस्मा-देकस्वराद्धातोर्यङ् स्यात् । यङन्तस्य धातोर्द्वित्वं च अतिशयेऽर्थे । अतिपूर्वात् शीङो भावे स्वराद इत्यः । अतिशयो द्विविधः । पौनःपुन्यम् भृशार्थश्च ॥ अतिशयेन पठति ॥ एकस्वरात्किम् । पुनःपुनर्जागर्ति ॥ हसादेः किम् । भृशमीक्षते । भृशं शोभते । भृशं रोचते । इत्यादौ यङ् नेति भाष्यम् ॥ पौनःपुन्ये तु रोरुच्यते शोशुभ्यते ॥

(तत्त्वदी०)–अतिशये हसादेर्यङ् द्विश्च॥ अतिशयनमतिशयः अतिपूर्वाच्छीङो भावे स्वराद इत्यप्रत्ययः स च द्विविधः पौनःपुन्यं भृशार्थश्च । स चार्थो यङो द्योत्यः । हस आदिर्यस्य स तथा तस्मात् द्विरित्यपरं वाक्यं धातोर्द्विर्वचनम्। धातुश्च यङन्त एव न तु यङ्प्रकृतिभूतः अटाटयत इत्याद्यसिद्धेः ॥

यङि ॥ याङि यङ्लुकि च पूर्वस्य नामिनो गुणः ॥ स्यादुः । ङित्वादात् भृशं पुनःपुनर्वा भवति बोभूयते । बोभूयांचक्रे । बोभूयिषीष्ट । अबोभूयिष्ट ॥ बोभुज्यते ॥

(सुबोधिनी)–यङि ॥ यङ्प्रत्यये लुकि च पूर्वस्येत्यनुवृत्तम् ॥ भू सत्तायाम् धातुरिति धातुत्वाल्लडादयः ङिदन्तत्वादात्मनेपदम् । पुनःपुनरतिशयेन वा भवति बोभूयते । बोभूयेते । बोभूयताम् । अबोभूयत कासादिप्रत्ययादित्याम् । यस्य लोपः। बोभूयांचक्रे। बोभूयिषीष्ट । बोभूयिता। बोभूयिष्यते अबोभूयिष्यत ।
... ॥ भुज पालनादौ । अतिशयेन भुनक्ति बोभुज्यते ॥

(तत्त्वदी०)-यङीति ॥ यङो ङित्त्वादात् ॥ अत्र केचित् कथं यङन्तादात् ङितो धातोरादिविधानात् अत्र च यो ङित् स न धातुः यो धातुः स च न ङित् किं च ह्रस्व गुणानिषेधादिप्रयोजकत्वेन चरितार्थत्वादात्मनेपदप्रयोजकत्वासम्भवः अवयवे कृतं लिङ्गमचरितार्थं समुदायविशेषकं भवतीत्युक्तेः। अत्रोच्यते। सधातुरित्यनेन यङन्तस्य धातुत्वेन धातोर्ङित्त्वसत्त्वात्। गुणानिषेधार्थं च ङकारप्रश्लेषस्य कर्तव्यत्वात् ॥ बोभूयत इति ॥ भवनानुकूल एकाभिन्नाश्रयको वर्तमानोऽतिशयविशिष्टो व्यापारः ॥

अनपि च हसात् ॥ हसादुत्तरस्य यस्य लोपो भवत्यनपि विषये॥ बोभुजांचक्रे। बोभुजिता॥ मोमुह्यते। मोमुहांचक्रे॥ लेलिह्यते॥ जोहूयते॥ वेविद्यते॥

(सुबोधिनी)-अनपि च हसात् ॥ हसात्परस्य यशब्दस्य लोपोऽनपि ॥ हसात्किम्। लोलूयिता॥ योयूयिता॥ आदेः परस्य॥ परस्य यद्विहितं तत्तस्यादेर्बोध्यमिति यलोपः। यत इत्यलोपः। बोभुजांचक्रे। बोभुजिषीष्ट। अल्लोपस्य स्थानिवत्त्वान्नोपधागुणः॥ एवं मुह वैचित्ये। लिह आस्वादने। हु दानादनयोः। ये इति दीर्घः। जोहूयते। विद ज्ञानादौ। वेविद्यते। डुपचष् पाके॥

आतः ॥ यङि यङ्लुकि च पूर्वस्यात आकारः॥ पापच्यते। पापठ्यते॥

(सुबोधिनी)-आतः॥ आ अत इति च्छेदः। पूर्वस्येत्यनुवृत्तम्। पापच्यते॥ पठ व्यक्तायां वाचि पापठ्यते॥

(तत्त्वदी०)-आत इति ॥ आ आ अत इति च्छेदः। द्वितीयाकारस्य वैयर्थ्यानुपपत्त्या किञ्चिदिष्टं ज्ञाप्यते किं तदिष्टम् अकित्पूर्वस्याकारस्याकार इति तेन नरीनृत्यत इति सिद्धम् ॥

(सिचो यङि न पः) सेसिच्यते॥

(सुबोधिनी)-सिचो यङि न पः॥ सिचेः सस्य षत्वं न स्यात् यङ्प्रत्यये परे॥ षिच क्षरणे। सेसिच्यते॥

(सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ्) सोसूच्यते। सोसूत्र्यते। मोमूत्र्यते॥

(सुबोधिनी)-सूचिसूत्रिमूत्र्यटचर्त्यशूर्णोतिभ्यो यङ्॥ सूच पैशुन्ये। सूत्र वेष्टने। मूत्र प्रस्रवणे। एते अपश्चुरादावदन्ताः। सोसूच्यते। सोसूत्र्यते। मोमूत्र्यते॥ अट गतौ। गौः कुटिलमटति। इह यकारस्य द्वित्वम्। आत इत्यात्वम्। अटाट्यते। ऋ गतौ। कुटिलमृच्छति ऋणोतिरुपसंयोगाद्योगिति गुणः॥

१ यद इत्यनेन पूर्वेणागमोऽदं चिन्त्यम्।

(तत्त्वदी०)–यङीति ॥ यङो ङित्त्वादात् ॥ अत्र केचित्।कथ यन्ङतादात् ङितो धातोराद्विधानात् अत्र च यो ङित् स न धातुः यो धातुः स च न ङित्।किं च ह्रस्य गुणानिषेधादिप्रयोजकत्वेन चरितार्थत्वादात्मनेपदप्रयोजकत्वासम्भवः। अवयवे कृतं लिङ्गमचरितार्थं समुदायविशेषकं भवतीत्युक्तेः। अत्रोच्यते।सधातुरित्यनेन यङन्तस्य धातुत्वेन धातोङित्त्वसत्त्वात्।गुणनिषेधार्थं च ङकारप्रश्लेषस्य कर्तव्यत्वात् ॥बोभूयत इति ॥ भवनानुकूल एकाभिन्नाश्रयको वर्तमानोऽतिशयविशिष्टो व्यापारः ॥

अनपि च हसात् ॥हसादुत्तरस्य यस्य लोपो भवत्यनपि विषये॥ बोभुजांचक्रे। बोभुजिता ॥ मोमुह्यते। मोमुहांचक्रे ॥ लेलिह्यते ॥ जोहूयते ॥ वेविद्यते ॥

(सुबोधिनी)–अनपि च हसात् ॥ हसात्परस्य यशब्दस्य लोपोऽनपि ॥ हसात्किम्। लोलूयिता ॥ योयूयिता ॥ आदेः परस्य ॥ परस्य यद्विहितं तत्तस्यादेर्बोध्यमिति यलोपः। यत इत्यलोपः। बोभुजांचक्रे।बोभुजिषीष्ट। अल्लोपस्य स्थानिवत्त्वान्नोपधागुणः॥ एवं मुह वैचित्ये। लिह आस्वादने। हु दानादनयोः। ये इति दीर्घः। जोहूयते। विद ज्ञानादौ। वेविद्यते। डुपचष् पाके ॥

आतः ॥ यङि यङ्लुकि च पूर्वस्यात आकारः ॥ पापच्यते। पापठ्यते ॥

(सुबोधिनी)–आतः॥ आ अत इति च्छेदः। पूर्वस्येत्यनुवृत्तम्। पापच्यते ॥ पठ व्यक्तायां वाचि पापठ्यते ॥

(तत्त्वदी०)–आत इति ॥ आ आ अत इति च्छेदः। द्वितीयाकारस्य वैयर्थ्यानुपपत्त्या किञ्चिदिष्टं ज्ञाप्यते किं तदिष्टम् अकित्पूर्वस्याकारस्याकार इति तेन नरीनृत्यत इति सिद्धम् ॥

(सिचो यङि न षः)सेसिच्यते॥

(सुबोधिनी)–सिचो यङि न षः॥ सिचेः सस्य षत्वं न स्यात् यङ्प्रत्यये परे ॥ षिच क्षरणे। सेसिच्यते ॥

(सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ्) सोसूच्यते।सोसूत्र्यते। मोमूत्र्यते ॥

(सुबोधिनी)–सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् ॥ सूच पैशुन्ये। सूत्र वेष्टने। मूत्र प्रस्रवणे। एते त्रयश्चुरादावदन्ताः। सोसूच्यते। सोसूत्र्यते। मोमूत्र्यते ॥ अट गतौ। गौः कुटिलमटति। इह टयशब्दस्य द्वित्वम्। आत इत्यात्वम्। अटाट्यते। ऋ गतौ। कुटिलमृच्छति गुणोर्त्तिसंयोगाद्योरिति गुणः ॥

१ यत इत्यनेन यलोपत्वादिदं चिन्त्यम्।

(तत्त्वदी०) सूचिसूत्रि ॥ सूच पैशुन्ये । सूत्र वेष्टने । मूत्र प्रस्रवणे । अट गतौ । गतौ । अश भोजने । अशूङ् व्याप्तौ । ऊर्णुञ् आच्छादने । तत्राद्यानां त्रयाणां चुरादिण्यन्तत्वेन कस्वरत्वादद्यादीनां च हसादित्वादप्राप्ते वचनम् ।

(यकारपररेफस्य न द्वित्वनिषेधः) अरार्यते । अरारांचक्रे । अशाश्यते । ऊर्णोनूयते ॥

(सुबोधिनी)-यकारपररेफस्य न द्वित्वनिषेधः ॥ यकारः परो यस्मात् स यकारपरः यकारपरश्चासौ रेफश्च यकारपररेफस्तस्य । ततो र्यशब्दस्य द्वित्वे हसादिशेषे आत इति दीर्घे च अरार्यते इति भाष्योदाहरणात् । लिटि अनपि च हसादिति यलोपः । यत इत्यलोपः । अरारांचक्रे । लुटि । अरारिता ॥ अशूङ् व्याप्तौ । अशाश्येत ॥ ऊर्णुञ् आच्छादने । 'ये' इति दीर्घः । ऊर्णोनूयते ॥

(तत्त्वदी०)-अरार्यत इति ॥ ऋ य इति रियते गुणे कृते यशब्दस्य द्वित्वे हसादिशेषे आत इति दीर्घः ॥ ऊर्णोऽनूयत इति ॥ णत्वस्यासिद्धत्वान्नुशब्दस्य द्वित्वम् ।

(गत्यर्थात्कौटिल्ये एव यङ्) कुटिलमटति अटाट्यते ॥ कुटिलं व्रजति वाव्रज्यते ॥

(सुबोधिनी)-गत्यर्थात्कौटिल्ये एव यङ् ॥ कुटिलस्य भावः कौटिल्यम् ॥ व्रज गतौ । कुटिलं व्रजति आत इति पूर्वस्यात्वम् । वाव्रज्यते ॥

(तत्त्वदी०) अटाट्यत इति ॥ एकभिन्नाश्रयको वक्रगत्यनुकूलो वर्तमानकालिको व्यापार इति । कौटिल्यस्य फलविशेषणत्वे व्यापारविशेषणत्वे तु वक्रो गत्यनुकूलो व्यापार इति शेषः ॥

(लुपसदचरजपजभदहदंशगॄभ्यो धात्वर्थगर्हायामेव यङ्) गर्हितं लुम्पति लोलुप्यते । सासद्यते ॥

(सुबोधिनी)-लुपसदचरजपजभदहदंशगॄभ्यो धात्वर्थगर्हायामेव यङ् ॥ लुपॢ छेदने । गर्हितं लुम्पति लोलुप्यते । षद्लृ विशरणादौ । आत इति पूर्वस्यात्वम् । गर्हितं सीदति सासद्यते ॥

(तत्त्वदी०)-धात्वर्थगर्हायामेवेति ॥ गर्हापि फलस्य व्यापारस्य वा विशेषणम् । लोलुप्यते वन चैत्रः । चैत्राभिन्नाश्रयो वनाभिन्नाश्रितकुत्सितच्छेदनानुकूलो वर्तमानकालिको व्यापारः । वनाभिन्नाश्रयः छेदनानुकूलः कुत्सितो व्यापार इति वा ॥

ञमजपां नुक् ॥ ञमान्तस्य जपजभदहदंशभञ्जपसचरफलां च पूर्वस्यादन्तस्य नुग् यङ्लुकोः ॥

(सुबोधिनी)-ञमजपां नुक् ॥ जप व्यक्तायां वाचि । जभी गात्रविनामे । दह भस्मीकरणे । दंश दशने । भञ्जो आमर्दने । पस धातुर्दन्त्यान्तः सौत्रो गत्यर्थः । ताल-

व्यान्त इति माधवः। चर गत्यादौ। ञिफला विशरणे। फल निष्पत्तौ वा। एषां अममत्याद्यारान्तस्य च नुक् यङ्यङ्लुकोः॥

(चरफलोःपूर्वात्परस्यात उद्यङ्लुकोः) चञ्चूर्यते-चंचूर्यते। चञ्चुरांचक्रे॥ पम्फुल्यते॥ नुगित्यनेनानुस्वारो लक्ष्यते। स च पदान्तवत्॥ जञ्जप्यते-जंजप्यते॥

(सुबोधिनी)-चरफलोः पूर्वात्परस्यात उद्यङ्लुकोः॥ पूर्वाद् द्वित्वरूपादुत्तररूपस्यात उत्वमित्यर्थः। नुगित्यनेनानुस्वारो लक्ष्यते स च पदान्तवत्। अमजपामिति नुमागमोऽनुस्वारं बोधयति। सोऽनुस्वारः पदान्तकार्यं लभत इत्यर्थः। तेन वा पदान्तस्येत्यनेन वा परसवर्णः। चञ्चूर्यते-चंचूर्यते॥

(तत्त्वदी०)-स च पदान्तवदिति॥ तेन वेति यथा स्यात्॥

(गिरते रेफस्य लत्वं यङि) जेगिल्यते॥यँयम्यते-यंयम्यते॥ दीङ् क्षये। देदीयते॥ ओप्यायी वृद्धौ। पेपीयते॥ चञ्चम्यते-चंचम्यते॥ चाखायते-चङ्खन्यते-चंखन्यते॥ चङ्कण्यते-चंकण्यते॥ तन्तन्यते-तंतन्यते॥ जञ्जभ्यते-जंजभ्यते॥ दन्दह्यते-दंदह्यते॥ दन्दश्यते-दंदश्यते॥ बम्भज्यते-बंभज्यते॥ पस बाधनग्रंथनयोः॥ पम्पस्यते-पंपस्यते॥

(सुबोधिनी)-गिरते रेफस्य लत्वं यङि॥ गॄ निगरणे इत्यस्य रेफस्य लत्वं स्याद् यङि॥ गर्हितं गिलति जेगिल्यते॥ यम उपरमे। कण निमीलने। तनु विस्तारे यमान्तत्वादेषां पूर्वस्य नुक्। यँयम्यते-यंयम्यते॥ चङ्कण्यते-चंकण्यते॥ तन्तन्यते-तंतन्यते॥

(तत्त्वदी०)-जेगिल्यत इति॥ गिलनस्य च गर्हितत्वं विवृतास्यचेष्टादिकृतम्॥

रीगृदुपधस्य॥ ऋत्वतो धातोर्यङि परे पूर्वस्य रीक्॥ नरीनृत्यते॥ वरीवृत्यते॥ जरीगृह्यते॥ वरीवृश्च्यते॥ परीपृच्छ्यते॥ चलीक्लृप्यते॥

(सुबोधिनी)-रीगृदुपधस्य॥ ऋदुपधस्य धातोः पूर्वस्य रीगागमः॥ ऋदुपधस्येति किम्। चेकीर्त्यते॥ अभ्यासे एकस्वरत्वात्॥ नृती गात्रविक्षेपे। क्षुभ्नादित्वान्न णत्वम्। नरीनृत्यते॥ दृश दर्शने। अतिशयेन पश्यति दरीदृश्यते॥ ग्रह उपादाने। ओव्रश्चू छेदने। प्रच्छ ज्ञीप्सायाम्। ग्रहादिति सम्प्रसारणम्। जरीगृह्यते॥ वरीवृश्च्यते। परीपृच्छ्यते। रीगिति योगविभागादृभयत्र रीक्॥ कृपू सामर्थ्ये। उभयत्र लत्वम्। चलीक्लृप्यते॥

चङ्खायात्-चङ्खन्यात् । चङ्खनीतु-चङ्खन्तु-- चङ्खातात्, चङ्खाताम्, चङ्खन्तु । चङ्खाहि । अचङ्खनीत-अचङ्खानीत्, अचङ्खानिष्टाम् ॥ योयवीति-योयोति, योयुतः । योयुयात् । योयवीतु--योयोतु । अयोयवीत् ॥ नोनवीति-नोनोति, नोनुतः । नोनुयात् । नोनवीतु-नोनोतु । अनोनवीत्-अनोनोत् । सिपि अनोनवीः-अनोनोः ॥ जाहेति-जाहाति । द्वे स्तौ । जाहीतः । जाहीयात् । जाहेतु-जाहातु-जाहीतात्, जाहीताम् । अजाहेत्-अजाहात्, अजाहीताम्, अजाहुः । जाहीयात् । जाहिता । आतोऽनपि । अजाहासीत्, अजाहासिष्टाम् ॥ दादेति-दादाति, दात्तः, दादति । दादेषि-दादासि, दात्थः, दात्थ । दाद्वः, दाद्मः । दां ह्रौ देहि । दादेयात् । आतोऽनपि । दादिता । दादेः पे । अदादेत्-अदादात्, अदादाताम् ॥ एवं धेट् । दाधेति-दाधाति, दात्तः, दाधति । दाध्यात् । धेहि । दाधेयात् । अदाधासीत्-अदाधेत्--अदाधात्-अदाधत, अदाधताम्, अदाधन् ॥ डुधाञ् । दाधेति--दाधाति, धात्तः । धात्थः । दादेः । दाध्वः, दाध्मः । लङि अदाधात्--अदाधेत् ॥ पितोस्तु । दैप् शोधने । दाप् लवने । दादेति-दादाति, दादीतः, दादति । दादीयात् । दादेतु-दादातु-दादीतात् । दादीहि । अदादेत्-अदादात्, अदादीताम् । दादायात् । अदादासीत् ॥ सास्वपीति-सास्वप्ति, सास्वप्तः, सास्वपति । ह्रौ सास्वब्धि । असास्वपीत्-असास्वप् । सासुप्यात् । असास्वापीत्-असास्वपीत् ॥ कॄ विक्षेपे । चाकरीति-चाकर्ति, चाकीर्तः, चाकिरति । चाकरिता-चाकरीता ॥ तातरीति-तातर्ति, तातीर्तः, तातिरति । तातरीतु-तातर्तु । ॠत इर् । तातीर्तात् । तातीर्हि । अतातरीत्-अतातर्ः । अतातारीत्, अतातारिष्टाम् । अर्तेर्यङ्लुकि द्वित्वे पूर्वस्य र इत्यत्वम् । रुक् । रिग्रीकोस्तु पूर्वस्यासवर्ण इय् । अररीति-अरियरीति-अरियरीति-,अरर्ति-अरियर्ति-अरियर्ति, अर्कतः-अरियृतः-अरियृतः, रुको रिलोप इति लोपः । आरति-अरियति--अरियति । अर्कयात्-अरियृयात्-अरियृयात् । अररीतु-अरियरीतु-अरियरीतु-, अरर्तु-अरियर्तु-अरियर्तु-, आरतु-अरियतु-अरियतु । आररीत्-आरियरीत्-आरियरीत् । आरः-आरियः-आरियः । आररुः-आरियरुः-आरियरुः । सिपि आररीः-आरियरीः-आरियरीः । आरः-

आरियः-आरियः।अरराञ्चकार-अरियराञ्चकार।लिङि यादादा-विति रिङ् । आरियात्-आर्यूरियात् २ ।अररिता-अरियरिता-अरियरीता । लुङि आरारीत्-आरियारीत् ॥ गृहू । जर्गृहीति-जरिगृहीति-जरीगृहीति-,जर्गाढि, जर्गृढः, जर्गृहति । जर्गृहीतु-जर्गढु-जर्गृढात् । हो जर्गृढि । अजर्गृहीत्-,अजर्घट्-अजर्घड्॥ग्रह । जाग्रहीति-जाग्राढि । तसादौ ङिन्निमित्तं संप्रसारणम् ।तस्य बहिरङ्गत्वेनासिद्धत्वान्न रुगादयः । जागृढः, जागृहति । जाग्रहीषि-जाग्रक्षि। जागृढि । जाग्रहिता ॥ गृधु ।जर्गृधीति-जर्गर्धि, जर्गृद्धः, जर्गृधति । जर्गृधीषि-जर्घर्त्सि । अजर्गृधीत्-अजर्घर्त् । सिपि अजर्गृधीः-अजर्घाः । अजर्गर्धीत्, अजर्गर्धिष्टाम् ॥ पाप्रच्छीति-पाप्राष्टि । तसादौ न संप्रसारणम् । श्तिपा निर्देशात् ॥

(सुबोधिनी)-पितः त्स्मो वेट् ॥ यङन्तात्परेषां हसादीनां पितां तकारसकारमकारणामीड्वा स्यात् ॥ यङो लुक्यपि प्रत्ययलक्षणेनात्र यङन्तत्वम् । वोभवीति-वोभोति, वोभूतः । द्वेरित्यन्तोऽत् हुन्वोरेवापीति नियमात् नुधातोरित्युव् । वोभुवति। वोभूयात् । लोटि वोभवीतु-वोभोतु-वोभूतात् । लङि अवोभवीत्-अवोभोत्, अवोभूताम् । अन उस् इत्यन उस् । उसि गुण इति गुणे अवोभवुः । कासादिप्रत्ययादित्याम् । वोभवांचकार । वोभूयात् । सिसतासीस्यपामितीट् ॥ वोभविता । वोभविष्यति । अवोभाविष्यत् । लुङि दादेः पे इति सेर्लुक् । यङ्लुकि सतीतीट्पक्षे गुणं बाधित्वा नित्यत्वाद्भुवः सि लोपे स्वरे इति वुक् ।अवोभूवीत्। भुवः सिलोपेऽयङ्लुकि गुणो नेत्यनिषेधाद्गुणः। अवोभोत्, अवोभूताम्, अन उस् इत्यन उस् ।नित्यत्वाद्वुक् अवोभूवुः॥डुपचष् पाके । आत इति पूर्वस्यात्वम् । पापचीति-पापक्ति । पापच्यात् । पापक्तु--पापचीतु-पापक्तात्।अपापचीत्-चोः कुरिति कः।दिस्योर्हसादिति दिप्सिपोर्लोप । अपापक् ।पापचांचकार।पापच्यात्।पापचिता। पापचिष्यति ।अपापचिष्यत्।अतो हसादेरिति वा वृद्धिः । अपापाचीत्-अपापचीत्॥ भुज पालनाभ्यवहारयोः॥ द्वेः स्वरेपि नोपधाया इत्यनेन चतुर्षु गुणो न । यङीति पूर्वस्य गुणः । वोभुजीति-चोः कुरिति गः । खसे चपा इति गस्य कः । वोभोक्ति । वोभुज्यात् । वोभुजीतु-वोभोक्तु । अवोभुजीत्-दिस्योरिति दिप्सिपोर्लोपः । अवोभोक् । वोभोजांचकार । वोभुज्यात् । वोभोजिता । वोभोजिष्यति । अवोभोजिष्यत् । अवोभोजीत् । वद व्यक्तायां वाचि । आत इति पूर्वस्यात्वम् । वावदीति-खसे चपा इति तः । वावत्ति । वावद्यात् । वावदीतु-वावत्तु-वावत्तात् । अवावदीत्-अवावत् । वावदांचकार।वावद्यात् । वावदिता । वावदिष्यति । अवावदिष्यत् । अवावादीत् ॥ घट चेष्टायाम् । आत इति पूर्वस्यात्वम् । जाघटीति-ष्टुभिः ष्टुरिति टः । जाघट्टि । जाघट्यात् । जाघटीतु-जाघट्टु

जाघट्टात् । अजाघटीत्–दिस्योरिति दिप्सिपोर्लोपः । अजाघट् । जाघटांचकार । जाघट्यात् । जाघटिता । जाघटिष्यति । अजाघटिष्यत् । अजाघाटीत्–अजाघटीत् । अतो हसादेर्लघोरिति वा वृद्धिः ॥ स्पर्द्ध संघर्षे । संघर्षः पराभिभवेच्छा । आत इति पूर्वस्यात्वम् । यङ्लुकीतीट् । पास्पर्द्धीति–ईडभावे तथोर्द्ध इति धत्वम् । हसात्परस्य झसस्येति धलोपे । पास्पर्धि–धलोपाभावे झबे जबा इति दत्वम् । पास्पर्द्धि । सिपि दलोपे खसे चपा इति तः । पास्पर्त्सि–पक्षे पास्पर्त्सि । पास्पर्द्ध्यात् । पास्पर्द्धीतु–पास्पर्द्धु । तुह्योरिति तातङ् । पास्पर्द्धात् । हौ झसाद्धिर्हेरिति धत्वे हसादिति धलोपे पास्पर्धि–धलोपाभावे दत्वम् । पास्पर्द्धि । लङि अपास्पर्धीत्–ईडभावे दिस्योर्हसादिति दिप्सिपोर्लोपः । संयोगान्तस्येति धलोपः । वावसाने इति वा तः । अपास्पर्द्–अपास्पर्त् । सिपि तु अपास्पर्द्धीः–पक्षे दः इति दस्य रः । रिलोपो दीर्घश्चेति रलोपपूर्वदीर्घौ । अपास्पाः । पास्पर्द्धांचकार । पास्पर्ध्यात् । पास्पर्धिता । पास्पार्धिष्यति । अपास्पर्द्धिष्यत् । लुङि सिसतासीस्यपामितीट् । सेरितीट् । इट ईटीति सिलोपः । अपास्पर्धीत् ॥ गाधृ प्रतिष्ठादौ । तथोर्ध इति धः । झबे जबा इति दः । जागाद्धि–ईट्पक्षे जागाधीति । सिपि आदिजबानामिति घः । खसे चपा इति धस्य तः । जाघात्सि । जागाध्यात् । जागाधीतु-जागाद्धु । हौ झसादिति र्होर्धिः । जागाद्धि । अजागाधीत्–आदिजबानामिति घः । अजाघात् । सिपि अजागाधीः । ईटभावे दिस्योरिति सिलोपः। वावसानेवादः । द इति दस्य रः । आदिजबानामिति घः अजाघाः--अजाघात् । लुङि अजागाधीत्, अजागाधिष्टाम् । नाथृ नाधृ याच्ञादौ । आत इति पूर्वस्यात्वम् । नानाथीति--खसे चपा इति यस्य तः । नानात्ति–नानाथ्यात् नानाथीतु–नानात्तु-नानात्तात् । अनानाथीद् । अनानात् । लुङि अनानाथीत, अनानाथिष्टाम् ॥ दध धारणे । ईट्पक्षे दादधीति–पक्षे तथोर्ध इति धः । झबे जबा इति दः । दादद्धि । सिपि आदिजबानामिति धः । दाधत्सि । दादध्यात् । दादधीतु । दादद्धु–दादद्धात् । हौ झसाद्धिर्हेरिति धिः । दादद्धि । लङि अदादधीत्–ईडभावे आदिजबानामिति धः । अदाधत् । सिपि द इति दस्य रः । अदाधः–अदाधत्–अदादधीः । लुङि अतो हसादेर्लघोरिति वा वृद्धिः । अदादाधीत्–अदादधीत ॥ स्कुदि आप्रवणे । इदितो नुमिति नुम् । चोस्कुन्दीति–ईडभावे चोस्कुन्ति । चोस्कुन्द्यात् । चोस्कुन्दीतु–चोस्कुन्तु–चोस्कुन्तात् । अचोस्कुन्दीत् । दिस्योर्हसादिति दिप्सिपोर्लोपः । संयोगान्तस्येति दलोपः । अचोस्कुन् । लुङि अचोस्कुन्दीत् ॥ मुद हर्षे मोमुदीति । ङे: स्थेऽपि न गुणः । मोमोत्ति । मोमुद्यात । मोमुदीतु–मोमोत्तु–मोमुत्तात । अमोमुदीत–अमोमोत । सिपि द इति दस्य रः । अमोमोः–अमोमोत । लुङि अमोमोदीत ॥ कुर्द खुर्द गुर्द गुद क्रीडायामाद्योर्हसे दीर्घः । खसेचपा इति दस्य तः । चोकूर्दीति–ईट्पक्षे चोकूर्दीति । चोकूर्द्यात । चोकूर्दीतु–चोकूर्तु–चोकूर्त्तात ।

हौ झसाद्धिर्हेरिति धिः । चोकूर्द्धि । अचोकूर्दीत्–अचोकूर्त् । रात्सस्येति तलोपो न । सिपि द् इति दस्य रः । रात्सस्येति सलोपः । र्वोर्वि हसे इति दीर्घः । अचोकूः–अचोकूर्दीः । लुङि अचोकूर्दीत् ॥ डुकृञ् करणे । ऋदन्तानामृदुपधानां च यङ्लुकि पूर्वस्य रुक्रिक्रीकः ॥ अतिशयेन करोति चर्करीति–ईडभावे चर्कर्त्ति । द्वेरित्यन्तोत् । रत्वम् । चर्क्रति । विधिलिङि चर्क्रियात् । लोटि चर्करीतु–चर्कर्त्तु–चर्कृतात् । लङि अचर्करीत् । ईडभावे दिस्योर्हसादिति दिप्सिपोर्लोपः । अचर्कः । आशिषि लिङि यादादाविति रिङ् । चर्क्रियात् । लुङि णित्वे इति णित्वात् धातोर्नामिन इति वृद्धिः । अचर्कारीत् ॥ वृतु वर्त्तने । लटि ईट्पक्षे द्वेः स्वरेऽपीति न गुणः । वर्वृतीति-ईडभावे वर्वर्ति । विधिलिङि वर्वृत्यात् । लोटि इटि वर्वृतीतु–ईडभावे वर्वर्तु–वर्वृतात् । हौ झसाद्धिर्हेरिति धिः । वर्वृद्धि । लङि अवर्वृतीत् । ईडभावे रात्सस्येति तलोपो न अवर्वर्त । दिस्योर्हसादिति दिप्सिपोर्लोपः । सिपि पक्षे वावसाने इति दः । द् इति दस्य रः । रिलोपो दीर्घश्चेति रलोपपूर्वदीर्घौ । अवर्वाः–अवर्वत् । ईटि अवर्वृतीः । लिटि वर्वर्त्तामास । वर्वृत्यात् । वर्वर्तिता । लृटि गणनिर्दिष्टत्वात् वृतादिभ्यः स्यसयोरिति न । वर्वर्तिष्यति । अवर्वर्तिष्यत् । लुङि गणानिर्दिष्टत्वात् लिदुपादेरिति ङो न । अवर्वर्तीत् ॥ वञ्चु गतौ । गत्यर्थात्कौटिल्ये इति यङ् । वञ्चु स्रंसु इति पूर्वस्य नीगागमः । लुकि न । तन्निमित्तमिति यङो लुका लुप्तत्वात्तदाश्रितो नलोपो न । वनीवञ्चीति–ईडभावे वनीवङ्क्ति, तसो ङित्त्वादिह स्यादेव नो लोप इति नलोपः । वनीवक्तः, द्वेरित्यन्तोऽत् । वनीवञ्चति । वनीवच्यात् । वनीवञ्चीतु–वनीवङ्क्तु–वनीवक्तात् । हौ झसादिति हेर्धिः । वनीवाग्धि । अवनीवञ्चीत्–ईडभावे संयोगान्तस्येति चलोपः । अवनीवन् । लुङि अवनीवञ्चीत् ॥ गम्लृ गतौ । जमजपामिति पूर्वस्य नुक् जङ्गमीति-ईडभावे जङ्गन्ति, लोपस्त्वनुदात्ततनामिति मलोपः । जङ्गतः, गमां स्वरे इत्युपधालोपः । जङ्ग्मति । मो नो धातोरिति नः । जङ्गन्मि । जङ्गम्यात् । जङ्गमीतु–जङ्गंतु–जङ्गतात् । हौ लोपस्त्वनुदात्ततनामिति मलोपस्यासिद्धत्वादत इति न हेर्लुक् । जङ्गहि । अजङ्गमीत् । ईडभावे दिस्योरिति दिप्सिपोर्लोपः । मो नो धातोरिति नः । अजङ्गन् । अनुबन्धनिर्दिष्टत्वात् लिदुपादेरिति न ङः । ह्यन्तेति न वृद्धिः । अजङ्गमीत् ॥ हन हिंसागत्योः । पूर्वाद्धन्तेरिति हस्य घः । यद्यपि हन्तेरिति श्तिपा निर्देशस्तथापि यङ्लुकि भवत्येवेति न्यासकारः । श्तिपा शपेति निषेधस्यानित्यत्वात् । जमजपामिति पूर्वस्य नुक् । जङ्घनीति–ईडभावे जङ्घन्ति, तासि लोपस्त्वनुदात्ततनामिति नलोपः । जङ्घतः, गमां स्वरे इत्युपधालोपः । द्वेरित्यन्तोऽत् । जङ्घ्नति । जङ्घन्यात् । जङ्घनीतु–जङ्घन्तु–जङ्घतात् । जहेर्धि र्णावीति सूत्रे अयङ्लुकीति वक्तव्यम् । तेन जङ्घहि । अजङ्घनीत् । ईडभावे अजङ्घन् । न्द्वनांचकाग हनो लुङ्लिङोर्वध इति वधादेशः । द्वित्वविशिष्टस्य हनो वधादेशाद्वधादेशस्य पुनर्द्विर्वचनं न । वध्यात् । अवधीत् । आङ्पूर्वात्तु आङो यमहन इत्यात्मनेपदम् । आजंघते । हत्या।

प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमित्युक्तत्वात् ॥ चर गतौ भक्षणे च । लुपसदेति गर्हायां यङ् । यङो लुक् । जमजपामिति नुक् । चरफलोरित्युत्वम् । उतस्तपरत्वान्न गुणः । य्वोर्वि हसे इति दीर्घस्तु स्यादेव । चञ्चूर्ति–ईट्पक्षे चञ्चुरीति । चञ्चूर्यात् । चञ्चुरीतु–चञ्चूर्तु–चञ्चूर्तात् । अचञ्चूः । पदान्तविषयत्वात् य्वोर्वि हसे इति दीर्घः । अचञ्चुरीत् ॥ खनु अवदारणे । जमजपामिति नुक् । चङ्खनीति–चङ्खन्ति, जनसनेत्यात्वम् । चङ्खातः । जनसनेत्यत्र हकारे चेति वाच्यम् । तेन हावप्यात्वम् । चङ्खाहि । अचङ्खनीत्–अचङ्ख । आशीर्लिङि जनसनेति वात्वम् । चङ्खायात्–चङ्खन्यात् । लुङि अतो हसादेरिति वा वृद्धिः । अचंखानीत्–अचंखनीत् ॥ यु मिश्रणेऽमिश्रणे च । 'आरौ'इति सूत्रेऽद्विरुक्तस्येत्युक्तत्वादुत औत्वं नायङीति पूर्वस्य गुणः । योयोति । ईट्पक्षे योयवीति । नुधातोरित्युव् । योयुवति । योयुयात् । योयवीतु–योयोतु–अयोयोत्–अयोयवीत् । आशिषि ये इतिदीर्घः । योयूयात् । लुङि णित्वे इति णित्त्वाद् धातोर्नामिन इति वृद्धिः । अयोयावीत् ॥ णु स्तुतौ । नोनवीति–नोनोति । नोनुयात् । नोनवीतु–नोनोतु–नोनुतात् । अनोनवीत्–अनोनोत् । उसि गुण इति गुणे । अनोनवुः । लुङि अनोनावीत् ॥ ओहाक् त्यागे । ओहाङ् गतौ । अनयोस्तुल्यानि रूपाणि । ङित्त्वप्रयुक्तस्यात्मनेपदस्य यङ्लुक्यप्रवृत्तेः । भृञां लुकीतीत्वस्य लुङ्निमित्ते द्वित्व एव विहितत्वाच्च आत इति पूर्वस्यात्वम् । ईट्पक्षे जाहेति–जाहाति, द्वेस्तावितीत्वम् । जाहितः, इह ङिति हसे भीहाको रित्वितीत्वं न । अनुबन्धनिर्दिष्टत्वात् । द्वेरित्यन्तोऽत् । द्वेस्तावित्यालोपः । जाहति । जाहेषि–जाहासि, जाहीथः, जाहीथ । जाहेमि–जाहामि, जाहीवः–जाहीमः । द्वेस्तावितीत्वम् । जाहीयात् । इह हाको यादादावालोप इत्यालोपो न अनुबन्धनिर्दिष्टत्वात् । जाहेतु–जाहातु–जाहीतात् । हौ द्वेस्तावितीत्वम् । जाहीहि । इह ईर्वाहाविति ह्रस्वदीर्घविकल्पे रूपत्रयं न । जहातेरिति श्तिपा निर्दिष्टत्वात् । अजाहेत्–ईडभावे अजाहात् । आशिषि जाहायात् । इह दादेरे इत्येत्वं दादेरिति इत्वं च न । हागित्युभयत्रानुबन्धनिर्दिष्टत्वात् ॥ जाहेता । लुङि यमिरमिनमातामितीट्सकौ । अजाहासीत्, अजाहासिष्टाम्, अजाहासिषुः ॥ डुदाञ् दाने । आत इति पूर्वस्यात्वम् । दादाति–ईट्पक्षे दादेति, दादेरित्यालोपः । दात्तः, द्वेरित्यन्तोऽत् । दादति । दादासि–दादेषि । दाद्यात् । दादेतु–दादातु–दात्तात् हौ दां हावित्येत्वपूर्वलोपौ । देहि–दात्तात् । अदादात्–अदादेत् । दादाञ्चकार । दादेरे इत्येत्वम् । दादेयात् । दादेता । दादेष्यति । आदादेष्यत् । 'दादेःपे' इति सिलोपः अदादात् ॥ धेट् पाने । दाधाति–दाधेति, दादेरित्यालोपः । खसे चपा झसानामिति तः । दात्तः, तथोर्धं इति धत्वं न दादेरित्यालोपस्य स्थानिवत्त्वेन झसान्तत्वाभावात् । तत्र सूत्रे व्यवस्थितार्थं कृग्रहणानुवृत्तेर्वा । दाधति । दाध्यात् । दाधातु–दाधेतु–दात्तात् । दाधतु । हौ दां हावित्येत्वपूर्वलोपौ । धेहि । अदाधात्–अदाधेत् । दाधांचकार । दादेरे इत्येत्वम् । दाधेयात् । दाधेता । दाधे-

ष्यति । अदाधेष्यत् गाछासाघाधेटामिति वा सिलोपः ।अदाधात्-पक्षे यमिरमिनमातामितीट्सकौ । अदाधासीत्-धेटो भूतमात्रे दिवादिपरो ङो वेति ङः । अदाधत् ॥ डुधाञ् धारणादौ । दाधाति-दाधेति, पूर्वस्य ञिति झसे ध इति धः । खसे चपा इति तः । धात्तः, दाधति । दाध्यात् ।दाधातु-दाधेतु-धात्तात् ।हौ दां हाविस्येत्वपूर्वलोपौ । धेहि । अदाधात्-अदाधेत् । दाधांचकार । दादेरे इत्येत्वम् । दाधेयात् । दाधेता । दाधेष्यति । अदाधेष्यत् । 'दादेः पे' इति सिलोपः । अदाधात् ॥ दाप् लवने । दैप् शोधने । आदादिकभौवादिकयोरनयोर्दादित्वम् । दादाति-दादेति, द्रेस्ताविति ईत्वम् । दादीतः । द्रेरित्यन्तोऽत् । द्रेस्ताविल्यालोपः दादति । दादीयात् ।दादातु--दादेतु--दादीतात् । हौ दादीहि । अदादात्--अदादेत् । दादांचकार । दादायात् । दादेता । दादेष्यति।अदादेष्यत्।यमिरमिनमातामितीट्सकौ ।अदादासीत्॥ञिष्वप् शये।सर्वविधिभ्यो लुग्विधिर्बलीयान् इति यङो लुक्।लुका लुप्ते प्रत्ययलक्षणत्वाभावात् स्वपिस्यमिव्येञां यङीति विधीयमानं यत्संप्रसारणं तन्न भवति।रुदादेश्चतुर्णां हसादेरिति गणानिर्दिष्टत्वादिण्न।आत इति पूर्वस्यात्वम् ।ईट्पक्षे सास्वपीति--ईडभावे सास्वप्ति,सास्वप्तः, सास्वपति । सास्वप्यात् ।सास्वपीतु-सास्वप्तु--सास्वप्तात् ।हौ झसाद्धिरिति धिः । झबे जबा इति बः । सास्वाब्धि । रुधादिगणानिर्दिष्टत्वाद्दिस्योरीडटौ न । असास्वपीत्-असास्वप् । सास्वपांचकार । आशिषि यजामिति संप्रसारणम् । सासुप्यात ।सास्वपिता । सास्वपिष्यति । असास्वपिष्यत् ।अतो हसादेरीति वा वृद्धिः।असास्वापीत्-असास्वपीत् ॥कृ विक्षेपे।आत इति पूर्वस्यात्वम् । ऋदन्तानामिति तपरत्वाद् रुक्रिक्रीको न भवन्ति । ईट्पक्षे चाकरीति--ईडभावे चाकर्ति, ऋत इरिति र्वोर्वि हसे इति दीर्घः । चाकीर्त्तः, द्रेरित्यन्तोऽत् । चाकिरति । चाकीर्यात् ।चाकरीतु-चाकर्तु-चाकीर्तात् । चाकीर्हि।अचाकरीत्--ईडभावे दिस्योर्हसादिति दिप्सिपोर्लोपः।अचाकः। उसि गुणः । अचाकरुः । चाकरांचकार ।चाकीर्यात् । चाकरिता । चाकरिष्यति। अचाकरिष्यत्।लुङि 'णित्वे' इति णित्त्वात् धातोर्नामिन इति वृद्धिः।अचाकारीत्॥तॄ प्लवनतरणयोः । तातरीति-तातर्ति । तातीर्यात् । तातरीतु--तातर्तु--तातीर्त्तात्।अतातरीत्--अतात । तातरांचकार । तातीर्यात् । तातरिता ।तातरिष्यति।अतातरिष्यत्। अतातारीत्, अतातारिष्टाम् ॥ ऋ गतौ । भौवादिकजौहोत्यादिकयोर्ग्रहणम् । अस्मात् सूचिसूत्रिमूत्रीति यङ् द्वित्वं च । केचित्तु यङीति पूर्वस्य गुणमाहुः । अन्ये तु र इति पूर्वस्यात्वमित्याहुः फले तु न विशेषः । ऋदन्तानामिति पूर्वस्य रुग्रिग्रीगागमाः । अरर्ति--रिग्रीकोस्तु तुल्यं रूपम्।असवर्णे स्वरे पूर्वस्येतीय्।अरियर्ति२--,ईट्पक्षे अररीति-अरियरीति२,तसि अर्र्तः--अरियृतः२,द्रेरित्यन्तोत । ऋ रामिति रः।रि लोपो दीर्घश्चेति रलोपपूर्वदीर्घौ । अरारति--परत्वात्पूर्वमिय् ततो रत्वम् । अरियृति।मध्यमपुरुषे तु अरर्षि--अरियर्षि-ईट्पक्षे-अररीषि,अरियरीषि रिग्रीकोस्तुल्यं रूपम् अर्र्थः-अरियृथः, उत्तमपुरुषे तु अरर्मि-अरियर्मि,ईट्पक्षे अररीमि-अरियरीमि,अर्र्वः अरि-

पाप्रच्छीतु--पाप्रष्टु--पाप्रष्टात्, हौ झषाद्धेर्हिरिति धिः। क्ङिति झसे इति छस्य शः। छशषेति षः। झवे इति षस्य डः। ष्टुत्वं च। पाप्रड्ढि। अपाप्रच्छीत्--ईडभावे दिस्यो-रिति दिप्सिपोर्लोपः। छशषेति षः। षोड इति डः। अपाप्रट्, अपाप्रष्टाम्, अपाप्रच्छुः। अपाप्रच्छीः, अपाप्रट्, अपाप्रष्टम्, अपाप्रष्ट। अपाप्रच्छम्, अपाप्रच्छ्व, अपाप्रच्छ्म। पाप्रच्छांचकार। पाप्रच्छ्यात्। पाप्रच्छिता। पाप्रच्छिष्यति। अपाप्रच्छिष्यत्। अपाप्रच्छीत्॥ हय गतौ। जाहयीति--ईडभावे यवयोर्वसे इति यलोपः। जाहति। उत्तमे तु जाहयीमि--यवयोरिति यलोपे कमोरित्यात्वम्। जाहामि। जाहय्यात्। जाह-यीतु--जाहतु--जाहतात्, जाहताम्, जाहयतु। जाहहि--जाहतात्। उत्तमे तु जाहयानि। लङि अजाहयीत्--अजाहत्। जाहयांचकार। जाहय्यात्। जाहयिता। जाहयिष्यति। अजाहयिष्यत्। ह्म्यन्तेति न वृद्धिः। अजाहयीत्॥ हर्य गतिकान्त्योः। आत इत्या-त्वम्। जाहर्यीति--ईडभावे यवयोर्वसे इति यलोपः। जाहर्ति। जाहर्य्यात्। जाहर्यीतु--जाहर्तु--जाहर्तात्। अजाहर्यीत्। अजाहर्यीत्--अजाहः। जाहर्यांचकार। जाहर्य्यात्। जाहर्यिता। जाहर्यिष्यति। अजाहर्यिष्यत्। अजाहर्यीत्॥

(तत्त्वदी०)--जाहर्तीति॥ यवयोरिति यलोपः॥

(ज्वरत्वरस्रिव्यविमवामुपधावकारयोरूः कौ झसादौ ञमादौ हकारे च प्रत्यये) जाज्वरीति--जाजूर्ति, जाजूर्तः, जाज्वरति। जाज्वर्वः, जाजूर्मः। अजाज्वरीत्--अजाजूः॥ तात्वरीति--तातूर्ति। अतात्वरीत्--अतातूः॥ सेस्रिवीति--सेस्रोति। सेस्रीव्यात्। असे-स्रिवीत्--असेस्रोत्॥ मव बन्धने। मामवीति--मामोति, मामूतः, मामवति। मामावः, मामूमः। मामूहि। मामवानि। अमामवीत्--अमामोत्। सिपि अमामवीः--अमामोः। अमामवम्, अमामाव, अमामूम॥ तुर्वी थुर्वी दुर्वी धुर्वी हिंसायाम्। तोतूर्वीति॥

(सुबोधिनी)--ज्वरत्वरास्रिव्यविमवामुपधावकारयोरूः कौ झसादौ ञमादौ हकारे च प्रत्यये॥ ज्वर रोगे। ञित्वरा संभ्रमे। स्रिवु गतिशोषणयोः। अव पालने। मव बन्धने। ज्वरादेरुदाहरणं क्विपि जूः, जुरौ, जुरः। झसादौ तु जूर्तिः। जूर्णः। जूर्णवान्॥ तूः तुरौ, तुरः। तूर्तिः। तूर्णवान्॥ स्रूः, स्रुवौ, स्रुवः। स्रूतिः॥ ऊः, उवौ, उवः। ऊतिः॥ मूः मुवौ, मुवः। मूतिः। मूतः। ज्वर। आत इति पूर्वस्यात्वम्। जाज्वरीति। ईडभावे उपधावकारयोरूः। जाजूर्ति, जाजूर्तः, जाज्व-रति। जाज्वर्यात्। जाज्वरीतु--जाजूर्तु--जाजूर्तात्। अजाज्वरीत्--अजाजूः। जाज्वरांच-कार। जाज्वर्यात्। जाज्वरिता। जाज्वरिष्यति। अजाज्वरिष्यत्। अतो हसादेरिति वा वृद्धिः। अजाज्वारीत्--अजाज्वरीत्॥ ञित्वरा संभ्रमे। तात्वरीति--तातूर्ति। तात्वर्यात्। तात्वरीतु--तातूर्तु--तातूर्तात्। अतात्वरीत्--अतातूः। तात्वरांचकार। तात्वर्यात्। तात्व-

रिष्यति । अतात्वरिष्यत् । अतात्वारीत्--अतात्वरीत् ॥ षिवु । सेषिवीति--सेष्योति । सेषीव्यात् । सेषिवीतु--सेष्योतु--सेष्यूतात् । असेषिवीत्--असेष्योत् । तिपि । असेष्योः । सेषेवांचकार । सेषीव्यात् । सेषेविता । सेषेविष्यति । असेषेविष्यत् । असेषेवीत् ॥ मव । मामवीति । ईडभावे ऊत्वे कृते गुणः । मामोति । उत्तमे तु मामवीमि--मामोमि । यवयोर्वसे इति वलोपः । म्वोरित्यादम् । मामावः. मामूमः । मामव्यात् । मामवीतु--मामोतु--मामूतात् । हौ मामूहि । अमामवीत्--अमामोत् । उत्तमे तु अमामवम्, अमामाव, अमामूम । लुङि अमामावीत् ॥ तुर्वी हिंसायाम् । र्वोर्वि हसे इति दीर्घः । यङीति पूर्वस्य गुणः । तोतूर्वीति । ईडभावे ॥

(तत्त्वदी०)--उपधावकारयोरिति ॥ उपधा च वकारश्च उपधावकारौ तयोः ह्रस्वो स्थाने ऊरित्यर्थः ॥ मामाव इति । अत्र [illegible] ॥

(रेफाच्छ्वोर्लोपः क्वौ झसादौ अमादौ हे च प्रत्यये) तोतोर्ति, तोतूर्तः, तोतूर्वति । तोतूर्वीषि--तोतोर्षि । तोतूर्वः, तोतूर्मः । सिपि अतोतूर्वीः--अतोतोः ॥ तार्थोर्ति, तोथूर्तः ॥ दोदोर्ति ॥ दोधोर्ति ॥ मुर्च्छा मोहसमुच्छ्राययोः । मोमूर्च्छीति-मोमोर्ति, मोमूर्त्तः, मोमूर्च्छति । मोमूर्मः । अमोमूर्च्छीव ॥ ॥ इति यङ्लुगन्तप्रक्रिया ॥

(सुबोधिनी)-रेफाच्छ्वोर्लोपः क्वौ झसादौ अमादौ हे च प्रत्यये ॥ रेफात्परयोर्धातोःछकारवकारयोर्लोपः स्यात् क्विपि [illegible] । [illegible] रणम् । तुर्वी । तूः, तुरौ, तुरः ॥ धुर्वी । धूः, धुरौ, धुरः ॥ मुर्च्छा । मूः, मुरौ, मुरः । झसादौ तु रेफाच्छ्वोरिति वलोपः । उपधाया लघोरिति गुणः । तोतोर्ति । [illegible] यवयोर्वसे इत्यनेन वलोपःसिध्यति तथापि तोतूर्वः इत्यादौ [illegible] [illegible] । अन्यथा [illegible] यवयोर्वसे इति [illegible] स्यात । तोतूर्व्यात् । तोतूर्वीतु--तोतोर्तु--तोतूर्तात् । अतोतूर्वीत्--अतोतोः । लुङि अतोतूर्वीत् ॥ धुर्वी धुर्वी हिंसायाम् । तोधूर्वीति--तोधोर्ति । तोधूर्वति । [illegible] तोधूर्वीत् । अतोधूर्वीत्--अतोधोः । [illegible] ॥ [illegible] । दोदूर्वीति--दोदोर्ति । दोदूर्व्यात् । दोदूर्वीतु-दोदोर्तु- दोदूर्तात् । अदोदूर्वीत्--अदोदोः । [illegible] ॥ मुर्च्छा मोहसमुच्छ्राययोः । मोमूर्च्छीति । [illegible] लोपः । उपधाया लघोरिति गुणः । मोमोर्ति । [illegible] [illegible] [illegible]

[illegible]

(तत्त्वदी०)-[illegible]

[illegible]

(हसात्तद्धितयस्य लोपो ये च्वौ च) गार्गीयति ॥ वाच्यति ॥ कवीयति ॥ सामिध्यति । सामिधाञ्चकार-सामिध्यांचकार । सामिधिता-सामिध्यिता ॥

(सुबोधिनी)-हसात्तद्धितयस्य लोपो ये च्वौ च ॥ हसादुत्तरस्य प्रत्यययकारस्य लोपो भवति यप्रत्यये च्विप्रत्यये च परे ॥ ण्यायनाणीति ण्यः।च्वौ गार्गीभवति । गार्ग्यमिच्छति गार्गीयति॥वाचमिच्छति अप्ययोरादित्यत्र चपा अेव जबा इत्यकरणेन क्वचित्प्रत्यये पदकार्यं नेति ज्ञापितम् । तेन पदत्वाभावात् चोःकुरिति कुत्वं न । वाच्यामि ॥ आत्मनःकविमिच्छति।' ये ' इति दीर्घः।कवीयति॥ समिधमिच्छति सामिध्यति । हसाद्यस्येति आदेः परस्येति यलोपः । यत इत्यलोपः।तस्य लोपः । तस्य स्थानिवत्त्वादुपधाया लघोरिति गुणो न । सामिधिता-सामिध्यिता ॥

(मान्ताव्ययाभ्यां यो न) किमिच्छति । इदमिच्छति।स्वरिच्छति । उच्चैरिच्छति ॥

(सुबोधिनी)-मान्ताव्ययाभ्यां यो न ॥ मान्तप्रकृतिकान्नाम्नोऽव्ययाच्च यो न । किमिच्छति । स्वरिच्छति ॥

(तत्त्वदी०)मान्ताव्ययाभ्यामिति ॥मान्तमिह नामैव न तु सिवन्तम्।अन्यथा पुत्रमिच्छतीत्यत्रापि मान्तत्वान्न स्यात् ॥

(अश्ववृषयोर्ये सुक् मैथुनेच्छायाम्) अश्वस्यति वडवा। वृषस्यति गौः ॥

(सुबोधिनी)--अश्ववृषयोर्ये सुक् मैथुनेच्छायाम् ॥अश्वस्यति। मैथुनार्थमश्वमिच्छतीत्यर्थः। वृषमिच्छति मैथुनार्थं वृषस्यति ॥

(तत्त्वदी०)-अश्ववृषयोरित्यादि ॥अश्ववृषमेच्छा यदा मैथुनार्था न त्वारोहणार्था तदेव सुगित्यर्थः ।अन्ये तु"इति रामो वृषस्यन्तीम्"इत्यादिप्रयोगदर्शनात्परित्यक्तप्रकृतार्था मैथुनेच्छैवार्थ इत्याहुः ॥

(क्षीरलवणयोर्लालसायां सुक्) क्षीरस्यति बालः।लवणस्यत्युष्ट्रः ।

(सुबोधिनी)-क्षीरलवणयोर्लालसायाम् सुक् ॥ लालसायामुत्कटेच्छायां सुक् ये ॥ क्षीरमिच्छति क्षीरस्यति । लवणस्यति ॥

(तत्त्वदी०)-लालसायामिति॥तृष्णातिरेको लालसा।क्षीरलवणविषय इच्छातिरेको यदाभ्यवहारार्थो न तु होमाद्यर्थस्तदेत्यर्थः ॥

(नाम्नो ये लालसायां सुगसुकौ) दधिस्यति,दध्यस्यति।मधु-, मध्वस्यति।यशस्काम्यति।सर्पिष्काम्यति ॥

(सुबोधिनी)-नाम्नो ये लालसायां सुगसुकौ ॥ नाम्नः सुगसुकावागमौ भवतः य प्रत्यये परे ॥ तृष्णातिरेको लालसा तस्यामर्थे॥दधिस्यतीत्यत्र षः स इति विपरीतनिर्देशान्न षत्वम् ॥

(तत्त्वदी०)--दधिस्यतीति॥षःसइति विपरीतनिर्देशान्न षत्वम्।दधिमधुशब्दाववोग-भिनाविच्छेके । नाम्नो विज्ञानादन्येऽपीत्यन्ये ॥

(मान्ताव्ययाभ्यां काम्यः) किंकाम्यति। स्वःकाम्यति। उच्चैः-काम्यति ॥

(सुबोधिनी)-मान्ताव्ययाभ्यां काम्यः ॥ मान्तप्रकृतिकान्नाम्नोऽव्ययाच्च काम्यः स्यादिच्छायाम् ॥ किमिच्छति किंकाम्यति । स्वः स्वर्गमिच्छति स्वः-काम्यति ॥

(तत्त्वदी०)-स्वःकाम्यतीति॥ [illegible] ॥ [illegible]कर्मत्वेन योगः ॥

करणे च नाम्नः ॥ करणेऽर्थे यः ॥ तपस्यति । तपश्चरतीत्यर्थः ॥

(नमसः पूजायाम्)नमस्यति देवान्।पूजयतीत्यर्थः (वरिवसः परिचर्यायाम्) वरिवस्यति गुरुम् । शुश्रूषत इत्यर्थः ॥

(सुबोधिनी)-करणे च नाम्नः ॥य इत्यनुवृत्तम् । [illegible] इत्यर्थः॥नमस्क-रोति नमस्यति देवान् । पूजयतीत्यर्थः । वरिवस्यति गुरुम् । शुश्रूषत इत्यर्थः ॥

(तत्त्वदी०)-करणे चेति। [illegible] ॥ न तु [illegible] नमस्[illegible] देवाना[illegible]-करोति[illegible] नमः[illegible] [illegible]

तयोने चतुर्थी ॥ वरिवस्यतीति ॥ [illegible] ॥

(शब्दादिभ्यो यङ्)शब्दायते । वैरायते । कलहायते । आभ्रा-यते. मेघायते ॥

(सुबोधिनी)-शब्दादिभ्यो यङ् ॥[illegible] [illegible] [illegible] यङ् ॥ शब्दं करोति शब्दायते । यङो ङित्त्वात् इति [illegible] भवति । [illegible] न्यायसाराः ॥

कष्टाय क्रमणे ॥ कष्टायते ॥

(सुबोधिनी)-कष्टाय क्रमणे ॥ [illegible] यङ् । [illegible] [illegible] कष्टायते । [illegible] ।

([illegible]) [illegible] । [illegible]

(हसात्तद्धितयस्य लोपो ये च्वौ च) गार्गीयति ॥ वाच्यति ॥ कवीयति ॥ समिध्यति । समिधाञ्चकार-समिध्यांचकार । समिधिता-समिध्यिता ॥

(सुबोधिनी)-हसात्तद्धितयस्य लोपो ये च्वौ च ॥ हसादुत्तरस्य प्रत्ययकारस्य लोपो भवति यप्रत्यये च्विप्रत्यये च परे ॥ ण्यायनणीति ण्यः।च्वौ गार्गीभवति । गार्ग्यमिच्छति गार्गीयति॥वाचमिच्छति अप्ययोरादित्यत्र चपा अबे जबा इत्यकरणेन क्वचित्प्रत्यये पदकार्यं नेति ज्ञापितम् । तेन पदत्वाभावात् चोःकुरिति कुत्वं न। वाच्यामि ॥ आत्मनःकविमिच्छति।' ये ' इति दीर्घः।कवीयति॥ समिधमिच्छति समिध्यति । हसाद्यस्याति आदेः परस्याति यलोपः । यत इत्यलोपः।।तस्य लोपः । तस्य स्थानिवत्त्वादुपधाया लघोरिति गुणो न । समिधिता-समिध्यिता ॥

(मान्ताव्ययाभ्यां यो न) किमिच्छति । इदमिच्छति।स्वरिच्छति । उच्चैरिच्छति ॥

(सुबोधिनी)-मान्ताव्ययाभ्यां यो न ॥ मान्तप्रकृतिकान्नाम्नोऽव्ययाच्च यो न । किमिच्छति । स्वरिच्छति ॥

(तत्त्वदी०)मान्ताव्ययाभ्यामिति ॥मान्तमिह नामैव न तु सिवन्तम्।अन्यथा पुत्रमिच्छतीत्यत्रापि मान्तत्वान्न स्यात् ॥

(अश्ववृषयोर्ये सुक् मैथुनेच्छायाम्) अश्वस्यति वडवा। वृषस्यति गौः ॥

(सुबोधिनी)-अश्ववृषयोर्ये सुक् मैथुनेच्छायाम् ॥अश्वस्यति। मैथुनार्थमश्वमिच्छतीत्यर्थः। वृषमिच्छति मैथुनार्थं वृषस्यति ॥

(तत्त्वदी०)-अश्ववृषयोरित्यादि ॥अश्ववृषमेच्छा यदा मैथुनार्था न त्वारोहणाद्यर्था तदेव सुगित्यर्थः ।अन्ये तु"इति गमो वृषस्यन्तीम्"इत्यादिप्रयोगदर्शनात्पारित्यक्तप्रकृत्यर्था मैथुनेच्छार्थ इत्याहुः ॥

(क्षीरलवणयोर्लालसायां सुक्) क्षीरस्यति बालः।लवणस्यत्युष्ट्रः ।

(सुबोधिनी)-क्षीरलवणयोर्लालसायाम सुक् ॥ लालसायामुत्कटेच्छायां सुक् ये ॥ क्षीरमिच्छति क्षीरस्यति । लवणस्यति ॥

(तत्त्वदी०)-लालसायामिति॥तृष्णातिरेको लालसा।क्षीरलवणविषय इच्छातिरेको यदा भक्षणार्थो न तु हेतुमात्रमित्यर्थः ॥

(नाम्नो ये लालसायां सुगसुकौ) दधिस्यति,दध्यस्यति।मधुस्यति, मध्वस्यति।पयस्काम्यति।सर्पिष्काम्यति ॥

दण्डत् । अल्लोपस्य स्थानिवत्त्वान्नलोपो न ॥ स्थूलं करोति । गुर्वादेरिष्ठमेयस्सु गरादिष्टयलोपश्चेति । स्थूलस्य स्थवष्टिलोपाभावश्च । स्थवयति । लुङि अतुस्थवत् । आदेशावयवत्वान्न षः ॥ दूरं करोति । दूरस्य दव् । दवयति । लुङि अदूदवत् । कथं तर्हि 'दूरयत्यवनते विवस्वति' इति । दूरमततीति दूरात् । क्विबन्तः । तं कुर्वतीत्यर्थः ॥ युवानं करोति । युवन्शब्दस्य युव् । यवयति । युवाल्पयोः कन्वेति कन् । कनयति । लुङि अयूयवत् । अचीकनत् । ञिर्डिदिति सूत्रे बहुलग्रहण कर्तव्यम् । तस्मादिह सर्वत्र वृद्ध्यभावः ॥ ह्रस्वं करोति । ह्रस्वस्य ह्रस् । संज्ञापूर्वकाविधेरानित्यत्वाद्बहुलग्रहणाद्वा न वृद्धिः । माधवेन तु विकल्पेन वृद्धिरुदाहृता । ह्रसयति । अजिह्रसत् ॥ क्षिप्रं करोति । क्षिप्रस्य क्षेप् । क्षेपयति । अचिक्षिपत् । क्षुद्रं । करोति । क्षुद्रस्य क्षोदः । क्षोदयति । अचुक्षुदत् ॥ प्रियं करोति । प्रियस्य प्रः । धातोर्नामिन इति वृद्धौ रातो आविति पुक् प्रापयति । अपिप्रपत् ॥ गुरुं करोति । गुरोर्गर् । गरयति । अजीगरत् ॥ स्थिरं करोति । स्थिरस्य स्थः । स्थापयति अतिस्थपत् ॥ बहनमूढिस्तामूढं करोति ऊढयति । ऊढिमाख्यत् औडिढत् ॥

(तत्त्वदी०)-ञाविष्ठवदिति ॥ इष्टे यत्कार्यं दृष्टं संभावित तन्नाम्नो ञावतिदिश्यते ॥ इष्टे यथा विन्मतुवतूना लोपो रभावो गुर्वादेर्गराद्यादेशटिलोपौ तथा ञावपीति बोध्यम् ॥ दवयतीति ॥ दूरं करोति इति विग्रहवाक्यम् । संज्ञापूर्वकत्वेनानित्यत्वाद्वृद्ध्यभावः । टिलोपस्यासिद्धत्वाद्वा । 'दूरयत्यवनते विवस्वति' इत्यत्र तु चेत्यनुवर्त्य व्यवस्थयाऽभावः । यद्वा दूरमतति दूरात् । तं कुर्वतीत्यर्थः ॥ प्रापयतीति ॥ प्रियस्य प्रादेशे वृद्धिपुकौ । आदेशाभावे प्रिययतीत्यपि ॥

(अङि पूर्वढस्य जो वा) औजिढत्-औडिढत् ॥ ऊढं करोति । ऊढयति । औजढत्-औडढत् ॥

(सुबोधिनी)-अङि पूर्वस्य जो वा ॥ पूर्वरूपस्थस्य ढकारस्य जो वा भवति अङ्प्रत्यये परे ॥ औजिढत् ॥ ऊढं करोति ऊढयति । लुङि ढिलोपे च सति ञिसहितस्य द्वित्वे पश्चात्पूर्वाकारो दुर्लभः । अतो ञिनिमित्तः स्वरादेश इत्यनेन ढस्य द्वित्वम् ऊढमाख्यात् औडढत् । जत्वे औजढत् ॥

कर्तुर्यङ् ॥ उपमानात्कर्तुराचारार्थे यङ् ॥ श्येन इवाचरति श्येनायते काकः ॥ पण्डितायते मूर्खः ॥ एतायते । यङ्मानिनोरिति पुंवत् ॥

(सुबोधिनी)-कर्तुर्यङ् ॥ आचारे उपमानादित्यत्र उपमानादित्यनुवृत्तम्, आचारे इति च । उपमानात्कर्तुर्नाम्न आचारे यङ् ॥ आदनुदात्तङित इत्यात् । श्येन इवाचरति । यङ्मानिनोरिति पुंवत् । 'ये' इति दीर्घः । श्येनायते ॥

(सुबोधिनी)-ऊष्मधाष्पधूमेभ्य उद्वमने ॥ एभ्यः कर्मभ्यो यङ्॥ ऊष्माणमुद्वमति । नाम्नो नो लोपशिति नस्य लोपः । ये इति दीर्घः । ऊष्मायते ॥

(तत्त्वदी०)-ऊष्मायत इति ॥ ऊष्माणमुद्वमतीत्यर्थः ॥

ञिर्डित्करणे ॥ नाम्नो ञिप्रत्ययः करणेऽर्थे स च डित् ॥ घटं करोति घटयति । घटयते । अजघटत् ॥ पटयति । पटयते । अपपटत् ॥ अग्वृलोपिनो नाङ्कार्यम् ॥ महान्तं करोति महयति । अममहत् ॥ युवानं करोति यवयति । अयूयवत् । कनयति । अचीकनत् ॥

(सुबोधिनी)-ञिर्डित्करणे ॥ तत्करोति तदाचष्टे वेत्यर्थे नाम्नो ञिः स च डित् ॥ डिति टेरिति डित्त्वाट्टिलोपो भवति । घटमाचष्टे घटयति।लुङि अग्वृलोपित्वादजघटत् ॥ पटमाचष्टे पटयति । लुङि परत्वाद्वृद्धौ सत्यां टिलोपः। अपीपटत् । भाष्ये तु वृद्धेर्लोपो बलीयानित्युक्तम् ।तेन पूर्वं लोपस्ततोऽग्वृलोपित्वान्नाङ्कार्यम्। अपपटत्। महान्तमाचष्टे महयति ॥

(तत्त्वदी०)-ञिर्डितकरणे ॥ ड् इत् यस्य स डित् । अतिदेशोऽयं न तु संज्ञा।तथात्वे तु डिति टेरित्यादावस्यैव ग्रहणं स्यान्न तु ड्इत् यस्य तस्य ।कृत्रिमाकृत्रिमयोःकृत्रिमस्यैव ग्रहणमित्युक्तत्वात् । अथ कथं वार्तिं विनाति देशबोधनम् इति चेच्छृणु ।अडितं डिदित्याह डिद्वादीति गम्यत इति भाष्योक्तेः ॥

(आविष्ठवत्कार्यम्) स्फिरं करोति स्फापयति । अपिस्फपत् ॥ उरुम् वरयति । अवीवरत् ॥ बहुलम् बंहयति । अबबंहत् ॥ वृद्धम् वर्षयति । अववर्षत् ॥ तृप्रम् त्रपयति । अतित्रपत् ॥ दीर्घम् द्राघयति । अदद्राघत् ॥ वृन्दारकम् वृन्दयति । अववृन्दत् ॥ अन्तिकम् नेदयति । अनिनेदत् ॥ स्थूलम् स्थवयति । अतुस्थवत् ॥ दूरम् दवयति अदूदवत् ॥ ह्रस्वं ह्रसयति । अजिह्रसत् ॥ क्षिप्रम् क्षेपयति । अचिक्षिपत् ॥ क्षुद्रं करोति क्षोदयति । अचुक्षोदत् ॥ प्रियं करोति प्रापयति । अपिप्रपत्॥ गुरुं करोति । गरयति । अजीगरत् ॥ स्थिरं करोति स्थापयति । अतिस्थपत् ॥ऊढिं करोति ऊढयति। ञेरङ् द्विश्च । स्वरादेः परः ॥

(सुबोधिनी)-आविष्ठवत्कार्यम्॥ इष्ठप्रत्ययेपरेतोयत्कार्यंदृष्टंसंभावितंचतन्नाम्नो ञावप्यतिदिश्यते॥इष्ठेयथा विन्वतुमतूनांलोपो रभावोगुर्वादेर्गराद्यादेशटिलोपो तद्वत् ञावपि स्युः ॥ स्रग्विणमाचष्टे स्रजयति। अग्निमन्तमाचष्टे अग्नयति। दण्डवन्तमाचष्टे दण्डयति। लङि असस्रजत् । अत्र पूर्वस्येत्वं तु न भाष्यासंमतत्वात् ।अजिग्नयत्।अद-

दण्डत् । अल्लोपस्य स्थानिवत्त्वान्नलोपो न ॥ स्थूलं करोति । गुर्वादेरिष्ठेमेयस्सु गरादिष्टचलोपश्चेति । स्थूलस्य स्यवष्टिलोपाभावश्च । स्यवयति । लुङि अतुस्यवत् । आदेशावयवत्वान्न षः ॥ दूरं करोति । दूरस्य दव् । दवयति । लुङि अदूदवत् । कथं तर्हि 'दूरयत्यवनते विवस्वति' इति । दूरमततीति दुरात् । क्विबन्तः । तं कुर्वतीत्यर्थः ॥ युवानं करोति । युवन्शब्दस्य युव् । यवयति । युवाल्पयोः कन्वेति कन् । कनयति । लुङि अयूयवत् । अचीकनत् । ञिडिदिति सूत्रे बहुलग्रहण कर्तव्यम् । तस्मादिह सर्वत्र वृद्ध्यभावः ॥ ह्रस्व करोति । ह्रस्वस्य ह्रस् । संज्ञापूर्वकविधेरानित्यत्वाद्बहुलग्रहणाद्वा न वृद्धिः । माधवेन तु विकल्पेन वृद्धिरुदाहृता । ह्रसयति । अजिह्रसत् ॥ क्षिप्रं करोति । क्षिप्रस्य क्षेप् । क्षेपयति । अचिक्षिपत् । क्षुद्रं । करोति । क्षुद्रस्य क्षोदः । क्षोदयति । अचुक्षुदत् ॥ प्रिय करोति । प्रियस्य प्रः । धातोर्नामिन इति वृद्धौ रातो आविति पुक् प्रापयति । अपिप्रपत् ॥ गुरुं करोति । गुरोर्गर् । गरयति । अजीगरत् ॥ स्थिरं करोति । स्थिरस्य स्थः । स्थापयति आतिस्थपत् ॥ वहनमूढिस्तामूढिं करोति ऊढयति । ऊढिमाख्यत् औडिढत् ॥

(तत्त्वदी०)-आविष्ठवदिति ॥ इष्टे यत्कार्यं दृष्टं संभावितं तन्नाम्नो आवतिदिश्यते ॥ इष्टे यथा विन्मतुवतूनां लोपो रभावो गुर्वादेर्गराद्यादेशटिलोपौ तथा आवतीति बोध्यम् ॥ दवयतीति ॥ दूर करोति इति विग्रहवाक्यम् । संज्ञापूर्वकत्वेनानित्यत्वाद्वृद्ध्यभावः । टिलोपस्यातिदेशाद्वा । 'दूरयत्यवनते विवस्वति' इत्यत्र तु वेत्यनुवर्त्य व्यवस्थयाऽभावः । यद्वा दूरमतति दूरात् । तं कुर्वतीत्यर्थः ॥ प्रापयतीति ॥ प्रियस्य प्रादेशे वृद्धिपुकौ । आदेशाभावे प्रिययतीत्यपि ॥

(अङि पूर्वढस्य जो वा) औजिढत्-औडिढत् ॥ ऊढं करोति । ऊढयति । औजढत्-औडढत् ॥

(सुबोधिनी)-अङि पूर्वस्य जो वा ॥ पूर्वरूपस्यास्य ढकारस्य जो वा भवति अङ्प्रत्यये परे ॥ औजिढत् ॥ ऊढं करोति ऊढयति । लुङि टिलोपे च सति अभिसंहितस्य द्वित्वे पश्चात्पूर्वाकारो दुर्लभः । अतो अनिमित्तः स्वरादेश इत्यनेन ढस्य द्वित्वम् ऊढमाख्यात् औडढत् । जत्वे औजढत् ॥

कर्तुर्यङ् ॥ उपमानात्कर्तुराचारार्थे यङ् ॥ श्येन इवाचरति श्येनायते काकः ॥ पण्डितायते मूर्खः ॥ स्त्रायते । यङ्मानिनोरिति पुंवद् ॥

(सुबोधिनी)-कर्तुर्यङ् ॥ आचारे उपमानादित्यद्वयमुपमानादित्यनुवृत्तम्, आचारे इति च । उपमानात्कर्तुराचारे यङ् ॥ [illegible] । श्येन इवाचरति । [illegible] पुंवत् । [illegible] दीर्घः । श्येनायते ॥

(यङि वा सलोपः) पयायते-पयस्यते वा तक्रम् ॥

(सुबोधिनी)-यङि वा तलोपः ॥ सान्तस्य कर्तुः सस्य वा लोपः ॥

(अप्सरसोजससुमनसां नित्यम्) अप्सरायते ॥ ओजायते दुर्बलः ॥ सुमनायते ॥

(सुबोधिनी)-अप्सरसोजससुमनसां नित्यम् ॥ ओजःशब्दस्तद्वति वृत्तौ ओजस्वीवाचरतीति ओजायते ॥

(तत्त्वदी०)-अप्सरायते इति॥ अप्सरा इवाचरतीत्यर्थः॥ ओजायत इति ॥ओजःप्रभृतयो वृत्तिविषये तद्वति वर्तन्ते ॥

(नाम्न आचारे क्विब् वा) कृष्ण इवाचरति कृष्णति। अकृष्णत्॥ अ इवाचरति अति, अतः, अन्ति । एव, एताम्, एयुः । अतु-अतात्, अताम्, अन्तु । अ-अतात्, आत्, आताम्, आन् । आः । लिटि औ, अतुः, उः । इथ । यात् । इता । आसीत्, आसिष्टाम् ॥ मालेवाचरति । मालाति । मालायात् ॥ मालाहि । अमालात् । मालांचकार । मालिता । अमालासीत् ॥ कविरिवाचरति कवयति । अकवयत् ॥

(सुबोधिनी)-नाम्न आचारे क्विब् वा॥ कर्तुरुपमानान्नाम्नः क्विप् वा स्यादाचारेऽर्थे ॥नाम स्वमिवन्तं ग्राह्यम् । तेन विभक्त्याश्रितं कार्यं न । पक्षे यङ्।कृष्ण इवाचरतीति स धातुरिति धातुत्वात्तिवादिः । 'अदे' इत्यलोपः । कृष्णति ॥ अः कृष्णस्तद्वदाचरति । 'अदे' इत्यलोपः । अति । लिटि तु कासादिप्रत्ययादिति सूत्रस्य वृत्तौ प्रत्ययग्रहणमपनीयानेकस्वरे युक्तेर्नाम् । द्वित्वे 'अदे' इत्यलोपे प्राप्ते परत्वादाम्वोणादाविति पूर्वस्यात्वं तत आतो णव् डाविति डौ । डित्त्वाट्टिलोपः।औ आतोऽनपीत्यालोपे। अतुः। लुङि यमिरमिनमातामितीट्सकौ । आसीत् ॥ मालेवाचरति मालाति । लिट्यनेकस्वरत्वादाम् । मालांचकार।लुङि अमालासीत् ॥ कविरिवाचरति कवयति । कवयांचकार । आशिषि 'ये' इति दीर्घः । कवीयात् ॥

(तत्त्वदी०)-नाम्न आचार इति॥ अत्रासिवन्त नाम गृह्यते न तु सिवन्तम् तेन पदकार्यं न॥ औ इति ॥सवर्णदीर्घेणानेकस्वरत्वाभावादाम्न । अतुसादिषु दीर्घः। आतोऽनपीत्यालोपः इता ॥ यत इत्यलोपः । गुणस्तु प्रत्ययावयवत्वान्न हि निमित्तं कार्यत्वेनाश्रीयते॥ आसीदिति ॥ यमिरमीति सगिटौ ॥ मालातीति ॥ लिङ्गविशिष्टपरिभाषया ॥

(नामधातोर्वृद्धिर्वा सौ) अकवायीत्-अकवयीत् ॥ विरिवाचरति । वयति । विवाय, विव्यतुः । अवायीत्-अवयीत् ॥ श्रीरिवाचरति । श्रयति । शिश्राय, शिश्रियतुः । अश्रायीत्-अश्रयीत् ॥ पितेवाचरति पितरति । पितरांचकार । यादावाविति रिङ् ।

पित्रियात्॥भूरिवाचरति भवति । बुभाव । अभावीत् ॥ द्रुरिवाचरति द्रवति । अद्रावीत् ।

(सुबोधिनी)–नामधातोर्वृद्धिर्वा सौ॥सिप्रत्यये परे लुङि कैयटमते न वृद्धिः। माधवस्तु नामधातोरपि वृद्धिमिच्छति । पिः पक्षी तद्वदाचरति पयति।लिटि नुधातोरिति यः । पिप्यतुः । आशिषि यादादाविति रिङ् । पित्रियात्।'दादेः' पिङीति सिद्धम्। भुवः सिलोपे इति भुवो वुगिति चाडुक् आभ्वोरित्यनेनात्र चास्य न अभिव्यक्तत्वेन धातुपाठस्थस्यैव तत्र ग्रहणात् । बुभाव।अभावीत्। श्रिस्रुद्रुभ्य इति ङो न धातुपाठस्थत्वाभावात् । अद्रावीत् ॥

(तत्त्वदी०)–बुभावेति ॥ आभ्वोर्णादौ भुवो वुगिति च न तत्र धातुपाठस्थस्यैव ग्रहणात्॥

ञमस्य क्ङिति झसे ॥ ञमान्तस्य धातोर्दीर्घःस्यात्क्ङिति झसे क्वौ हे च । इदमिवाचरति इदामति ॥ राजेवाचरति राजानति । राजायते ॥ मन्था इवाचरति मथीनति ॥ ऋभुक्षा इवाचरति ऋभुक्षीणाति ॥ द्यौरिवाचरति द्यवति । दुद्याव । द्यूयात् । द्याविता॥ क इवाचरति कति । चकौ । चकेत्यन्ये ॥ स्व इवाचरति स्वति । सस्वौ । सस्व इत्यन्ये ॥

(सुबोधिनी)–ञमस्य क्ङिति झसे ॥ ञमान्तस्य धातोर्दीर्घः स्यात् क्वौ झसादौ हकारे च क्ङिति ॥ झसादौ क्ङिति शान्तो दान्त इत्युदाहरणम् । ङिति तु यङ्लुकि तस्प्रत्यये । शंशान्तः । दंदान्तः॥ पन्था इवाचरति पथीनति। अत्रान्तरंगत्वाद्दीर्घस्ततो न गुणः॥द्यौरिवाचरति । ङिति झसे क्वाविति वस्य ऊठ् गुणादेशौ । द्यवति॥ को ब्रह्मा तद्वदाचरति कति। लिटि धातोर्नामिन इति वृद्धौ आतो णप् डावित्यौ । चकाविति हरदत्तः । माधवस्तु णपि वृद्धिं बाधित्वा पर रूपेऽपि चक इति रूपमाह ॥

(तत्त्वदी०)–द्यवतीति ॥ ङिति झसे [illegible] [illegible] गुणादेशौ ॥चकाविति ॥ [illegible] [illegible] इति [illegible] [illegible] ॥

आचार उपमानात् ॥ कर्मधारये उपमानादाचारेऽर्थे यप्रत्ययोऽस्य चेकारः ॥ पुत्रमिवाचरति पुत्रीयति शिष्यमुपाध्यायः ॥प्रासादमिवाचरति प्रासादीयति कुट्यां भिक्षुः ॥

(सुबोधिनी)–आचार उपमानात ॥ नाम्नो य ई चान्तेऽस्येत्युक्तम् । आचरणमाचारः । कर्मणि पर । [illegible] [illegible] । [illegible] । [illegible] । [illegible] पुत्रादिकर्मन [illegible] नाम्नो यः स्यादाचारेऽर्थे [illegible] [illegible] पूर्वस्य [illegible] ई च ॥ [illegible] नाम्नो न [illegible] [illegible] [illegible] । [illegible] :

(यङि वा सलोपः) पयायते–पयस्यते वा तक्रम् ॥

(सुबोधिनी)–यङि वा सलोपः ॥ सान्तस्य कर्तुः सस्य वा लोपः ॥

(अप्सरसोजस्सुमनसां नित्यम्) अप्सरायते ॥ ओजायते दुर्बलः ॥ सुमनायते ॥

(सुबोधिनी)–अप्सरसोजस्सुमनसां नित्यम् ॥ ओजःशब्दस्तद्वति वृत्तौ ओजस्वीवाचरतीति ओजायते ॥

(तत्त्वदी०)–अप्सरायते इति॥ अप्सरा इवाचरतीत्यर्थः॥ ओजायत इति ॥ओजःप्रभृतयो वृत्तिविषये तद्वति वर्तन्ते ॥

(नाम्न आचारे क्विब् वा) कृष्ण इवाचरति कृष्णति। अकृष्णत्॥ अ इवाचरति अति, अतः, अन्ति । एत्, एताम्, एयुः । अतु–अतात्, अताम्, अन्तु । अ–अतात्, आत्, आताम्, आन् । आः । लिटि औ, अतुः, उः । इथ । यात् । इता । आसीत्, आसिष्टाम् ॥ मालेवाचरति । मालाति । मालायात् ॥ मालाहि । अमालात् । मालांचकार । मालिता । अमालासीत् ॥ कविरिवाचरति कवयति । अकवयत् ॥

(सुबोधिनी)–नाम्न आचारे क्विब् वा॥ कर्तुरुपमानान्नाम्नः क्विप् वा स्यादाचारेऽर्थे ॥नाम स्वमिवन्तं ग्राह्यम् । तेन विभक्त्याश्रितं कार्यं न । पक्षे यङ्।कृष्ण इवाचरतीति स धातुरिति धातुत्वात्तिवादिः । 'अदे' इत्यलोपः । कृष्णति ॥ अः कृष्णस्तद्वदाचरति । 'अदे' इत्यलोपः । अति । लिटि तु कासादिप्रत्ययादिति सूत्रस्य वृत्तौ प्रत्ययग्रहणमपनीयानेकस्वरेऽयुक्तेर्नाम् । द्वित्वे 'अदे' इत्यलोपे प्राप्ते परत्वादाभ्वोणादाविति पूर्वस्यात्वं तत आतो णव् डाविति डौ । डित्त्वाट्टिलोपः।औ आतोऽनपीत्यालोपे। अतुः । लुङि यमिरमिनमातामितीट्सकौ । आसीत् ॥ मालेवाचरति मालाति । लिट्यनेकस्वरत्वादाम् । मालांचकार।लुङि अमालासीत् ॥ कविरिवाचरति कवयति । कवयांचकार । आशिषि 'ये' इति दीर्घः । कवीयात् ॥

(तत्त्वदी०)–नाम्न आचार इति॥ अत्रासिबन्तं नाम गृह्यते न तु सिबन्तम् तेन पदकार्यं न॥ औ इति ॥सवर्णदीर्घेणानेकस्वरत्वाभावादाम्न । अतुमादिषु दीर्घः। आतोऽनपीत्यालोपः इता ॥ यन इत्यलोपः । गुणस्तु प्रत्ययावयवत्वान्न॥न हि निमित्तं कार्यित्वेनाश्रीयते॥ आसीदिति ॥ यमिरमीति सगिटौ ॥ मालातीति ॥ लिङ्गविशिष्टपरिभाषया ॥

(नामधातोर्वृद्धिर्वा सौ) अकवायीत्–अकवयीत् ॥ विरिवाचरति । वयति । विवाय, विव्यतुः । अवायीत्–अवयीत् ॥ श्रीरिवाचरति । श्रयति । शिश्राय, शिश्रियतुः ।अश्रायीत्–अश्रयीत् ॥ पितेवाचरति पितरति । पितरांचकार । याड्डाविति रिङ् ।

पित्रियात्॥भूरिवाचरति भवति । बुभाव । अभावीत् ॥ द्रुरिवाचरति द्रवति । अद्रावीत ।

(सुबोधिनी)–नामधातोर्वृद्धिर्वा सौ॥सिप्रत्यये परे लुङि कयटमंत न वृद्धिः। माधवस्तु नामधातोरपि वृद्धिमिच्छति । द्रुः पक्षी तद्वदाचरति द्रवति।लिटि भुवातो-गिति यः । बिभ्यतुः । आशिषि यादादाविति रिङ् । पित्रियात्।'दादेः' पइति सिलुक्। भुवः सिलोपे इति भुवो बुगिति चाबुक् आम्भ्वोरित्यनेनात्वं चास्य न आभिव्यक्तत्वेन धातुपाठस्थस्यैव तत्र ग्रहणात् । बुभाव।अभावीत्। श्रिसुद्रुभ्य इति ङो न धातुपाठस्थत्वाभावात् । अद्रावीत् ॥

(तत्त्वदी०)–बुभावेति ॥ आम्भ्वोरादेो भुवो बुगिति च न तत्र धातुपाठस्थस्यैव ग्रहणात्॥

ञमस्य क्ङिति झसे ॥ ञमान्तस्य धातोर्दीर्घःस्यात्क्ङिति झसे कौ हे च । इदामिवाचरति इदामति ॥ राजेवाचरति राजानति । राजायते ॥ मन्था इवाचरति मथीनति ॥ ऋभुक्षा इवाचरति ऋभुक्षीणाति ॥ द्यौरिवाचरति द्यवति । दुद्याव। द्यूयात । द्यविता॥ क इवाचरति कति । चका । चकेत्यन्ये ॥ स्व इवाचरति स्वति । सस्वा । सस्व इत्यन्ये ॥

(सुबोधिनी)–ञमस्य क्ङिति झसे ॥ ञमान्तस्य धातोर्दीर्घः स्यात् कौ झसादौ हकारे च क्ङिति ॥ झसादौ क्ङिति शान्तो दान्त इत्युदाहरणम् । [illegible]ति तु यत्लुकि तत्प्रत्यये । शशान्तः । दंदान्तः॥ मन्था इवाचरति मथीनति। अत्रान्तरंगत्वाद्दीर्घस्ततो न गुणः॥द्यौरिवाचरति । क्ङिति झसे परतः [illegible] गुणादेशौ । द्यवति॥ को ब्रह्मा तद्वदाचरति कति। लिटि धातोरनोऽभिन इति वृद्धौ आतो णप् डावित्यौ । चकाविति हरदत्तः । माधवस्तु [illegible] यत्र [illegible] न चक इति रूपमाह ॥

(तत्त्वदी०)–द्यवतीति ॥ [illegible] ॥

आचारे उपमानात् ॥ कर्मभाग्ये उपमानादाचारेऽर्थे यिन्प्रत्ययो-स्य वेकारः ॥ पुत्रमिवाचरति पुत्रीयति शिष्यमुपाध्यायः ॥ प्रासा-द इवाचरति प्रासादीयति कुट्यां भिक्षुः ॥

(सुबोधिनी)–आचारे उपमानात् ॥ [illegible]

(तत्त्वदी०)-**आचारउपमानात्**दिति॥आचरणमाचारः।चरेर्भावे घञ् व्यवहारो ज्ञानं वा। उपमीयतेऽनेनेत्युपमानम्॥**पुत्रीयति शिष्यमुपाध्याय**इति॥पुत्रविषयकयज्ज्ञानव्यवहारो वा तत्सदृशं शिष्याभिन्नाश्रयं यज्ज्ञानं व्यवहारो वा तदनुकूलो वर्तमानकालिक एकगुर्वभिन्नाश्रयको व्यापारः । प्रासादाभिन्नाश्रयं यज्ज्ञानं व्यवहारो वा तत्सदृशं कुट्यभिन्नाश्रय यज्ज्ञान व्यवहारो वा तदनुकूल एकाभिन्नाश्रयो वर्तमानकालिको व्यापारः ॥

(भृशादिभ्योऽभूततद्भावे यङन्त्यहसलोपश्च) अभृशो भृशो भवति भृशायते ॥ अश्वश्च्छ्वश्वद्भवति श्वायते ॥

(सुबोधिनी)-भृशादिभ्योऽभूततद्भावे यङन्त्यहसलोपश्च ॥ भृशादिभ्यो यङ् स्यात् तस्मिन् परे भृशादीनामन्त्यस्य हसस्य लोपश्चाभूततद्भावेऽर्थे ॥'ये' इति दीर्घः । भृशायते ॥

(क्विपि)-भृशति ॥

(सुबोधिनी)-क्विपपि ॥भृशादिभ्यः क्विप् स्यदाभूततद्भावाऽर्थे॥

(च्विरपि) भृशीभवति । भृश्यभूत् ॥ सुमनायते । उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाहेतौ प्रत्यये चिकीर्षिते पृथक् क्रियते ॥ स्वमनायत । उदमनायत ॥

(सुबोधिनी)-च्विरपि॥भृशादिभ्यश्च्विःस्यादभूततद्भावेऽर्थे कृभ्वस्तियोगे एव॥ उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाहेतौ प्रत्यये चिकीर्षिते पृथक् क्रियते॥धातुसंज्ञाविधायके प्रत्यये कर्तुमिष्टे सति उपसर्गतुल्यं पूर्वपदं भिन्नं कर्तव्यमित्यर्थः॥ चुरादौ संग्रामे युद्धे इति संविशिष्टपाठोऽस्य ज्ञापकः । तेन मनस्शब्दात्प्रागट् भवति । स्वमनायत ॥

(तत्त्वदी०)-उपसर्गसमानाकारमित्यादि ॥ अत्र ज्ञापकं तु चुरादिषु संग्राम युद्ध इत्यत्र सग्राम इति विशिष्टपदम् । अन्यथा ग्राम युद्ध इत्येवापठिष्यत् ॥

(सुखादिभ्यो यङ् कर्तुरनुभवे) सुखं वेदयते सुखायते ॥ दुःखायते ॥

(सुबोधिनी)-सुखादिभ्यो यङ् कर्तुरनुभवे ॥सुखादिभ्यः कर्मभ्योऽनुभवकर्तृके चेत्सुखादीनि स्युः ॥ अनुभवशब्दो ज्ञानवाची । तदपेक्षमेव कर्तृत्वम् । कर्ता चेत्सुखादीनामन्वेति ॥ सुखं वेदयते । 'ये' इति दीर्घः। सुखायते । कर्तुरिति किम् । सुखं वेदयते परस्य । इह परनिष्ठं सुखं तद्भिन्ननिष्ठोऽनुभवः ॥

(तत्त्वदी०)-सुखं वेदयत इति ॥ [illegible] सुखमनुभवतीत्यर्थः ॥

(पुच्छादुदसने व्यसने पर्यसने च णिङ्) उत्पुच्छयते । उदपुपुच्छत ॥ विपुच्छयते ॥ परिपुच्छयते ॥

(सुबोधिनी)-पुच्छादुदसने व्यसने पर्यसने च णिङ् ॥ पुच्छान्नाम्नो णिङ् स्यात् ॥ उत ऊर्ध्वमसनं क्षेपणं उदसनम्। विविधं विरुद्धं वासनं व्यसनम्। परि समंतादसनं पर्यसनम्। तस्मिन्नर्थे। ङित्त्वादात्। पुच्छमुदस्यति-उत्पुच्छयते। उदयुपुच्छत ॥

(तत्त्वदी०)-पुच्छादुदसन इत्यादि ॥ उदसनमुत्क्षेपणम्। विविध विरुद्ध वा क्षेपणं व्यसनम्। परितः क्षेपणं पर्यसनम् ॥

(भाण्डात्समाचयने) संभाण्डयते ॥

(सुबोधिनी)-भाण्डात्समाचयने ॥ भाण्डात् णिङ् स्याद्राशीकरणेऽर्थे ॥ संभाण्डयते। लुङि समवभाण्डत ॥

(तत्त्वदी०)-समाचयनं राशीकरणम् ॥

(चीवरादर्जने परिधाने च) चीवराण्यर्जयति, परिधत्ते वा संचीवरयते भिक्षुः। (नाम्नो णिराचष्टे) ॥

(सुबोधिनी)-चीवरादर्जने परिधाने च ॥ णिङ्। चीवराण्यर्जयति परिधत्ते वा संचीवरयते। लुङि समचिचीवरत ॥

(तत्त्वदी०)-संचीवरयते इति ॥ अर्जयति परिधत्ते वेत्यर्थः ॥

(अर्थवेदसत्यानामापुग् णौ) अर्थापयति। आर्तीथपत्॥ वेदापयति ॥ सत्यापयति। अससत्यपत् ॥ एतयते। ऐतयत् ॥ पृथुम्। प्रथयति ॥ वृद्धौ सत्यां पूर्वं वा टिलोपः। अपप्रथत्-अपिप्रथत् ॥ मृदुम् म्रदयति। अमम्रदत्-अमिम्रदत् ॥ भृशम् भ्रशयति। अबभ्रशत्॥ कृशम् क्रशयति। अचक्रशत् ॥ दृढम् द्रढयति। अदद्रढत् ॥ परिव्रढयति। पर्यवव्रढत् ॥ त्वादयति। अतित्वदत् ॥ मादयति। अमीमदत् ॥ युष्मयति। अयुयुष्मत् ॥ अस्मयति। आसिस्मत् ॥ विद्वांसम्-विद्वयति। अविविदत् ॥ विदावयतीत्यपरे। अविविदावत्। विदयति इत्यन्ये। अविविदत् ॥ एवं श्वानमाचष्टे श्वयति। अशिश्वत्। शावयतीत्यपरे। अशुशावत। शुनयतीत्यन्ये। अशुशुनत् ॥ उदञ्चम् उदीचयति। उदैचिचत् ॥ प्रत्यञ्चम् प्रतीचयति। प्रत्यचिचत् ॥ सम्यञ्चम् समीचयति। सम्यचिचत् ॥ तिर्यञ्चम् तिरायपति। अतितिरायत ॥ सध्र्यञ्चम् सध्रायपति। अससध्रायत ॥ अन्तिकम् नेदयति। अनिनेदत् ॥ बाढम् साधयति ॥ वृद्धम् ज्यापयति। अजिज्यपत ॥ वृद्धम् वर्षयति ॥ स्फिरम् स्फापयति। अपिस्फपत् ॥ उरुम् वरयति ॥ बहुलम् बंहयति ॥ तृप्रम् त्रपयति ॥

दीर्घम् द्राघयति । अदद्राघत् ॥ वृन्दारकम् वृन्दयति । अववृन्दत् ॥
इति नामधातुप्रक्रिया ॥

(सुबोधिनी)--अर्थवेदसत्यानामापुग् ञौ॥ एषामापुगागमः स्यात् ञिप्रत्यये परे॥ अर्थमाचष्टे करोति वा अर्थापयति॥ एनीमाचष्टे ञिप्रत्यये टिलोपः। ततो निमित्ताभावे नैमित्तिकस्याप्यभाव इतीपोऽभावे नस्याप्यभावः । एतयति॥ पृथुमाचष्टे ऋर इमनीति रभावे टिलोपे च प्रथयति।लुङि वृद्धौ सत्यां टिलोपः। अग्वृलोपित्वाभावादङि लघाविति पूर्वस्येत्वम् । अपिप्रथत्--वृद्धेः पूर्वं टिलोपे त्वग्वृलोपित्वादित्वं न। अपप्रथत् ॥ मृदुमाचष्टे आविष्ठवद्भावात् ऋ र इमनीति रभावे टिलोपे च म्रदयति ॥ एवं भृशकृशदृढादयः ॥ त्वां मां वाचष्टे टिलोपे 'त्वमावेकत्वे' इति त्वमदादेशे च कृते अत उपधाया इति वृद्धौ त्वादयति । मादयति ॥ युवामावां युष्मानस्मान् वाचष्टे विभक्तिपरत्वाभावान्न युवावौ । टिलोपे सति युष्मयति । अस्मयति ॥ श्वानमाचष्टे आविष्ठवद्भावात् शुनो वस्य उर्वा च दीर्घइत्युत्वे टिलोपाभावे च शुनयतीति रूपं केचिदाहुः । टिलोपे उत्वे च वृद्धौ सत्यां शावयति । लुङि अग्वृलोपित्वान्न ह्रस्वः । अशुशावत् ॥ विद्वांसमाचष्टे टिलोपे विद्वयति। टिलोपे कृते वसोर्व उरित्युत्वे वृद्धावावादेशे च विदावयतीत्यन्ये । नित्यत्वात्पूर्वमुत्वं पश्चाट्टिलोपः। विदयतीत्यपरे ॥ उदञ्चमाचष्टे। आविष्ठवद्भावात् तिरश्चादय इत्युदीच् । उदीचयतीत्यत्रोपसर्गं पृथक्कृत्य अञ्चशब्दादेव ञिः।बहुलग्रहणाट्टिलोपो न । लुङि उपसर्गसमानाकारमितीकारात्पूर्वमाटि चिशब्दस्य द्वित्वे पश्चात् ञेरिति ञिलोपः। उदैचिचत्॥ प्रत्यञ्चमाचष्टे अचेर्दीर्घश्चेत्यलोपपूर्वदीर्घौ प्रतीचयति । लुङि चिशब्दात्प्रागाटि कृते पूर्वस्य यत्वम् । प्रत्यचिचत् । स्वृणामसवर्णे स्वर इति प्रकृतिभावपक्षे तु प्रतिआचिचत्॥ सम्यञ्चमाचष्टे अचेर्दीर्घश्चेत्यलोपपूर्वदीर्घौ। समीचयति। लुङि सम्यचिचत्। प्रकृतिभावपक्षे समिआचिचत् ॥तिर्यञ्चमाचष्टे अञ्चेष्टिलोपेनापहारेऽपि तस्य वहिरङ्गत्वेनासिद्धत्वात्तिरीत्यस्य सद्भावः। वृद्धौ सत्यां तिरायति। उपसर्गसमानाकारत्वाभावादिह तिरसः पृथक्करणं नास्ति। अतितिरायत्। अङि लघाविति ह्रस्वस्तु नाग्वृलोपित्वात् ॥ सध्र्यञ्चमाचष्टे टिलोपेनाञ्चेरपहारे वृद्धौ सत्यां सध्र्यायति ॥ अन्तिकमाचष्टे गुर्वादेरित्यन्तिकस्य नेदष्टयलोपश्च । यस्येत्यलोपः।नेदयति । लुङि अनिनेदत्॥ बाढमाचष्टे बाढस्य साधः साधयति अससाधत्। वृद्धमाचष्टे वृद्धस्य ज्यादेशः।रातो आविति पुक् । ज्यापयति । अजिज्यपत्॥ वृद्धस्य वर्षोऽपि । वर्षयति।अववर्षत्॥स्फिरमाचष्टे स्फिरस्य स्फः। वृद्धौ सत्यां रातो आविति पुक्।स्फापयति अपिस्फपत् ॥ उरुमाचष्टे उरुशब्दस्य वर् । संज्ञापूर्वकविधेरनित्यत्वाद्वाहुलकाद्वा माधवेन विकल्पेन वृद्धिरुदाहृता । वरयति--वारयति । अवीवरत् ॥ बहुलमाचष्टे बहुलस्य बंहः । बंहयति । नो लोप इति नलोपो न । टिलोपस्य स्थानिवत्त्वात् । अग्वृलोपित्वान्नेत्वदीर्घौ। अबबंहत्॥ तृप्रमाचष्टे तृप्रस्य त्रप् । त्रपयति अतित्रपत् । दीर्घमा-

चष्टे दीर्घस्य द्राघः। द्राघयति। अदद्राघत् ॥ वृन्दारकमाचष्टे वृन्दारकस्य वृन्दः । वृन्दयति । अववृन्दत् ॥ ॥ इति सुबोधिन्यां नामधातुप्रक्रिया ॥

(तत्त्वदी०)-**अर्थवेदि**त्यादि॥ अत्र करण इत्यनुवृत्तं क्रियाविशेषोपलक्षणम्। तेनार्थमाचष्ट इत्यादिविग्रहः। आत्वेनैव सिद्ध आपुक्करणमन्यतोऽपि विधानार्थम्। तेन लिखापयतीत्यादि सिद्धम्॥ **अपिप्रथा**दिति ॥ वृद्धावौकारे कृते ततो लोपः । अग्लोपित्वाभावादङ्कार्यम् ॥ **त्वादयती**ति **मादयती**ति ॥ नो वेत्यत्र वा इत्यस्य व्यवस्थितत्वात्क्वचिन्न टिलोपः ॥ **विद्रयती**ति ॥ आदौ टिलोपः । पुनरङ्गवृत्तपरिभाषया सम्प्रसारणं न॥ **विदावयती**ति ॥ टिलोपे कृते सम्प्रसारणे वृद्ध्यावादेशौ ॥ सकृत्प्रवृत्तत्वात्पुनष्टिलोपाप्रसङ्गः॥ **विद्रयती**ति ॥ सम्प्रसारणे कृते टिलोप इति पक्षे ॥ **उदीचयती**ति॥ टिलोपो न व्यवस्थितत्वात् ॥ **तिरायय**तीति ॥ आदौ टिलोपस्ततस्तिर्यादेशस्ततो वृद्ध्यायादेशौ । पुनष्टिलोपस्तु सकृत्प्रवृत्तत्वान्न॥ **अतितिराय**दिति॥ अग्लोपित्वादुपधाह्रस्वोऽपि न ॥

कृतायामिह टीकायां लोकेशकरशर्मणा । समाप्तिमगमत्सम्यङ्नामधातुप्रसाधनम् ॥

इति तत्त्वदीपिकायां नामधातुप्रक्रिया ॥ ९ ॥

अथ कण्ड्वादिप्रक्रिया ।

(कण्ड्वादिभ्यो धातुभ्यो यक् स्वार्थे) कण्डूञ् गात्रविघर्षणे । कण्डूयति । कण्डूयते ॥ मन्तु अपराधे रोषे च । मन्तूयति । त्रिदित्येके । मन्तूयते ॥ वल्गु पूजामाधुर्ययोः । वल्गूयति ॥ अस असु असूञ् उपतापे । अस्यति । अनपि च हसात । असांचकार ॥ असूयति । असूयते ॥ लेला दीप्तौ । लेलायति ॥ मेधा आशुग्रहणे । मेधायति ॥ सुख दुःख तत्क्रियायाम् । सुख्यति । दुःख्यति ॥ सपर पूजायाम् । सपर्यति । सपर्यांचकार ॥ भिषज चिकित्सायाम् । भिषज्यति ॥ इषुध शरधारणे । इषुध्यति । ऐषुधीत ॥ गद्गद वाक्स्खलने । गद्गद्यति ॥ एला केला खेला विलासे । एलायति । केलायति । खेलायति ॥ हृणीङ् रोषणे लज्जायां च । हृणीयते ॥ महीङ् पूजायाम् । महीयते ॥ अगद नीरोगत्वे ॥ अगद्यति । आगदीत ॥ इति कण्ड्वादिप्रक्रिया ॥

(सुबोधिनी)-कण्ड्वादिभ्यो धातुभ्यो यक् स्वार्थे ॥ [illegible] नित्यं यक् स्यात् स्वार्थे ॥ कण्ड्वादयो [illegible] । धातवः [illegible] च । [illegible] एव ॥ [illegible] पूजायाम् । [illegible] ॥ महीङ् पूजायाम् । [illegible] । [illegible] । इति सुबोधिन्यां कण्ड्वादिप्रक्रिया ।

(तत्त्वदी०)-कंड्वादिभ्यो यगिति ॥ कंड्वादयो हि द्विविधाः । धातवो नामानि । तत्र धातुभ्यो नित्यं यक् । नाम्नां तु कण्डूं करोतीति विग्रह एव ॥

कृतायामिह टीकायां लोकेशकरशर्मणा । बोधनं दुष्टबुद्धीनामगात्कण्ड्वादिभावनम् ॥

इति तत्त्वदीपिकायां कण्ड्वादिप्रक्रिया ॥ ६ ॥

अथ प्रत्ययमाला ।

कण्डूयतेः सप्रत्यये द्विश्चोति प्रथमस्य द्वित्वे प्राप्ते कण्ड्वादेस्तृतीयस्य द्वित्वम्। कण्डूयियिषति। यप्रत्ययान्तात्सप्रत्यये तु यथेष्टं नामधातुषु द्वित्वमित्याद्यानां त्रयाणामन्यतमस्य द्वित्वं भवति।स्वराद्वेस्त्वाद्येतरस्य द्वित्वम्। पुत्रीयितुमिच्छति–पुत्रीयिषति पुतित्रीयिषति । पुत्रीयियिषति ॥ आशिश्वीयिषति । अश्वीयियिषति ॥ आत्मन इन्द्रमिच्छति इन्द्रीयति।इन्द्रीयतेःसप्रत्यये द्रीशब्दायिशब्दयोरन्तरस्य द्वित्वम्। इन्दिद्रीयिषति। इन्द्रीयियिषति ॥ ञ्यन्तात्सप्रत्यये तु प्रियशब्दात् आ विष्ठवद्भावेन प्रियशब्दस्य प्रादेशस्ततो द्वित्वादि। प्रियमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छति । पिप्रापयिषति । प्रापिपयिषति । प्रापयियिषति॥ यङ्सञ्यन्तात्सप्रत्यये तु बोभूयिषयिषति॥ यङ्ञिसान्ताद् ञिप्रत्यये तु । बोभूयिषयति ॥

इति प्रत्ययमाला ।

अथ पदव्यवस्था ।

(निविशादेः) निपूर्वाद्विशादेर्धातोरात् ॥ निविशते ॥

(सुबोधिनी)–निविशादेः ॥ निपूर्वो विशः । नेः परो विश इति वा निविशः स आदिर्यस्य स निविशादिस्तस्मादात्स्यात् । आदिशब्दः प्रकारे । विश इत्यत्र अकार उच्चारणार्थः । 'निविशते यदि शूकशिखा पदे' इति श्रीहर्षः । नि किम् । प्रविशति । अर्थवद्ग्रहणलक्षणप्रतिपदोक्तपरिभाषाभ्यां नेरुपसर्गस्य ग्रहणम् । तेनेह न । मधुनि विशन्ति भ्रमराः ॥

(तत्त्वदी०)–निविशादेः ॥ निपूर्वो विशः नेः परो विश इति वा । विशोऽकार उच्चारणार्थः असंदेहार्थं वा । तेन पदकार्यधारणम् । अन्यथा निविडादेरित्युक्ते विश् वा विड् भेदने वेति संदेहः स्यात् । निविश आदिर्यस्येति स तथा तस्मात् । अत्रादिशब्दः प्रकारे । तेन निविशसदृशादिति बोध्यम् । सादृश्यं चोपसर्गपूर्वत्वम् । निविशादिगणाभावाद्व्यवस्थावाचिन आदिशब्दस्य ग्रहणं न तेन नयतीति निकुलं विशतीत्यत्र न भवति । एवं वेतीति विकुलं जयतीत्यत्र न । पराजयति दूरानात्मोत्तमाः परा ॥

(परिव्यवेभ्यः क्रियः) परिक्रीणीते। विक्रीणीते। अवक्रीणीते॥

(सुबोधिनी)–परिव्यवेभ्यः क्रियः॥ परगामिफलार्थमिदमात्मनेपदम्॥

(विपराभ्यां जेः) विजयते। व्यजेष्ट॥ पराजयते॥

(सुबोधिनी)–विपराभ्यां जेः॥ आभ्यां परो जयतिगत्वात्॥

(आङो दाञो न तु विकसने) विद्यामादत्ते। आदित। विकसने तु व्याददाति मुखं कृष्णः। परांगकर्मकान्नेत्येव। व्याददते पिपीलिकाः पतङ्गस्य मुखम्॥

(सुबोधिनी)–आङो दाञो न तु विकसने॥परगामिफलार्थमिदम्। आङ्पूर्वाद्ददातेर्मुखविकसनादन्यत्रार्थे वर्तमानादात्मनेपदं स्यात्॥ विद्यामादत्ते॥

(क्रीड आङनुसम्परिभ्यः) आक्रीडते। अनुक्रीडते। परिक्रीडते

(सुबोधिनी)–क्रीड आङनुसंपरिभ्यः॥कर्तृप्रायार्थत्वानोपेंगे नात्मनेपदम्॥ माणवकमनुक्रीडति। तेन सहेत्यर्थः॥

(समोऽकूजने) संक्रीडते। कूजने तु। संक्रीडति रथचक्रम्॥

(सुबोधिनी)–समोऽकूजने॥ समः परः क्रीडतेरात्मनेपदं न कूजनेऽर्थे॥

(आगमेः क्षमायाम्) आगमयस्व तावत्॥

(सुबोधिनी)–आगमेः क्षमायाम्॥ [illegible] क्षमायामर्थे। आगमयस्व तावत्। मा त्वरिष्ठा इत्यर्थः।

(तत्त्वदी०)–आगमेः क्षमायाम्॥ [illegible]॥ आगमयस्वेति॥ [illegible] इत्यर्थः॥

(शिक्षेर्जिज्ञासायाम्) धनुषि शिक्षते॥

(सुबोधिनी)–शिक्षेर्जिज्ञासायाम्॥ [illegible]। अनुदात्तत्वादेवात्मनेपदसिद्धेः। [illegible]। धनुषि शिक्षते। धनुर्विषये ज्ञाने शक्तो भवितुमिच्छतीत्यर्थः॥

(तत्त्वदी०)–धनुषि शिक्षते [illegible]

(हरतेर्गतताच्छील्ये) पैतृकमश्वा अनुहरन्ते। मातृकं गावः॥

(सुबोधिनी)–हरतेर्गतताच्छील्ये [illegible]। पैतृकमश्वा अनुहरन्ते। मातृकं गावः। [illegible]॥

(तत्त्वदी०)-गततात्च्छील्य इति ॥ गतं प्रकारः॥पितृकमश्वा अनुहरन्त इति॥ पितुः प्रकारं सततं परिशीलयन्तीत्यर्थः॥गतं गमनं तस्य ताच्छील्य इति व्याख्याने तु"अय कः संबन्धो यदनुहरते तस्य कुमुदम" इत्यादावव्याप्तिः स्यात् ॥

(किरतेर्हर्षजीविकाकुलायकरणेषु)

(सुबोधिनी)-किरतेर्हर्षजीविकाकुलायकरणेषु ॥ किरतेरात्स्यादेषु वाच्येषु हर्षादयो विषयाः । तत्र हर्षो विक्षेपस्य कारणमितरे फले ॥

(तत्त्वदी०) किरतेरिति॥ कॄ विक्षेपे हर्षादयो विषयत्वेनोपादीयन्ते । तत्र हर्षो विक्षेपस्य कारणम् । इतरे फले ॥

(अपात्किरतेःसुट् चतुष्पाच्छकुनिकर्तृके आलेखने)

अपस्किरते वृषो हृष्टः । कुक्कुटो भक्षार्थी श्वाऽऽश्रयार्थी च । हर्षादिष्विति किम् । अपाकिरति कुसुमं वायुः ॥

(सुबोधिनी)-अपात्किरतेः सुट् चतुष्पाच्छकुनिकर्तृके आलेखने ॥ अपात्किरतेः सुट् स्याद्धर्षादिष्वेव । चतुष्पाच्छकुनिकर्तृके आलेखने सति॥अपस्किरते वृषो हृष्टः। हर्षेण भूमिं विलिखतीत्यर्थः ।। हर्षादिष्विति किम् । अपाकिरति कुसुमम् । इहात्सुटौ न । हर्षादिमात्रविवक्षायां यद्यप्यात्मनेपदं प्राप्तं तथापि सुडभावे नेष्यत इत्याहुः । गजोऽपकिरति । अत्र हर्षे सत्यालेखनाभावात्सुटोऽप्राप्तिः ॥

(तत्त्वदी०)-अपस्किरते वृषो हृष्ट इति ॥ हर्षेण भूमिं विलिखतीत्यर्थः ।

(आङो नुप्रच्छोः)

आनुते । आपृच्छते ॥

(सुबोधिनी)--आङो नुप्रच्छोः ॥ आङः परावेतावात्मन्तौ भवतः। णु स्तुतौ अदादिः प्रच्छ ज्ञीप्सायाम् तुदादिः ॥

(तत्त्वदी०)--आङ इति । णु स्तुतौ अदादिः । प्रच्छ ज्ञीप्सायां तुदादिः ॥ आनुत इति ॥ उत्कण्ठापूर्वकं शब्दं करोतीत्यर्थः ॥

(शप उपालम्भे)

विप्राय शपते ॥

(सुबोधिनी)-शप उपालम्भे ॥ आक्रोशार्थे स्वरितेतः शपः परगामिफले शपथरूपेऽर्थे आत्मनेपदं भवति । कृष्णाय शपते । श्लाघह्नुङ्इति संप्रदानसंज्ञा ॥

(तत्त्वदी०)-उपालम्भ इति ॥ शपथ इत्यर्थः।सच वाचा शरीरस्पर्शनरूपः॥विप्राय शपत इति ॥ त्वत्पादौ स्पृशामि नैतन्मया कृतमित्येवं शपथेन विप्रस्य स्वाभिप्रायं प्रकाशयतीत्यर्थः ॥ 'सख्यः शपामि यदि किंचिदिह स्मरामि' इत्यत्र तु स्वाशयप्रकाशनमात्रं विवक्षितं न तु शपथरूपमपीत्यदोषः ॥

(समवप्रविभ्यः स्थः)

संतिष्ठते । समस्थित ॥ अवतिष्ठते ॥ प्रतिष्ठते ॥ वितिष्ठते ॥

(सुबोधिनी)-समवप्रविभ्यः स्थः ॥ छुङि अपिद्वायास्यामिदितीत्वम् । समस्थिषाताम् ॥

(आङः प्रतिज्ञायाम्) शब्दं नित्यमातिष्ठते ॥

(सुबोधिनी)-आङः प्रतिज्ञायाम् ॥ शब्दं नित्यमातिष्ठते । नित्यत्वेन प्रतिजानीत इत्यर्थः ॥

(स्वाभिप्रायाविष्करणे निर्णेत्राख्यायां च) गोपी कृष्णाय तिष्ठते । अस्थित । 'संशय्य कर्णादिषु तिष्ठते यः' ॥

(सुबोधिनी)-स्वाभिप्रायाविष्करणे निर्णेत्राख्यायां च ॥ स्वाशयस्य प्रकाशने विवादस्य निराकरणकर्ता निर्णेता तस्मिन्नर्थे च तिष्ठतेरात्मनेपदं । गोपी कृष्णाय तिष्ठते । स्थित्या नेत्रादिविकाराद्वा स्वाभिप्रायं ज्ञापयति । 'संशय्य कर्णादिषु तिष्ठते यः' । संशयं विधाय निर्णेतृत्वेन कर्णादीनाश्रयत इत्यर्थः ॥

(तत्त्वदी०)-निर्णेत्राख्यायामिति ॥ [illegible] निराकरणकर्ता लोके प्रसिद्धः ॥ कृष्णाय तिष्ठत इति ॥ [illegible] ॥संशय्य कर्णादिष्विति ॥ [illegible] । [illegible] कर्णादय एव निर्णेतार इत्येवमर्थ इति वदन्ति ॥

(उदोऽनूर्ध्वकर्मणीहायाम्) मुक्तावुत्तिष्ठते । उदः स्थास्तम्भोः सलोपः । उत्थासीष्ट, उत्थासीयास्ताम् । उदस्थास्यत। उदस्थित । अनूर्ध्वकर्मणि किम् । पीठादुत्तिष्ठति । ईहायां किम् । ग्रामाच्छतमुत्तिष्ठति ॥

(सुबोधिनी)-उदोऽनूर्ध्वकर्मणीहायाम् ॥ [illegible] । ग्रामाच्छतमुत्तिष्ठति । उत्पद्यत इत्यर्थः ॥

(तत्त्वदी०)-उद इति ॥ [illegible] । मुक्तावुत्तिष्ठत इति [illegible] ॥ [illegible] ॥

(उपान्मन्त्रकरणे देवपूजासङ्गतिकरणमित्रकरणपथिषु) आग्नेय्याऽऽग्नीध्रमुपतिष्ठते ॥ मन्त्रकरणे किम् । भर्तारमुपतिष्ठति यौवनेन । आदित्यमुपतिष्ठते । गङ्गा यमुनामुपतिष्ठते । रथिकानुपतिष्ठते । स्रुघ्नमुपतिष्ठते पन्थाः ॥

(सुबोधिनी)-[illegible]

[illegible]

तेन पाकं पाकेनेत्यादौ द्वितीयादयः प्रवर्तन्ते।साध्यरूपोभावस्त्वाख्यातवाच्यस्तस्या-सत्त्वरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि।भाष्ये तु आस्यन्ते शय्यन्ते इत्यत्र भावेऽपि बहुवचनं कृतम्। न च कर्मण्येवाख्यातप्रत्ययोऽस्त्विति शंक्यम् ।धातुद्वयस्याप्यकर्मकत्वात्। आस्यन्त इत्यासिकाः। शय्यन्ते इति शायिका इत्यत्र धात्वर्थनिर्देशे वुण्प्रत्ययः।उष्ट्रासिका आस्यन्ते,हतशायिकाःशय्यन्त इत्यत्र उष्ट्राणां यादृशान्यासनानि हतानां यादृशानि शयनानि तादृशानि देवदत्तादिकर्तृकाण्यासनादीनीत्यर्थः। फलाश्रयः कर्म। फलं च धातुनैवोक्तमित्याश्रयमात्रमाख्यातार्थः स्यात्।अनन्यलभ्यत्वात्। अकर्मकेभ्यो धातुभ्यो भावे आत्। सकर्मकेभ्यस्तु कर्मण्यात् स्यात् ।साध्यरूपस्यभावस्योत्सर्गत एव संख्यानपेक्षत्वेन स्वस्यैकत्वादेकवचनमेव भवति । तत्तु प्रथमस्यैव न मध्यमोत्तमयोः। युष्मदस्मदोराख्यातवाच्यकारकवाचित्वाभावात्। यद्यपि नाम्नोऽप्याख्यातवाच्यकारकवाचित्वाभावस्तथापि प्रथमो भवति । तस्यानिष्पादने वचनाभावात् तत्रैकवचनस्वीकारः प्रथमपुरुषमन्तरा कथं संभवेदित्यर्थः।भावे यथा। भूयत इत्यादि ॥

(तत्त्वदी०)-**आद्भुवि कर्मणि**॥भवनं भूः तस्या भुवि। शुद्धे धात्वर्थे साध्यरूपभावे घञर्थस्तु सिद्धरूपोभावइति भेदः।तत्र सिद्धरूपोभावोद्रव्यवत्प्रकाशते लिङ्गसंख्यादीन्गृह्णातीत्यर्थः। अतो द्विवचनादि। साध्यरूपस्य त्वसत्त्वरूपत्वान्न संख्याद्यन्वयः। उक्तं च-"क्रियायाःसिद्धतावस्था साध्यावस्था च कीर्तिता। सिद्धता द्रव्यमिच्छन्ति तत्रैवेच्छन्ति घञ्विधिम्"इति॥कर्म तु पारिमापिकमेव । पुनर्भावग्रहणात्। फलाश्रयः कर्म । फलस्य च धातुवाच्यत्वादाश्रयमात्रमाख्यातार्थः। अथ सकर्मकादपि भावे स्यादिति चेन्न । द्विश्चेत्यतश्चेत्यनुवर्तते स चावधारणार्थः सकर्मकात्कर्मण्येव न भावे। कर्तर्यपि न स्यादिति चेच्छृणु। मध्येऽपवादन्यायेन भावस्यैव बाधनात्॥ **एकवचन**मिति॥एकवचनमुत्सर्गत करिष्यत इति वचनादिति भाव.।तत्किं मध्यमोत्तमयोरपि न चेत्याशङ्कायामाह-**युष्मदस्मदो**रिति ॥

(स्वरान्तानां हनग्रहदृशां च भावकर्मणोः सितासीस्यपामिड्वा स इण्वच्च) भाविषीष्ट-भविषीष्ट । भाविता-भविता । भाविष्यते-भविष्यते । अभाविष्यत-अभविष्यत ॥

(सुबोधिनी)-**स्वरान्तानां हनग्रहदृशां च भावकर्मणोः सितासीस्यपामिड्वा स इण्वच्च**॥स्वरान्तेभ्यो हनिग्रहिदृशिभ्यश्च परेषां भावे कर्मणि चार्थे स्थितानां सितासीस्यपां प्रत्ययानामिडागमो वा भवति स इट् इणीवेतीण्वत्। सप्तम्यन्ताद्वत्। कार्यातिदेशोऽयम्। इणि परे यद्वृद्ध्यादिकार्यं भवति तदिण्वति परेऽपीत्यर्थः। यथा भाविता, भाविष्यते इत्यादौ वृद्धिः। दायिता, दायिष्यते इत्यादौ युक् ।घानिता, घानिष्यते इत्यादौ घत्वम् । प्रयोजकण्यन्ताच्छमः कर्मण्याख्याते कृते शामिता-

।शामिष्यते–शमिष्यते।इत्यादौ मितां ह्रस्वान्तानामित्यनेन मितामुपधाया वा
पादि ॥

ग्तन्यकर्तरि ॥धातोस्तनि परे भावे कर्मणि च इण्प्रत्ययः।सेर-
ादः। लुक्। अभावि। अकर्मकोऽप्युपसर्गवशात्सकर्मको भवति।
ग्रमनुभूयते स्वामिना। "लज्जासत्तास्थितिजागरणं वृद्धिक्षय-
रजीवितमरणम्।शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मक-
हुः।" "फलव्यापारयोरेकनिष्ठतायामकर्मकः।धातुस्तयोर्धर्मिभेदे
कर्मक उदाहृतः" "धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्।प्रसि-
(विवक्षातः कर्मणोऽकर्मिका क्रिया"

सुबोधिनी)–इण् तन्यकर्तरि ॥ कर्तुरन्योऽकर्ता तस्मिन्नकर्तरि भावे कर्मणि
तन्प्रत्यये परे धातोरिण् स्यात् ॥ अकर्तरीति किम्। अकृत घटं कुलालः। प-
तनो लुक्। अभावि। अकर्मकोऽपि धातुः क्वचिदर्थान्तरे सकर्मको भवति।
ाम्नेनकार्थत्वेनार्थान्तरस्योपसर्गेण द्योतनादेतौ। यथा कर्मप्रधानः स्वामिना सुख-
यते। आत्मसात् क्रियते इत्यर्थः॥ "लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजी-
रणम्।शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुः॥" अकर्मकलक्षण-
–आचार्यास्तं धातुगणमकर्मकमाहुर्वदन्ति। तं कम्। लज्जासत्तास्थितिजागरणा-
ः सन्ति यस्य स लज्जासत्तास्थितिजागरणस्तम्।पुनः।वृद्धिक्षयभयजीवितमरणा-
ः सन्ति यस्य स वृद्धिक्षयभयजीवितमरणस्तम्। पुनः। शयनक्रीडारुचिदीप्त-
र्था यस्य स शयनक्रीडारुचिदीप्त्यर्थस्तम् ॥ फलव्यापारयोरेकनिष्ठतायाम-
कः। धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥ सकर्मकाकर्मकलक्षणमाह-
योरकर्मको धातुरुदाहृतः। क कस्मात्। [illegible] व्यापारो यत्नार्थ ।
ोत्पादनं व्यापारः। उत्पत्तिः फलम्।यथा पचेः फूत्कारादि [illegible]
ापारः विक्लित्त्यादि फलम्।तयोः [illegible]
स्थितौ सत्यामित्यर्थः। धातुः सकर्मक उदाहृतः [illegible] ।
दि आश्रयभेदे सति। [illegible] इत्यर्थः ॥
'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥
[illegible] धातोः क्रिया [illegible] इत्यर्थः। [illegible]
[illegible]
[illegible] ॥
[illegible]
[illegible]
[illegible]

(तत्त्वदी०)–**अकर्मकोऽपीति**॥यो यदा कर्मक्रियावाच्यप्यनेकार्थत्वात्सकर्मकक्रियामुपयाति, तदा तदर्थपरत्वे सकर्मको भवति तत्परत्वं च तस्योपसर्गेण द्योत्यत इत्यनुपसर्गवशादित्युक्तं न तु सोपसर्ग एव सकर्मकः । उपसर्गस्तु द्योतक एव॥**अनुभूयत** इति॥उपलम्भेऽयं सकर्मकः। सुखे कर्मण्यात् ॥**फलव्यापारयो**रित्यादि ॥ फलं विक्लित्त्यादि । व्यापारः फूत्कारादिलक्षणः। एकनिष्ठतायामेकस्मिन्धर्मिणि स्थितौ।तयोःफलव्यापारयोर्धर्मिभेदे एकस्मिन्धर्मिणि फलमन्यस्मिन्व्यापार इति भेदे धातुःसकर्मको बोध्यः॥**धातोरर्थान्तरे वृत्ते**रित्यादि॥अन्योऽर्थोऽर्थान्तरं तस्मिन्वृत्तेर्वर्तनात् । उदाहरणानि यथा । नदी वहति । स्यन्दन्त इत्यर्थः ॥नृत्यति चैत्र ।गात्रविक्षेपं करोतीत्यर्थः ॥ मेघो वर्षति । जलमित्यर्थः । गच्छति । ग्राममिति शेषः ॥

(शीङोऽयङ् ये क्ङिति) शय्यते । शिश्ये । शायिषीष्ट–शयिषीष्ट । अशायि । अयकि ॥ ऋतोरिङ् भवत्यकारप्रत्यये यकि च । घटः क्रियते । त्वं दुःखी क्रियसे रागैर्विरागैः सुख्यहं क्रिये। चक्रे । भाव्यते । भावयांचक्रे । भावयामासे । भावयांबभूवे ॥

(सुबोधिनी)–**शीङोऽयङ् ये क्ङिति** ॥ शेतेरयङादेशः स्यात्किति ङिति च यप्रत्यये परे ॥ ङित्त्वादन्तादेशः । यत इत्यलोपः । शय्यते । नुधातोरिति षः । शिश्ये । इणवद्भावाद्वा वृद्धिः । शायिषीष्ट–शयिषीष्ट । करोतेः कर्मण्यात्। उरिति न गुणः । कृषीष्ट । चौरादिकात् ण्यन्ताद्भावयतेः कर्मण्यात् । ञेरिति ञिलोपः। भाव्यते ॥

(इणवदिटि ञेर्लोपः) भाविता–भावयिता । भाविष्यते–भावयिष्यते । अभावि, अभाविषाताम्–अभावयिषाताम् ।सन्नन्तात्तु बुभूष्यते । बुभूषांचक्रे । अबुभूषि ॥ यङन्तात्तु । बोभूय्यते । बोभूयांचक्रे ॥ यङ्लुगन्तात्तु बोभूयते । बोभवांचक्रे । बोभाविषीष्ट–बोभविषीष्ट॥ स्तूयते विष्णुः । अस्तावि, अस्ताविषाताम्–अस्तोषाताम् ॥ अर्यते । आर । आरिषीष्ट–ऋषीष्ट। आरिष्टाः–आर्षाः ॥ स्मर्यते । स्मारिता–स्मर्ता ॥ इज्यते । ईजे ।यक्षीष्ट–यष्टा ॥

(सुबोधिनी)–**इणवदिटि ञेर्लोपः**॥ञिलोपो वा स्यादिणवदिटि परे ॥ ञिलोपे भाविता । पक्षे ञिमन्तेऽपि भावयिता।सन्प्रत्ययान्ता बुभूषतेर्भावे आत् । यत इत्यलोपः बुभूष्यते । यङ्प्रत्ययान्तात्तु यतङ्यलोपे बोभूय्यते । यङ्लुगन्ताद्भावे आत।बोभूयते । स्तौतेः कर्मण्यात् । ये दति दीर्घः। स्तूयते॥ ऋ गतौ कर्मण्यात् । गुणोऽर्तीति गुणः । अर्यते । इणवदिटि तु यतेर्नामिन इति वृद्धिः । आरिता ॥ स्मृ चिन्तायाम् । गुणोऽर्तीति गुणः । स्मर्यते ॥ यजतेः कर्मण्यात् । यजादीनामिति संप्रसारणम् । इज्यते । द्विरिति । ईजे । आशिषि सिचि । यक्षीष्ट ॥

(तनोतेर्वाऽऽत्वं यकि) तायते–तन्यते। तनिषीष्ट। अतानि॥
जायते–जन्यते॥
(सुबोधिनी)–तनोतेर्वाऽऽत्वं यकि॥ तनेराकारान्तादेशो वा स्याद्यक्प्रत्यये परे॥
(तपो नेण् कर्मकर्तर्यनुतापे च) अन्वतप्त देवदत्तः पापेन॥
दादेरिः। दीयते। ददे॥

(सुबोधिनी)–तपो नेण् कर्मकर्तर्यनुतापे च॥ तपेरिण् प्रत्ययो न स्यादनुतापेऽर्थे कर्मकर्तर्यर्थे च॥ अन्वतप्त देवदत्तः। पापेन कर्त्राऽभ्याहत इत्यर्थः। भावेऽपीदं बोध्यम्। पापवता पुंसाऽविचार्य कृत्वा पश्चादशोचीत्यर्थः॥ कर्मकर्तरि तु–अतप्त तपस्तापस इत्यत्र तपस्तपःकर्मकस्येत्यनेन कर्तुः कर्मवद्भावः॥ डुदाञ् दाने। दादेरिरितीत्वम्। ये इति दीर्घः। दीयते। आतोऽनपीत्यालोपे ददे॥

(तत्त्वदी०)–तपो नेण् कर्मकर्तर्यनुतापे च॥ तप सतापे इत्यस्मादिण्न॥पापेनेति॥ पूर्वं कृत यत्पापं कर्तृ तेनाभ्याहतो देवदत्त इत्यर्थः। पापेनेति कर्तरि तृतीया। यदा तु कर्म न विवक्ष्यते, शोकार्थो वा तपिस्तदा भावे लः॥ पापेनेति कर्तरि तृतीया। करणे पुरुषधर्मयोरनभिधानात्। अभ्याहननार्थस्य तु कर्मकर्तृत्वविवक्षायां हेतौ तृतीयेति बोध्यम्॥

आतो युक्॥ इणि ञ्णिति कृति च॥ दायिषीष्ट–दासीष्ट। अदायि, अदायिषाताम्–आदिषाताम्॥ धयिते॥ स्थीयते॥ अग्लायि॥ हन्यते। हनो घ्न। घानिषीष्ट–वधिषीष्ट। घानिता–हन्ता। अघानि, अघानिषाताम्–अहसाताम्। अवधि, अवधिषाताम्।

(सुबोधिनी)–आतो युक्॥ आदन्तस्य धातोर्युक् स्यादिणि प्रत्यये परे ञ्णिति कृत्प्रत्यये च॥ घाञ् दायः। वुणि दायकः। इण्वदिटि दायिषीष्ट। इण्वदिटोऽभावे दासीष्ट। लुङि २ दायि–इण्वदिटि अदायिषाताम्–तदभावे अपिद्धास्थामितीत्वम्। आदिषाताम्॥ एवं धा स्था धातू॥ ग्लै हर्षक्षये। इण्वदिटि युक् अग्लायिषाताम्॥ हन्तेः कर्मण्यात्। हन्यते। पूर्वाद्धन्तेरिति घः। जघ्ने। हनो लुङ्लिङोरिति वधः। यत इत्यल्लोपः वधिषीष्ट–पक्षे हनोघ्न इति घः। अत उपधाया इति वृद्धिः। घानिषीष्ट। इण्वद्भावो वधादेशस्य बाधको ज्ञेयः। अत्र हनो घदित्यनेन घदादेशो न। इणवर्जिते इत्युक्तत्वात। लृटि इणवदिटि घानिष्यते। पक्षे हन्ऋत इतीट्। हनिष्यते। लुङि इण्वदिडभावे हनः सिः किदिति कित्त्वात् लोपस्त्वनुदात्ततनामिति न लोपः॥ अहसाताम्॥ गृह्णातेः कर्मण्यात्। ग्रहामिति संप्रसारणम्। गृह्यत॥

(तत्त्वदी०)-अकर्मकोऽपीति॥यो यदा कर्मान्तरानाम्यपने तार्थान्तरे सकर्मकत्वमुपयाति, तदा तदर्थपरत्वे सकर्मको भवति नान्यदा न तस्योपसर्गेण योगेन इत्यनुपसर्गस्यापि उक्त न तु सोपसर्ग एव सकर्मक । उपसर्गस्तु द्योतक एव॥**अनुभूयत** इति॥उपलम्भेऽयं सकर्मकः। सुखे कर्मण्यात् ॥**फलव्यापारयो**रित्यादि ॥ फलं विक्लित्यादि । व्यापारः फूत्कारादिलक्षणः। एकनिष्ठतायामेकस्मिन्धर्मिणि स्थितौ।तयोःफलव्यापारयोर्धर्मिभेदे, तस्मिन्धर्मिणि फलमन्यस्मिन्व्यापार इति भेदे धातुःसकर्मको ज्ञेयः॥**धातोरर्थान्तरे वृत्ते**रित्यादि॥अन्योऽर्थोऽर्थान्तरं तस्मिन्वृत्तेर्वर्तनात् । उदाहरणानि यथा । नदी वहति । स्यन्दत इत्यर्थः ॥नृत्यति चैत्र।गात्रविक्षेपं करोतीत्यर्थः ॥ मेघो वर्षति । जलमित्यर्थ । गच्छति । ग्राममिति शेषः ॥

(शीङोऽयङ् ये क्ङिति)शय्यते । शिश्ये । शायिषीष्ट-शयिषीष्ट । अशायि । अयकि ॥ ऋतोरिङ् भवत्यकारप्रत्यये यकि च। घटः क्रियते । त्वं दुःखी क्रियसे रागैर्विरागैः सुख्यहं क्रिये। चक्रे। भाव्यते । भावयांचक्रे । भावयामासे । भावयांबभूवे ॥

(सुबोधिनी)-**शीङोऽयङ् ये क्ङिति** ॥ शेतेरयङादेशः स्यात्किति ङिति च यप्रत्यये परे ॥ ङित्त्वादन्तादेशः । यत इत्यलोपः । शय्यते । नुधातोरिति यः। शिश्ये । इणूवद्भावाद्वा वृद्धिः । शायिषीष्ट-शयिषीष्ट । करोतेः कर्मण्यात्। उरिति न गुणः । कृषीष्ट । चौरादिकात् ञ्यन्ताद्भावयतेः कर्मण्यात् । ञेरिति ञिलोपः। भाव्यते ॥

(इणवदिटि ञेर्लोपः) भाविता-भावयिता । भाविष्यते-भावयिष्यते । अभावि, अभाविषाताम्-अभावयिषाताम् ।सन्नन्तात्तु बुभूष्यते । बुभूषांचक्रे । अबुभूषि ॥ यङन्तात्तु । बोभूय्यते । बोभूयांचक्रे ॥ यङ्लुगन्तात्तु बोभूयते । बोभवांचक्रे । बोभाविषीष्ट-बोभविषीष्ट॥ स्तूयते विष्णुः । अस्तावि, अस्ताविषाताम्-अस्तोषाताम्॥ अर्यते । आर । आरिषीष्ट-ऋषीष्ट। आरिष्ठाः-आर्थाः॥ स्मर्यते । स्मारिता-स्मर्ता ॥ इज्यते । ईजे ।यक्षीष्ट-यष्टा ॥

(सुबोधिनी)-इणवदिटि ञेर्लोपः॥ञिलोपो वा स्यादिण्वदिटि परे ॥ ञिलोपे भाविता । पक्षे सिसतेतीट भावयिता।सप्रत्ययान्ता बुभूषतेर्भावे आत् । यत इत्यलोपः बुभूष्यते । यङ्प्रत्ययान्तात्तु यतइत्यलोपे बोभूय्यते । यङ्लुगन्ताद्भावे आत्।बोभूयते । स्तौतेः कर्मण्यात । ये इति दीर्घः। स्तूयते॥ ऋ गतौ कर्मण्यात् । गुणोऽर्तीति गुणः । अर्यते । इणवदिटि तु धातोर्नामिन इति वृद्धिः । आरिता ॥ स्मृ चिन्तायाम् । गुणोऽर्तीति गुणः । स्मर्यते ॥ यजतेः कर्मण्यात् । यजामिति संप्रसारणम् । इज्यते । लिटि । ईजे । आशिषि लिङि । यक्षीष्ट ॥

मिता-शंशमिता-शंशमयिता । लुङि अशंशामि-अशंशमि । णमुप्रत्यये तु शंशामं-शंशमम् ॥ वध हिंसायाम् । हसान्तः ॥

(भञ्जेरिणि नलोपो वा) अभाजि-अभञ्जि ॥

(सुबोधिनी)-भञ्जेरिणि नलोपो वा । भञ्जो आमर्दने इत्यस्य नस्य लोपो वा स्यादिणि प्रत्यये परे ॥

(लभेरिण्णमोर्नुम्वा) अलम्भि-अलाभि "गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् । बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया ॥ प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः ॥" गौर्दुह्यते पयः । धुक्षीष्ट ॥ अजा ग्रामं नीयते । ह्रियते । कृष्यते । उह्यते ॥ बोध्यते माणवकं धर्मः' माणवको धर्ममिति वा॥भोज्येत माणवकमोदनः' माणवक ओदनमिति वा ॥ पाठ्यते माणवकं वेदः, माणवको वेदमिति वा ॥ देवदत्तो ग्रामं गम्यते ॥

(सुबोधिनी)-लभेरिण्णमोर्नुम् वा॥ डुलभष् प्राप्तावित्यस्य नुमागमो वा स्यादिणि प्रत्यये णमि प्रत्यये च परे॥प्रादेर्नित्यं नुम्।प्रपूर्वस्य लभेर्नित्यं नुम् स्यात् णमि प्रत्यये।प्रलम्भम् ॥ अथ ये द्विकर्मकधातवस्तेभ्य आत् कृत्यक्तखलर्थप्रत्ययाः किं मुख्ये कर्मणि,उत गौणे, किं चोभयोरिति संदेहे व्यवस्थामाह-"गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् । बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया॥प्रयोज्य कर्मण्यन्येषां ण्यन्तानां लादयो मताः ॥" दुह्याचिति कारके उक्तम् । दुह्यादेर्द्वादश संख्यस्य धातोर्गौणे कर्मणि लादयः प्रत्यया मताः । नीप्रभृतीनां चतुर्णां प्रधाने कर्मणि लादयो मताः। बुद्धिभक्षार्थयोर्ण्यन्तयोः शब्दकर्मकण्यन्तानां च प्रयोज्यप्रधानयोरन्यतरकर्मणि निजेच्छया लादयो मताः । अन्येषां ण्यन्तानां तु प्रयोज्यकर्मणि लादयो मताः। कारके गतिबुद्धीत्यनेन कर्तुर्यत्कर्मकारकं कृतं तत्प्रयोज्य कर्म ज्ञातव्यम् । लादय इत्यत्रादिशब्देन कृत्यक्तखलर्थाः प्रत्यया ग्राह्याः दुह्यादेर्गौणे कर्मण्यात् । स्वार्थमुत्सृज्य परार्थावलम्बनं गौणम् । उदाहरणमाह--गौर्दुह्यते पय इत्यत्र गौरिति गौणं कर्म । तत्राख्यातेनोक्तत्वादनुक्ते इत्यनेन प्रथमा । पय इति तु मुख्यं कर्म । तत्र कर्मणि द्वितीया । कर्तुरनुक्तत्वात्तृतीया देवदत्तेनेति । न्यादीनां प्रधानकर्मण्यात् । उदाहरणमाह-अजा ग्रामं नीयते इत्यत्राजेति मुख्यं कर्म । तत्रोक्तत्वात्प्रथमा । ग्राममिति गौणं कर्म। कर्ता तु तृतीयान्तोऽध्याहार्यः॥बुद्धिभक्षार्थयोः शब्दकर्मकाणां च ण्यन्तानां प्रयोज्ये मुख्ये च कर्मण्यात् । उदाहरणमाह-बोध्यते माणवकं धर्म इत्यत्र धर्म इति मुख्यं कर्म । माणवकमिति प्रयोज्यं कर्म।तत्र निजेच्छयाख्यातादिः कर्तव्यः । भोज्यते माणवकमोदन इत्यत्रोदन इति मुख्यं कर्म ।माणवकमिति प्रयोज्यं कर्म । तत्र निजेच्छयाख्यातादिः । पाठ्यते माणवक वेद इत्यत्र वेद इति

मुख्यं कर्म । माणवकमिति प्रयोज्यं कर्म । तत्र निजेच्छयाख्यातादिः । तृतीयान्तः कर्ताध्याहार्यः ॥ ण्यन्तस्य प्रयोज्यकर्मण्यात् । उदाहरणमाह—देवदत्तो ग्रामं गम्यत इत्यत्र ग्राममिति मुख्यं कर्म । देवदत्त इति प्रयोज्यं कर्म तत्राख्यातादिः कर्मण उक्तत्वात् प्रथमा । कर्ता तु तृतीयान्तोऽध्याहार्यः ॥

(तत्त्वदी०)—द्विकर्मकाणा तु—**गौणे कर्मणी**त्यादि॥**गौर्दुह्यत** इति ॥ गौरिति गौण कर्म॥**अजे**त्यादि॥अजात्र प्रधानम्॥ **निजेच्छये**ति ॥ गौणप्रधानयोरात्मेच्छयेत्यर्थः ॥**अन्येषामि**ति ॥ पूर्वोक्तव्यतिरिक्तानामित्यर्थः ॥

(अकर्मकाणां कालादिकर्मकाणां भावे कर्मणि च लकारः)

मासं मासो वास्यते देवदत्तेन । क्रोशः क्रोशं वास्यते । कुरवः, कुरून् वास्यते । गोदोहं गोदोहो वास्यते ॥ ण्यन्तात्तु प्रयोज्ये प्रत्ययः । मासमास्यते माणवकः ॥ ॥ इति भावकर्मप्रक्रिया ॥

(सुबोधिनी)—अकर्मकाणां कालादिकर्मकाणां भावे कर्मणि च लकारः ॥ कालादिकर्मकाद्धातोर्भावकर्मणोरर्थयोराख्यातो भवति॥ कारके, अकर्मकधातुभिर्योगे इति सूत्रेण कर्मसंज्ञा येषां धातूनां कृता ते कालादिकर्मकाः।कालादिकर्मकस्य कर्मण्यात्।उदाहरणमाह—मास आस्यते इत्यत्र कालवाचि कर्मण आख्यातेनोक्तत्वात्प्रथमा ।कर्ता तु तृतीयान्तोऽध्याहार्यः ॥ भावे तु मास मास्यते देवदत्तेनेत्यत्र कर्मणोऽनुक्तत्वान्मासमिति द्वितीया । कर्तुरनुक्तत्वाद्देवदत्तेनेति कर्त्तरि तृतीया। ण्यन्तात्कालादिकर्मकाद्धातोस्तु प्रयोज्यकर्मण्येवाख्यातादिः॥ मासमास्यते माणवक इति अत्र कालवाचिकर्मणोऽनुक्तत्वान्मासमिति द्वितीया । माणवक इति प्रयोज्यं कर्म । तत्राख्यातेनोक्तत्वात्प्रथमा । कर्तरि त्वनुक्तत्वात्तृतीया देवदत्तेनेति ॥

इति सुबोधिन्यां भावकर्मप्रक्रिया ॥ ८ ॥

अथ कर्मकर्तृप्रक्रिया ।

यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते ॥ साध्वसिश्छिनत्ति ॥ काष्ठानि पचन्ति ॥ स्थाली पचति ॥ पच्यते ओदनेन । अपाचि ॥ भिद्यते काष्ठेन । अभेदि ॥ लेनोक्ते कर्मकर्तरि यगादिणिवदिटः । पच्यते ओदनः । अपाचि । भिद्यते काष्ठम् । अभेदि ॥

(सुबोधिनी)-सकलकारकाणामवान्तरव्यापारो वर्ततेसकलकारकाणामवान्तरव्यापाराधीनस्याकारकत्वात्तत्रस्वव्यापारेस्वातन्त्र्यंच व्यापारभेदाकाङ्क्षायांकरणादिसंभवः तत्र यदा कारकान्तराणां सौकर्यातिशयं द्योतयितुम् तेषादायितुं कर्तृव्यापारो वक्तुं नेष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां प्राप्नुवन्ति स्वव्यापार स्वतन्त्रत्वात्।सुष्ठु करोतीति

सुकरस्तस्य भावः सौकर्यम्। कारकान्तराणां पूर्वं करणत्वादिसत्त्वेऽपि सांप्रतं कर्तृसंज्ञाकरणात्कर्तर्याख्यातो भवति ॥ साध्वसिश्छिनत्तीत्यत्र करणस्य कर्तृसंज्ञा। आख्यातेन कर्तुरुक्तत्वादसिरित्यत्र प्रथमा ॥ काष्ठानि पचन्तीत्यत्रापि करणस्य कर्तृसंज्ञा। कर्तुराख्यातेनोक्तत्वात्काष्ठानीति प्रथमा ॥ स्थाली पचतीत्यत्राधारस्य कर्तृसंज्ञा। कर्तुराख्यातेनोक्तत्वात्स्थालीति प्रथमा ॥ कर्मणस्तु कर्तृत्वविवक्षायां प्राक् सकर्मका अपि प्रायेणाकर्मकाः ॥ कर्मणः सौकर्यातिशयं द्योतयितुं यदा कर्तृत्वविवक्षा ततः प्राक् सकर्मका अपि धातवोऽकर्मकाः प्रायेण भवन्ति । प्रायेणेत्युक्तत्वादेकाकर्मका- श्छिदिभिदिप्रभृतय एवाकर्मका भवन्ति न तु द्विकर्मकाः ॥ अकर्मकस्य फलमाह- तेभ्यो भावे कर्तरि च लकारः। कर्मकर्तुरकर्मकाद्धातोर्भावे कर्तरि चार्थे आख्यातप्रत्ययो भवति। भावे आख्यातस्योदाहरणमाह। पच्यते ओदनेन भिद्यते काष्ठेनेत्यत्र कर्मणः कर्तृसंज्ञा। आख्यातस्तु भावे। कर्तुरनुक्तत्वादोदनेनेत्यादौ तृतीया ॥ कर्मकर्तर्याख्यातस्योदाहरणमाह-लेनोक्ते इत्यादि । कर्मवत्कर्मणा तुल्यक्रियः । कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवद्भवति । कार्यातिदेशोऽयम् । कर्मणो यत्कार्यं भवति तत्कर्मकर्तुरपीत्यर्थः। तेन यक् चतुर्ण्विति यक् । आद्भुवीत्यात् इण तनीतीण्। स्वरान्तानामितीण्वदिट् इत्यादि कार्याणि कर्मकर्तरि भवन्ति ॥ काष्ठं भिनत्तीत्यत्र काष्ठस्या या विदारणाश्रयत्वरूपा क्रिया सैव काष्ठं भिद्यते स्वयमेवेत्यत्र तस्मिन्कर्मभूतेऽपि भवति। अथ कार्यातिदेशः कर्मस्थभावकानां कर्मस्थक्रियाणां च धातूनां भवति न तु कर्तृस्थभावकानां कर्तृस्थक्रियाणां च धातूनां भवति। यत्र कर्माणि दृष्टे क्रियानुमातुं शक्यते ते कर्मस्थक्रियास्ततोऽन्ये कर्तृस्थक्रियाः । पक्वेषु तण्डुलेषु भिन्नेषु च काष्ठेषु दृष्टेष्वदृष्टः कर्तृव्यापारोऽनुमीयते। तदुक्तं च-"कर्मस्थः पचतेर्भावः कर्मस्था च भिदेः क्रिया। आसासिभावः कर्तृस्थः कर्तृस्था च गमेः क्रिया" ॥ यद्यप्याधारभावयोरित्यत्र भावशब्देन क्रियापि गृह्यते तथाप्यत्र भेदो विवक्षितः पृथगुपादानात्। परिस्पन्दरूपो धात्वर्थः छिदादिः क्रिया अपरिस्पन्दरूपो विद्ध्यादिर्भावः। पचत्योदनं भिनत्ति काष्ठं च देवदत्तः। पच्यते ओदनः भिद्यते काष्ठं स्वयमेवेत्यत्राख्यातेन कर्मकर्तुरुक्तत्वात्प्रथमा ॥ कर्तृस्थक्रियाया उदाहरणमाह- आगास्ते घटं देवदत्तः। आगास्ते घटः स्वयमेव। गच्छति ग्रामं देवदत्तः। गच्छति ग्रामः स्वयमेवेत्यत्र घटग्रामयोर्दृष्टयोर्न हि देवदत्तस्य व्यापारोऽनुमातुं शक्यत इति कर्तृस्थत्वं क्रियायाः ॥

(तत्त्वदी०)-यदा सौकर्यातिशयमि[illegible] ॥ [illegible]र्थः। [illegible] [illegible]व्यापारोऽस्ति। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] न [illegible] [illegible]

मुख्यं कर्म । माणवकमिति प्रयोज्यं कर्म । तत्र निजेच्छयाख्यातादिः । तृतीयान्तः कर्ताध्याहार्यः ॥ ण्यन्तस्य प्रयोज्यकर्मण्यात् । उदाहरणमाह—देवदत्तो ग्रामं गम्यत इत्यत्र ग्राममिति मुख्यं कर्म । देवदत्त इति प्रयोज्यं कर्म तत्राख्यातादिः कर्मण उक्तत्वात् प्रथमा । कर्ता तु तृतीयान्तोऽध्याहार्यः ॥

(तत्त्वदी०)–द्विकर्मकाणां तु–**गौणे कर्मणी**त्यादि॥**गोर्दुह्यत** इति ॥ गौरिति गौण कर्म॥**अजे**त्यादि॥अजात्र प्रधानम् ॥ **निजेच्छये**ति ॥ गौणप्रधानयोरात्मेच्छयेत्यर्थः ॥**अन्येषामि**ति ॥ पूर्वोक्तण्यन्तभिन्नानामित्यर्थः ॥

(अकर्मकाणां कालादिकर्मकाणां भावे कर्मणि च लकारः)

मासं मासो वास्यते देवदत्तेन । क्रोशः क्रोशं वास्यते । कुरवः, कुरून् वास्यते । गोदोहं गोदोहो वास्यते ॥ ण्यन्तात्तु प्रयोज्ये प्रत्ययः । मासमास्यते माणवकः ॥ ॥ इति भावकर्मप्रक्रिया ॥

(सुबोधिनी)–अकर्मकाणां कालादिकर्मकाणां भावे कर्मणि च लकारः ॥ कालादिकर्मकाद्धातोर्भावकर्मणोरर्थयोराख्यातो भवति॥ कारके, अकर्मकधातुभिर्योगे इति सूत्रेण कर्मसंज्ञा येषां धातूनां कृता ते कालादिकर्मकाः॥कालादिकर्मकस्य कर्मण्यात्।उदाहरणमाह–मास आस्यते इत्यत्र कालवाचिकर्मण आख्यातेनोक्तत्वात्प्रथमा ।कर्ता तु तृतीयान्तोऽध्याहार्यः ॥ भावे तु मास मास्यते देवदत्तेनेत्यत्र कर्मणोऽनुक्तत्वान्मासमिति द्वितीया । कर्तुरनुक्तत्वाद्देवदत्तेनेति कर्त्तरि तृतीया॥ ण्यन्तात्कालादिकर्मकाद्धातोस्तु प्रयोज्यकर्मण्येवाख्यातादिः ॥ मासमास्यते माणवक इति अत्र कालवाचिकर्मणोऽनुक्तत्वान्मासमिति द्वितीया । माणवक इति प्रयोज्यं कर्म । तत्राख्यातेनोक्तत्वात्प्रथमा । कर्तरि त्वनुक्तत्वात्तृतीया देवदत्तेनेति ॥

इति सुबोधिन्यां भावकर्मप्रक्रिया ॥ ८ ॥

अथ कर्मकर्तृप्रक्रिया ।

यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते ॥ साध्वसिश्छिनत्ति ॥ काष्ठानि पचन्ति ॥ स्थाली पचति ॥ पच्यते ओदनेन । अपाचि ॥ भिद्यते काष्ठेन । अभेदि ॥ लेनोक्ते कर्मकर्तरि यगादिणिवदिटः । पच्यते ओदनः । अपाचि । भिद्यते काष्ठम् । अभेदि ॥

(सुबोधिनी)-सकलकारकाणामवान्तरव्यापारो वर्ततेसकलकारकाणामवान्तरव्यापारहीनस्याकारकत्वात्तत्रस्वव्यापारेस्वातन्त्र्यंच व्यापारभेदाकाङ्क्षायांकरणादिसंभवः तत्र यदा कारकान्तराणां सौकर्यातिशयं द्योतयितुम तिपादयितुं कर्तृव्यापारो वक्तुं नेष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां प्राप्नुवन्ति स्वव्यापार स्वतन्त्रत्वात्।सुष्ठु करोतीति

प्रस्रवणमुत्कण्ठा । वत्सो गां प्रस्नौति । उत्कण्ठयतीत्यर्थः ॥ गोः कर्मणः कर्तृत्वविवक्षायां प्रस्नुते गौः।लुङि स्वरान्तानां हनग्रहेतीण्वदिट् । प्रास्नाविष्ट-पक्षे स्नुक्रमोरिति नेट् । प्रास्नोष्ट ॥ नमते दण्ड इत्यत्र कर्मणः कर्तृसंज्ञा । आख्यातेनोक्तत्वात्तत्र प्रथमा । लुङि अनस्त ।अत्र कर्मकर्तर्यात्मनेपदमेव जातम्। अत्र च अन्तर्भावितण्यर्थो बोध्यः॥

(सृजेः श्रद्धोपपन्ने कर्तरि वा) सृज्यते स्रजं भक्तः । असर्जि ॥

(सुबोधिनी)-सृजेः श्रद्धोपपन्ने कर्तरि वा ॥ सकर्मकस्य सृजेः कर्ता कर्मवद्वा भवति श्रद्धायुक्ते कर्तर्यर्थे । सृज्यते स्रजं भक्त इत्यत्र कर्तर्याख्यातादिः । कर्तुः कर्मवद्भावाद्यागिणो भवन्ति । श्रद्धया निष्पादयतीत्यर्थः ॥

(युजेर्वा) युज्यते ब्रह्मचारी योगम् । युनक्ति वा ॥

(सुबोधिनी)-युजेर्वा ॥ सकर्मकस्य युजेः कर्ता कर्मवद्वा भवति । युज्यते योगं ब्रह्मचारीत्यत्र कर्तर्याख्यातः । कर्तुः कर्मवद्भावाद्यागिणः । तपस्तपःकर्मकस्य । तप कर्मकस्य तपः कर्ता कर्मवद्वाति । तप्यते तपस्तापस इत्यत्र कर्तर्याख्यातः।कर्तुः कर्मवद्भावादात्मनेपदादिः । अर्जयतीर्थः । लुङि तपो नेणित्यनेनेण्न । अतप्त ।

(भूषावाचिनां किरादीनां सान्तानां च यगिणिण्वदिटो न)

अलंकुरुते कन्या । अलमकृत ॥ अवकिरते हस्ती।अवाकरीष्ट-अवाकरिष्ट-अवाकीर्ष्ट॥ अवगिरते पुष्पम् । अवागीर्ष्ट ॥ आद्रियते दानम् । आदृत ॥ ध्रियते । अधृत ॥ पृच्छते । अपृष्ट ॥ चिकीर्षते कटः । चिकीर्षांचक्रे । चिकीर्षांबभूवे । अचिकीर्षिष्ट ॥

(सुबोधिनी)-भूषावाचिनां किरादीनां सान्तानां च यगिणिण्वदिटो न ॥ भूषार्थेभ्यः किरादिभ्यः सन्प्रत्ययान्तेभ्यश्च धातुभ्यः कर्मकर्तरि यगिणिण्वदिटो न भवन्ति । आत्मनेपदमेव भवतीत्यर्थः ॥ तुदाद्यन्तर्गणः किरादिः । कॄ विक्षेपे । गॄ निगरणे । दृङ् आदरे । धृङ् अवस्थाने । प्रच्छ ज्ञीप्सायामिति पञ्चकः ॥ अलंकुरुते कन्येत्यत्र कर्मणः कर्तृसंज्ञा । आख्यातेनोक्तत्वात्तत्र प्रथमा । [illegible] रूपम् । [illegible] । अकृत इतीट् । अवकिरते।लुङि वृङ्वृञ्ॠदन्तादिभ्यो वेति वेट् । अवाकरिष्ट । वृङ्वृञ्ॠदन्तानामिति वा दीर्घः । अवाकरीष्ट । इडभावे उगिति गुणो न । ॠत इतीत् । पुनः सिच्यगिति गुणो न अवाकीर्ष्ट ॥ एवं गॄ ॥ [illegible] भवतीति [illegible] । आद्रियते। लुङि उगिति गुणो न। [illegible] लोपः । आदृत ॥ एवं धृङ् । [illegible] । पृच्छते । लुङि [illegible] । अपृष्ट । चिकीर्षते कट इत्यत्र कर्मणः कर्तृसंज्ञा । आख्यातेनोक्तत्वात्तत्र प्रथमा । लुङि [illegible] । अचिकीर्षिष्ट ।

सर्वत्र स्वयंशब्दः करणार्थको ज्ञेयः। आत्मना करणेनेत्यर्थः। कर्त्रर्थे तु कर्मण्याख्यातः स्यादित्यर्थः ॥ इति सुबोधिन्यां कर्मकर्तृप्रक्रिया ॥

(तत्त्वदी०)—कृतायामिह टीकायां लेकेशकरशर्मणा। बाधन दुष्टबुद्धीनामगाद्धानादिसाधनम् ॥

इति तत्त्वदीपिकायां कर्मकर्तृप्रक्रिया ॥ ९ ॥

अथ लकारार्थप्रक्रिया ।

(स्मृतिवाचिन्युपपदे भूतानद्यतने धातोर्लृट् लङोऽपवादः)

स्मरसि कृष्ण गोकुले वत्स्यामः ॥

(सुबोधिनी)—स्मृतिवाचिन्युपपदे भूतानद्यतने धातोर्लृट्॥ धातोर्लृड् भवति स्मृतिवाचकशब्दे उपपदे सति न लङ् ॥ वत्स्यामः । वयमवसाम इत्यर्थः ॥ एवं बुध्यसे चेतयसे इत्यादियोगेऽपि ॥

(तत्त्वदी०)—स्मृतिवाचिनीत्यादि॥ स्मृतिर[illegible] चेतयसे इत्यादियोगेऽपि न भवति एषामपि प्रकरणादिना स्मृतिवाचित्वात् ॥ स्मरसी[illegible] ॥ अत्र [illegible] वद्वाक्यार्थस्य कर्मता बोध्या ॥

(यद्योगे उक्तं न) अभिजानासि कृष्ण यद्वनेऽभुञ्ज्महि ॥

(सुबोधिनी)—यद्योगे उक्तं न॥ स्मृतिवाचकशब्दे उपपदे सत्यपि यच्छब्दयोगे भूतानद्यतने लृट् न भवति किं तु लङेव ॥

(तत्त्वदी०)—अभीत्यादि ॥ अत्र लङेव न तु लृट् ॥

(उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यम्) सुप्तोऽहं किल विललाप ॥

(सुबोधिनी)—उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यम्॥ मदस्वप्नादिभिः कश्चित्स्वान्तगतमेव न वेत्ति, पश्चादन्येभ्यः श्रुत्वा [illegible] । [illegible] सुप्तः सन्नहं विललापेति ॥

(तत्त्वदी०)—उत्तमपुरुषेत्यादि॥ [illegible] [illegible] [illegible] सुप्तोऽहं [illegible] । [illegible] ॥

(अत्यन्तापह्नवे लिट्) कलिङ्गेष्ववात्सीः । नाहं कलिङ्गाञ्जगाम ॥

(सुबोधिनी)—अत्यन्तापह्नवे लिट्॥ [illegible] लिट् भवति ॥ [illegible] निषिद्धो [illegible] [illegible] ॥ [illegible] अवात्सीः [illegible]

गत्वा त्वया चिरं स्थितमित्यर्थः। स आह नाहं कलिङ्गान् जगामेति।केवलमवस्थानमेव न निषिध्यते किंतु तद्धेतुभूतं गमनमपीत्यन्तापह्नवो भवति ॥

(तत्त्वदी०)–अत्यन्तापह्नव इति ॥ अपह्नवोऽपलापः ॥ नाहमित्यादि ॥ कलिङ्गस्य तु जुगुप्सितत्वेन तत्र त्वया चिरं स्थितमित्युक्तः कश्चिद्गमनमेव निषेधतीत्यत्रास्त्यत्यन्तापह्नवः । यदा तु गमनमेवायुक्तं तदेवापलपति तदा लडेवात्यन्तापह्नवाभावात् ॥

(हशश्वतोर्लिङ्विषये लङ्लिटौ) इति हाकरोत्, चकार वा । शश्वदकरोत्, चकार वा ॥

(सुबोधिनी)–हशश्वतोर्लिङ्विषये लङ्लिटौ ॥ हशश्वन्निपातयोर्योगे लिङर्थे लङ्लिटौ भवतः ।

(आसन्नकाले पृच्छ्यमानेऽर्थे लङ्लिटौ) अगच्छत् किम् । जगाम किम् । अनासन्ने तु कंसं जघान किम् ॥

सुबोधिनी)–आसन्नकाले पृच्छ्यमानेऽर्थे लङ्लिटौ ॥ आसन्नकालिके भूतानद्यतनपरोक्षवृत्तिधात्वर्थे प्रष्टव्ये लङ्लिटौ भवतः । पञ्चवर्षाभ्यन्तर आसन्नकालः पञ्चवर्षातीतो विप्रकृष्टकालः ॥ पृच्छ्यमाने किम् । जगादैवम्। लिडेव ॥ अनासन्ने तु लिडेव । कंसं जघान किम् ॥

(तत्त्वदी०)–आसन्नेत्यादि॥ पञ्चवर्षाभ्यन्तरमासन्नकालं,पञ्चवर्षातीतं विप्रकृष्टकालंवर्णयन्ति॥

(स्मे लट् लिटोऽपवादः) यजति स्म युधिष्ठिरः॥**(भूतानद्यतने लट् स्मयोगे)** एवं स्म पिता ब्रवीति ॥

(सुबोधिनी)–स्मे लट्–स्मयोगे लड् भवति,न तु लिट् ।स्मेत्यव्ययं भूतकालद्योतकम् ।भूतानद्यतने लट् स्मयोगे॥लङोऽपवादः॥ब्रवीति स्म।अब्रवीदित्यर्थः ॥

(ननौ पृष्टप्रतिवचने भूते लट्)अकार्षीःकिम्।ननु करोमि भोः॥

(सुबोधिनी)–ननौ पृष्टप्रतिवचने भूते लट् ॥ पृच्छ्यते इति पृष्टः । कर्मणि क्तः । पृष्टस्य प्रतिवचनं पृष्टप्रतिवचनमिति षष्ठीसमासः । भावे क्तप्रत्यये तु पृष्टं प्रश्नः । पृष्टपूर्वं च तत्प्रतिवचनं च पृष्टप्रतिवचनमिति मध्यमपदलोपी समासः। ननु करोमि अकार्षमित्यर्थः ॥

(तत्त्वदी०)–नना विति॥ पृष्टेति कर्मणि क्तः पृष्टस्य प्रतिवचनं पृष्टप्रतिवचनमिति षष्ठीसमासः । भावे तु पृष्टं प्रश्नस्तत्पूर्वं प्रतिवचनमित्युत्तरपदलोपी समासः ॥

(नन्वोर्वा) अकार्षीः किम् न करोमि । नाकार्षम्।अहं नु करोमि । अहं न्वकार्षम् ॥

(सुबोधिनी)–नन्वोर्वा ॥ ननुनिपातयोर्योगे पृष्टप्रतिवचने भूते वा लङ् भवति। पक्षे लुङ्लिटौ ॥

(पुराशब्दयोगे भूतानद्यतने वा लुङ्लटौ न तु स्मयोगे) वसन्तीह पुरा छात्राः, अवात्सुः, अवसन, ऊषुर्वा ॥ स्मेति किम्। यजति स्म पुरा युधिष्ठिरः ॥

(सुबोधिनी)–पुराशब्दयोगे भूतानद्यतने वा लुङ्लटौ न तु स्मयोगे॥ पक्षे लङ्लिटौ ॥ स्मेति किम्। यजति स्म पुरा युधिष्ठिरः ॥

(यावत्पुरानिपातयोर्भविष्यति लट्) यावद्भुङ्क्ते। पुरा भुङ्क्ते। मोक्ष्यसे, भोक्ता, वा॥ (कदाकर्ह्योर्वा भविष्यति लट्) कदा कर्हि वा भुङ्क्ते, भोक्ष्यसे, भोक्ता वा ॥

(सुबोधिनी)–यावत्पुरानिपातयोर्भविष्यति लट् ॥ यावद्भुङ्क्ते। निश्चितं भोक्ष्यत इत्यर्थः ॥ निपातावेतौ निश्चयं द्योतयतः ॥ निपातयोः किम्। यावद्दास्यते तावद्भोक्ष्यत। करणभूतया पुरा यास्यति ॥

(वर्तमानसामीप्ये भूते भविष्यति च वर्तमानवद्वा) कदाऽऽगतोसि। अयमागच्छामि, अयमागमम्। कदा गमिष्यसि। एष गच्छामि, गमिष्यामि वा ॥

(सुबोधिनी)–वर्तमानसामीप्ये भूते भविष्यति च वर्तमानवद्वा ॥ कदाऽऽगतोऽसीति भूतकालेन प्रश्नवाक्यम्। अयमागच्छामीत्युत्तरं भूतकालाभिव्यक्तये। अयमिति प्रयोगस्त्विदानीमेवागतमिति वर्तमानसमीपभूतकालद्योतनाय। तेन ह्यागमनं विना भूतरूपं यद्धूलीधूसरताप्रस्वेदादियुक्तं तत्प्रतिनिर्दिश्यते। एवं कदा गमिष्यसीति भविष्यत्कालेन प्रश्नवाक्यम्। एष गच्छामीत्युत्तरं भविष्यत्कालाभिव्यक्तये। एष इति प्रयोगस्त्विदानीमेव गमिष्यामीति वर्तमानसमीपभविष्यत्कालद्योतनाय। तेन हि गमनेन विना भूतं यत्परिकरबन्धादियुक्तं तत्प्रतिनिर्दिश्यते। तत्र कदेति प्रश्ने उत्तरवाक्ययोः कालानुपादानादयमेषशब्दाभ्यामिदानीमिति कालावगमः ॥

(तत्त्वदी०)–अयमागच्छामीत्यादि ॥ अयमेषपदाभ्यामागमनादिना भूत यद्रूपं प्रस्वेदादियुक्त तत्प्रतिनिर्दिश्यते। इदानीमागममित्यर्थः ॥

(क्षिप्रवचने लट्) वृष्टिश्चेत्क्षिप्रमाशु त्वरितं वा यास्यति तदा शीघ्रं वप्स्यामः ॥

(सुबोधिनी)–क्षिप्रवचने लट्॥ वचनग्रहणं स्वरूपग्रहणनिरासार्थम्। क्षिप्रपर्याय उपपदे लट् ॥

(तत्त्वदी०)-क्षिप्रेति ॥ क्षिप्रपर्यायस्यापि ग्रहणं न तु स्वरूपस्यैव ॥

(गर्हायां लडपिजात्वोः कालत्रये) अपि जायां त्यजसि । जातु गणिकामाधत्से ॥

(सुबोधिनी)-गर्हायां लडपिजात्वोः कालत्रये ॥ आभ्यां योगे लट् स्याद्गर्हायाम् कालत्रये परत्वाल्लिङादीनयं बाधते ॥ अपि जायां त्यजसि । त्यक्ष्यसि, अत्याक्षीः इत्यादिविषये त्यजसीत्यादि लडेव प्रयुज्यत इति भावः ॥ एवं यो जायामत्यजत्, तत्याज, त्यक्ष्यति, अत्याक्षीदित्यादिविषये यो जायामपि त्यजति, जातु गणिकामाधत्ते गर्हितमेत् ॥

(तत्त्वदी०)-जातु गणिकामिति । गर्हितमेतत् ॥

(वा कथमि लिङ्लटौ गर्हायां कालत्रये) कथं धर्मं त्यजेस्त्यजसि वा ॥

(सुबोधिनी)-वा कथमि लिङ्लटौ गर्हायां कालत्रये पक्षे लङ्लिट्लुट्लट्लङ्लुङः । भूतानद्यतने लुङ् कथं धर्ममत्यजः । परोक्षानद्यतने भूते लिट् कथं धर्मं तत्यक्थ । भविष्यत्यनद्यतने लुट् कथं धर्मं त्यक्तासि । भविष्यत्सामान्ये लट् कथं धर्मं त्यक्ष्यसि । क्रियातिक्रमेण लङ् कथं धर्ममत्यक्षत् । भूतसामान्ये लुङ् कथं धर्ममत्याक्षीः ॥

(जातुयद्यदायदियोगे लिङ् लटोऽपवादः) जातु यद् यदा यदि वा त्वादृशो हरिं निन्देत् नावकल्पयामि, न मर्षयामि ॥

(सुबोधिनी)-जातुयद्यदायदियोगे लिङ् लटोपवादः॥अनवक्लृप्त्यमर्षयोर्लिङ् स्यादेषां योगे । अनवक्लृप्तिरसंभावना । अमर्षोऽक्षमा लटोऽपवादः लङ् तु क्रियानिष्पत्तौ भूते वा, भविष्यति तु नित्यमित्यर्थः ॥ जातु भवान् हरिमनिन्दिष्यदित्याद्युदाहर्तव्यम् । अगर्हायामिदम् । गर्हायां तु जातुयोगे लडुक्तः ॥

(तत्त्वदी०)-नावकल्पयामीत्यादि ॥ अनवक्लृप्तिरसंभावना ॥ अमर्षोऽक्षमा ॥

उताप्योर्बाढार्थयोर्लिङ् ॥ समर्थयोरनयोर्लिङ् कालत्रये ॥ उत अपि वा हन्यादयं हरिः ॥ बाढार्थयोरिति किम् । उत दण्डः पतिष्यति । अपि धास्यति द्वारम् ॥

(सुबोधिनी)-उताप्योर्बाढार्थयोर्लिङ् ॥ समर्थयोरनयोर्योगे लिङ् कालत्रये ॥ बाढार्थयोः किम् । उत दण्डः पतिष्यति । अपि धास्यति द्वारमत्र प्रश्न आच्छादनं च गम्यते ॥

(तत्त्वदी०)-समर्थयोरिति ॥ समानाऽर्थो ययोस्तौ तयोः । हलादित्वाद्विलोपः । समशब्द एव वा तुल्यार्थे । बाढमित्यर्थेऽनयोस्तुल्यार्थता । उत दण्ड इत्यादि ॥ प्रश्न आच्छादनं चार्थः॥

(स्वाभिप्रायाविष्करणे गम्ये लिङ् कालत्रये न तु कच्चिति) कामो मे भुञ्जीत भवानिति ॥ कच्चिदिति किम्। कच्चिज्जीवति मे माता ॥

(सुबोधिनी)-स्वाभिप्रायाविष्करणे गम्ये लिङ् कालत्रये न तु कच्चिति सर्वलकारापवादः ॥ न तु कच्चितीति किम्। कामो मे कच्चिज्जीवति। वर्तमानसामीप्ये इति लट् ॥

(हेतुहेतुमतोर्भविष्यति लिङ् वा) कृष्णं नमेच्चेत्सुखं यायात्। कृष्णं नंस्यति चेत्सुखं यास्यति ॥

(सुबोधिनी)-हेतुहेतुमतोर्भविष्यति लिङ् वा ॥ हेतुः कारणम्। हेतुमत्फलम्। पक्षे लट्। कृष्णं नमेच्चेत्सुखं यायात्। कृष्णनतिः सुखप्राप्तेर्हेतुः। भविष्यत्येवेष्यते। नेह हन्तीति पलायते ॥

(तत्त्वदी०)-हेतुहेतुमतोरिति ॥ हेतुः कारणम्। हेतुमत्फलम् ॥ कृष्णमित्यादि ॥ नमनमात्र हेतुः सुखप्राप्तिः फलम् ॥

(इच्छार्थेषु लिङ्लोटौ कामप्रवेदने) इच्छामि भुञ्जीत, भुङ्क्तां वा भवान् ॥

(सुबोधिनी)-इच्छार्थेषु लिङ्लोटौ कामप्रवेदने॥काम इच्छा तस्य प्रवेदनं प्रकाशनं तस्मिन्नर्थे ॥

(तत्त्वदी०)-कामप्रवेदन इति ॥ काम इच्छा। प्रवेदन प्रकाशनम् ॥

(इच्छार्थेभ्यो लिङ्लटौ वर्तमानेऽर्थे) कामयेत। कामयते ॥

(सुबोधिनी)-इच्छार्थेभ्यो लिङ्लटौ ॥ वर्तमाने इति शेषः। इच्छाऽर्थो येषां ते इच्छार्थास्तेभ्यः। तेन वश कान्तावित्यादयोऽपीच्छार्था ग्राह्याः ॥

(तत्त्वदी०)-इच्छार्थेभ्य इति ॥ इच्छा अर्थो येषां ते इच्छार्थाः। तेन वश कान्तौ इत्यादयोऽपीच्छार्था ग्राह्याः ॥

(पौनःपुन्ये भृशार्थे च धातोर्लोट् सर्वलकारविषये तस्य हिस्वौ सर्वतुवादिविषये तध्वमोर्विषये वा क्रियासमभिहारे द्वित्वं तस्यैव धातोरनुप्रयोगश्च)

(सुबोधिनी) पौनःपुन्ये भृशार्थे च धातोर्लोट् सर्वलकारविषये तस्य हिस्वौ सर्वतुवादिविषये तध्वमोर्विषये वा॥पौनःपुन्यं भृशार्थश्च धातोरेवार्थः। लोट् द्योतक इति भावः ॥किं च तुवादीनामादेशत्वेऽपि तेषां स्थाने विहितस्य हेः स्थानिवद्भावेन पित्त्वात् 'ङिच्च पिन्न पिच्च ङिन्न' इति भाष्योक्तत्वात् ङित्त्वाभावे तुनादी-

त्यत्र ईहसे इतीत्वं न स्यात्। तृण्ढि इत्यत्र तु तृहो नमि कृते, इमागमः पितीतिमागमो तृणेढि इति च स्यात्। अतो लोटो हिस्वावित्युक्तम्। सकलपुरुववचनविषये परस्मैपदिभ्यो हिः कर्तरि। आत्मनेपादिभ्यः स्वो भावकर्मकर्तृषु। क्रियासमभिहारे इति द्वित्वम्। यस्माद्धातोर्लोड्विहितस्तस्यैव धातोरनुप्रयोगश्च कर्तव्यः। अनुप्रयोगाद्यथायथं लडादयस्तिवादयश्च कर्तव्याः। ततः संख्याकालयोः पुरुषविशेषार्थस्य चाभिव्यक्तिर्भवति। अत्र लोडन्तविषयेसङ्ख्याकारकादीनांदिस्वान्तादप्रतीतिस्तद्बोधनायानुप्रयोगोन्यायतएव- याहि याहीति याति, यातः यान्ति। यासि। पुनः पुनरतिशयेन वा यानं हि प्रत्ययान्तस्यार्थः। एककर्तृकं वर्तमानं यानं यातीत्यस्यार्थः॥ इतिशब्दस्त्वभेदान्वयें तात्पर्यं ग्राहयति। मध्यमपुरुषबहुवचने तशब्दे तु यातयातेति यूयं याथ। पक्षे याहियाहीति यूयं याथ। एवं भूतभविष्यतोरप्युदाहरणम्। याहि याहीति यास्याति। याहियाहीत्ययासीत्। मध्यमपुरुषबहुवचने ध्वशब्दे तु अधीध्वमधीध्वमिति यूयमधीध्वे। पक्षे अधीष्वाधीष्वेत्यधीष्व। भावकर्मणोस्तु भूयस्व भूयस्वेति भूयते। पच्यस्वपच्यस्वेति पच्यते। गद्यस्वगद्यस्वेति गद्यते। भज्यस्वभज्यस्वेति भज्यते। इत्यादि ज्ञेयम्॥

(तत्त्वदी०)-**पौनःपुन्ये भृशार्थे** चेति॥ पुनःपुनर्भावः पौनःपुन्यम्। भृशार्थोऽतिशयार्थः। एतद्विशिष्टक्रियावचनाद्धातोरित्यर्थः॥ **क्रियासमभिहारे द्वित्व**मिति॥ पौनःपुन्ये भृशार्थे चेत्यर्थः॥ परस्मैपदिभ्यो हिः कर्तरि, आत्मनेपादिभ्यः स्वः भावकर्मकर्तृषु सकलपुरुषवचनविषये। याहि याहीति यातीति पुनःपुनरतिशयेन वा यान लोडन्तस्यार्थः। एककर्तृकं वर्तमानं यान तिबन्तस्य। कालपुरुषाविशेषाभिव्यक्तिः सर्वत्र तु प्रयोगादेव बोध्या। इतिशब्दोऽभेदान्वयद्योतकः। भविष्यद्भूतयोरप्युदाहरति॥ **यास्यतीत्यादि**॥ स्वमुदाहरन्ति॥ **अधीष्वेत्यादि**॥

(अनेकक्रियासमुच्चये वा। लोट् तस्य हिस्वौ तध्वमोर्विषये वा)

समानार्थस्य धातोरनुप्रयोगात्तिवादयः॥ याहि याहीति याति। एवं यातः, यान्ति। यासि, याथः, याथ। यातयातेति यूयं याथ। यामि। यावः। यामः। याहियाहीति यास्यति। अयासीत्॥ अधीश्वाधीश्वेत्यधीते। एवमन्यत्रापि। ध्वंविषये प्राग्वत्। पक्षे अधीध्वमधीध्वमिति यूयमधीध्वे॥ सक्तून् पिब, धानाः खादेत्यभ्यवहराति। पिबत.खादतेत्यभ्यवहरथ। अन्नं भुङ्क्ष्व, दाधिकमास्वादयस्वेत्यभ्यवहरते। भुङ्ग्ध्वमास्वादयध्वमित्यभ्यवहरध्वे॥ इति लकारार्थप्रक्रिया॥ ॥ इत्याख्यातप्रक्रिया॥

(सुबोधिनी)-अनेकक्रियासमुच्चये तु वा लोट् तस्य हिस्वौ तध्वमोर्विषये वा॥ सामान्यार्थस्य धातोरनुप्रयोगात्तिवादयः॥ चिनोतेर्भावे स्वराद इत्यप्रत्यये कृते समुच्चीयते इति समुच्चयः। अस्मिन् सूत्रे पौनःपुन्ये भृशार्थे चेत्यनुवर्तनाद्द्वित्वमकृत्वैवोदाहराति सक्तून्पिबेत्यादि। तध्वमोस्तु पिबत खादतेति यूयमभ्यवहरथ। पक्षे

पिब खादेति यूयमभ्यवहरथ । भुङ्ग्ध्वमास्वादयध्वमिति यूयमभ्यवहरध्वम्। पक्षे भुङ्क्ष्व, आस्वादयस्वेति यूयमभ्यवहरध्वम् । लोडभावपक्षे सक्तून् पिबति। धानाः खादति। अन्न भुङ्क्ते। दाधिकमास्वादयते। 'धाना भृष्टयवे स्त्रियाम्' इत्यमरः॥ दध्ना संस्कृतं दधिकं व्यञ्जनादि । एतेन "पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः। विगृह्य चक्रे नमुचिद्विषा वली य इत्थमस्वास्थ्यमहर्दिवं दिवः" इति व्याख्यातम् । अवस्कन्दनलवनादिरूपा भूतानद्यतनपरोक्षाएककर्तृका अस्वास्थ्यक्रियेत्यर्थात्।इह पुनःपुनश्चस्कन्देत्यादिरर्थ इति तु व्याख्यानं भ्रममूलकमेव।द्वितीयसूत्रे क्रियासमभिहारे इत्यस्यानुवृत्तेः,लोडन्तस्य द्वित्वापत्तेश्च।पुरीमवस्कन्देत्यादि मध्यमपुरुषैकवचनमित्यपि केषांचिद् भ्रम एव। पुरुषवचनसंज्ञे इह नेत्युक्तत्वात् ॥ इति सुबोधिन्यां लकारार्थप्रक्रिया ॥

बुद्धिमान्द्यवशात्किंचिद्यदशुद्धमलेखि तत् ।
द्वेषभावं समुत्सृज्य शोधनीयं मनीषिभिः ॥

इति श्रीसिद्धान्तचन्द्रिकाव्याख्यायां सदानन्दाख्यायामाख्यातप्रक्रिया समाप्ता ॥

(तत्त्वदी०)-सक्तून् पिबेत्यादि ॥ सक्तून् पिब सक्तुपानादिक करोतीत्यर्थः।एव पुरीमवस्कन्द लुनीहि नन्दनमित्यादि व्याख्येयम् । अवचस्कन्द लुलावेत्यादिः । यत्तु वासुदेवादिभिरतिशयेन पुनःपुनर्वाऽवचस्कन्देत्यादि व्याख्यात तदसत् । अनेकक्रियासमुच्चये क्रियासमभिहारेऽस्यानुक्तेः लोडन्तद्वित्वापत्तेश्च ॥ इति तत्त्वदीपिकायां लकारार्थप्रक्रिया ॥ १० ॥

कृतायामिह टीकाया लोकेशकरशर्मणा । अगादगाधबुद्धीना कृतमाख्यातसाधनम् ॥

इति श्रीलोकेशकरविरचितयां सिद्धान्तचन्द्रिकाव्याख्याया तत्त्वदीपिकायामाख्यातप्रक्रिया संपूर्णा॥

इत्याख्यातप्रक्रिया समाप्ता ॥

अथ पूर्वकृदन्तप्रक्रिया।

मूलम्-

कृत्कर्तरि॥ वक्ष्यमाणाः प्रत्ययाः कृत्संज्ञकास्ते च कर्तरि भवन्ति॥

सुबोधिनी-

प्रतोष्ट्रूय जगन्नाथं सदानन्देन सन्मुदा ॥
सिद्धान्तचन्द्रिकावृत्तिः क्रियते कृत्प्रकाशिका ॥ १ ॥

मूलम्-

कृत्कर्तरि ॥ उत्सर्गतः कर्तरीति बोध्यम् ॥

(तत्त्वदीपिका)-**कृत्कर्तरीति** ॥ उत्सर्गतः कर्तरीति बोध्यम् ॥

तृवुणौ ॥ धातोः पक्ता ॥

(सुबोधिनी)-तृवुणौ ॥ धातेरेतौ स्तः ॥ कर्तरि तृप्रत्ययमाह-पचतीति विग्रहे चोः कुरिति कुः।कृत्तद्धितेति नामसंज्ञायां स्यादिर्विभक्तिः। सेरा इति सेरात्वं टिलोपश्च। पक्ता। पाकानुकूलकृतिमान्देवदत्त इत्यर्थः॥

(तत्त्वदी०)-**धातो**रिति ॥ अधिकारादिदं लब्धमित्याशयः॥ **पक्ते**ति ॥ पचतीति वाक्यम्। चोः कुरिति कुत्वम् ॥

कृतः ॥ वसादेः कृत इट् ॥ कुटिता ॥ एधते इति एधिता ॥ गोपायिता-गोपिता-गोप्ता। सहिता-सोढा। एषिता-एष्टा ॥

(सुबोधिनी)-कृतः॥ धातोः परस्य वसादेःकृत्प्रत्ययस्येट् ॥ वसोऽत्र प्रत्याहारः। भवतीति भविता॥ कुट कौटिल्ये। तुदादिः। कुटादेर्ङिणद्वर्जे इति तृप्रत्ययस्य ङित्त्वान्न गुणः। कुटतीति कुटिता॥ एधते इति एधिता॥ गुपू रक्षणे। आयादयोऽनपीति वाऽऽदयः। इति आयपक्षे कृत इति नित्यमिट्। अन्यत्र ऊदितो वेति वेट्। गोपायतीति-गोपायिता-गोपिता-गोप्ता। षह मर्षणे। इषुसहेति वेट्। सहते इति सहिता। इडभावे हो ढः इति हस्य ढः। तयोर्धे इति तस्य धः। ष्टुत्वम्। ढि ढ इति ढलोपपूर्वदीर्घौ। सहिवहोरित्योत्वम्। सोढा ॥ इषु इच्छायाम्। इषुसहेति वेट्। इच्छतीति एषिता। इडभावे ष्टुत्वम् ॥ एष्टा ॥

(तत्त्वदी०)-**कृत** इति **वसादे**रिति॥ वसप्रत्याहार आदिर्यस्य स तथा तस्य॥ **कुटिते**ति॥ ङित्त्वान्न गुणः॥ **सोढे**ति॥ इषुसहेत्यादिना वेट्। ढत्वष्टुत्वढलोपाः। सहिवहोरित्योत्वम्॥

युवोरनाकौ ॥ वाचकः। पाचकः। भावकः॥ आतो युक्। दायकः। घातकः। जनकः। घटकः। दरिद्रायकः। कोटकः। शमकः। नियामकः ॥

(सुबोधिनी)—वुण्प्रत्ययमाह—णकारो वृद्ध्यर्थः । युवोरनाकौ ॥ युश्च वुश्चानयोःसमाहारो युवुःतस्य युवोः॥ वक्तीति वाचकः॥ पचति,पाचयतीति वा पाचकः ॥ भवति, भावयतीति वा भावकः॥ यदि ञ्यन्ताद्गुणाविधिस्तदा ञेरिति ञिलोपः। ददातीति आतो युगिति युक् । दायकः॥ हन्तीति । हनो घदिति घत् । घातकः॥ जनी प्रादुर्भावे । दैवादिकः । जन जनने । जुहोत्यादिः। जनयतीति जनिवध्योरिति न वृद्धिः। ञेरिति ञिलोपः । जनकः ॥ घटयतीति । मितां ह्रस्व इति ह्रस्वः। ञेरिति ञिलोपः। घटकः ॥ दरिद्रातीति । आतो युगिति युक् । दरिद्रायकः। तृप्रत्यये तु कृत इतीट् । दरिद्रातेरनपीत्यालोपः । दरिद्रिता ॥ कुट कौटिल्ये । कुटादेर्ञ्णिद्वर्ज्ज इति वुणोऽङित्वादुपधाया लघोरिति गुणः । कुटतीति कोटकः ॥ शमु उपशमे । मान्तस्य सेटो नेति न वृद्धिः । शाम्यतीति शमकः ॥ यम उपरमे । नियच्छतीति । मान्तस्य सेट इति वृद्धिनिषेधस्तु न वर्तते अस्यानिट्त्वात् । नियामकः ॥

(तत्त्वदी०)—युवोः ॥ युश्च वुश्चेति समाहारः । नुम्त्वनित्यत्वान्न । **दायक इति** । आतो युगिति युक् ॥ **जनक** इति ॥ जनिवध्योरिति न वृद्धिः॥ **कोटक** इति ॥ ञ्णिद्वर्ज्जे इति ङित्त्वाभावाद्गुणः ।

(क्रमेः कर्तर्यात्मनेपदविषयात्कृत इण्न) प्रक्रन्ता ॥

(सुबोधिनी)—क्रमेः कर्तर्यात्मनेपदविषयात्कृत इण्न ॥ आत्मनेपदविषयात्क्रमेः परस्य कर्तरि कृत्प्रत्ययस्येण्न भवति ॥ प्रोपाभ्यां प्रारम्भार्थाभ्यामिति क्रमेरात्मनेपदविषयता । प्रक्रमते इति प्रक्रन्ता । तृप्रत्ययः ॥ कर्तरि किम् । प्रक्रम्यते इति प्रक्रमितव्यम् । आत्मनेपद इति किम् । संक्रामतीति संक्रमिता ॥

(तत्त्वदी०)-प्रक्रन्तेति ॥ प्रोपाभ्यामित्यात्मनेपदविषयता ॥

नाम्युपधात्कः ॥ क्षिपः । बुधः । वृतः ॥

(सुबोधिनी)—नाम्युपधात्कः ॥ कप्रत्ययमाह । प्रत्ययाद्या लशकवर्गा इत्संज्ञका भवन्ति तद्धितवर्ज्जम् ॥ कित्त्वाद् गुणो न । बोधतीति बुधः ॥ क्षिप प्रेरणे। क्षिपतीति क्षिपः ॥ तृप्रत्यये तु क्षेप्ता । वुणि तु क्षेपकः । वर्तते इति वृतः ॥

(तत्त्वदी०)—नाम्युपधादिति॥नामी अवर्णवर्ज्जः उपधा यस्य स तस्मात्॥**क्षिप इति**॥ क्षिपतीति विग्रहः ॥

(प्रीकॄज्ञाभ्यश्च) नुधातोः । प्रियः । किरः । ज्ञः ॥

(सुबोधिनी)—प्रीकॄज्ञाभ्यश्च ॥ एभ्योऽपि कः ॥ प्रीञ् तर्पणे । प्रीणातीति नुधातोरितीय् । प्रियः ॥ कॄ विक्षेपे । किरतीति ॠत इरितीर् । किरः ॥ जानातीति आतोऽनपीत्यालोपः । ज्ञः ॥

(तत्त्वदी०)-प्रिय इति ॥ प्रीञ् तर्पणे । इगु ॥ किर इति ॥ कॄ विक्षेपे । ज्ञा ज्ञ इति ॥ आतोऽनपीत्यालोपः ॥

(उपसर्गे आदन्तात्) प्रदः । सुज्ञः । सुग्लः ॥

(सुबोधिनी)-उपसर्गे आदन्तात् ॥ उपसर्गे पूर्वपदे आदन्ताद्धातोः कः ॥ प्रददातीति आतोऽनपीत्यालोपः । प्रदः ॥ सुष्ठु जानातीति सुज्ञः ॥ ग्लै हर्षक्षये । सुष्ठु ग्लायतीति सुग्लः ॥

(पचिनन्दिग्रहादेरयुणिनि) पचादेरः । नन्द्यादेर्युः । ग्रहादेर्णिनिः ॥ पचः । वदः । चलः । पतः । चरः ॥

(सुबोधिनी)-पचिनन्दिग्रहादेरयुणिनि ॥ द्वंद्वान्ते श्रूयमाणः शब्दः प्रत्येकं संबद्ध्यत इत्यादिशब्दः प्रत्येकं योज्यः ॥ पचादेर्धातोरप्रत्ययः । नन्द्यादेर्धातोर्युप्रत्ययः । ग्रहादेर्धातोर्णिनिप्रत्ययः ॥ अप्रत्ययमाह-पचतीति पचः । वदतीति वदः । चल संचलने । चलतीति चलः । पत्लृ पतने । पततीति पतः ॥ चरतीति चरः ॥

(तत्त्वदी०)-पचिनन्दिग्रहादेरित्यादि ॥ द्वन्द्वान्ते श्रूयमाणस्यादिशब्दस्य प्रत्येकं योगः । अश्च युश्च णिनिश्चेति समाहारद्वन्द्वः । एते च गणा न धातुपाठे पठ्यन्ते किं तु नंदनरमण इत्येवमादिषु नामगणेष्वेवोदाहृत्य प्रकृतयो निर्दिश्यन्त इति ॥ पच इति ॥ पचतीति वाक्यम् । पचादिराकृतिगणः ॥

(चरिचलिपतिवदीनां वा द्वित्वं पूर्वस्यागप्रत्यये) चराचरः । चलाचलः । पतापतः । वदावदः ॥

(सुबोधिनी)-चरिचलिपतिवदीनां वा द्वित्वं पूर्वस्याक् अप्रत्यये ॥ अत्र ह्रस्व इति ह्रस्वः पूर्वस्य हसादिः शेष इत्यादिशेषश्च न भवति आगमस्य दीर्घत्वसामर्थ्यात् ॥ चराचर इत्यादि ॥

(तत्त्वदी०)-चरिचलीत्यादि ॥ चराचर इत्यादि ॥ आगागमविधानसामर्थ्याद्धसादिः शेष इति न । तथाहि सति तस्मिन्नागमादेशयोर्विशेषो न स्यात् । दीर्घत्वविधेर्ह्रस्वोऽपि न ॥

(हन्तेर्हस्य घत्वं च) घनाघनः ॥

(सुबोधिनी)-हन्तेर्हस्य घत्वं च ॥ हन्तेर्द्वित्वं पूर्वस्य हस्य घत्वं वाऽप्रत्यये चकारात्पूर्वस्याक्, उत्तरहस्य तु पूर्वाद्धन्तेरिति घः । घनाघनः ॥

(तत्त्वदी०)-हन्तेः ॥ हन्तेः पूर्वस्यैव उत्तरस्य तु पूर्वादित्यनेनैवेति सिद्धम् । चकारात्पूर्वोक्तमपि ॥

(पाटेर्णिलुक् चोक् च दीर्घश्च पूर्वस्य) पाटूपटः । हनः । पाटः । नन्दनः । वामनः । क्रमणः । दूषणः । साधनः । वर्धनः । शोभनः । रोचनः । रावणः । सहनः । तपनः । दमनः । जल्पनः । लवणः ।

नत्वं निपात्यम्। कोचनः कुच शब्दे चुरादिः ॥ म्लेच्छ अव्यक्ते शब्दे म्लेच्छनः। ग्राही। उत्साही। उद्भासी। स्थायी। मायी। मन्त्री। अयाची। अवाची। अपराधी॥

(सुबोधिनी)-पाटेर्णिलुक् चोक् च दीर्घश्च पूर्वस्य ॥ यद्यपि णेरित्यनेनैव णिलोपः सिद्धस्तथापि प्रत्ययलक्षणेनोपधाया वृद्धिर्मा भूदित्येवमर्थं लुक्करणम्। पूर्वं णिलुक्-ततो द्वित्वम्। तत ऊगागमपूर्वदीर्घौ स्तः ॥पाटयतीति पाटूपटः॥इहापि ह्रस्व-ह्रसादिशेषयोरभावः ॥ पक्षे हन्तीति हनः ॥ णेरिति णिलोपः । पाटः॥युप्रत्ययमाह-युवोरित्यनादेशः। टुणदि समृद्धौ। नन्दयतीति णेरिति णिलोपः। नन्दनः ॥ टुवम् उद्गिरणे॥ग्लास्नावनुवमां चेति वैकल्पिकमित्त्वाभावे वामयतीति वामनः॥दुष वैकृत्ये। दुषेर्णाविति दीर्घः। णेरिति णिलोपः। दूषयतीति दूषणः॥साध संसिद्धौ।साध्यति साधयतीति वा साधनः ॥ वृधु वृद्धौ। वर्धते इति वर्धनः॥ शोभते इति शोभनः॥ रोचते इति रोचनः ॥ रु शब्दे। रावयतीति । णेरिति णिलोपः। रावणः ॥ सह मर्षणे। सहते इति सहनः ॥ तप ऐश्वर्ये । दैवादिकः । तप्यते इति तपनः ॥ दाम्यतीति दमनः ॥ जल्पतीति जल्पनः ॥ कुच शब्दे। कोचनः॥ म्लेच्छ अव्यक्ते शब्दे। म्लेच्छतीति म्लेच्छनः ॥ लुनातीति लवणः । नन्द्यादिगणे निपातनाण्णत्वम्॥ णिनिप्रत्ययमाह-प्रत्ययादौ चवर्गटवर्गावितौ स्त इति णित्त्वादत उपधाया इति वृद्धिः। गृह्णातीति। इनामिति सौ दीर्घः। नाम्नो न इति नलोपः। ग्राही ॥ षह मर्षणे। उत्सहते इति उत्साही ॥ उद्भासते इति उद्भासी॥ तिष्ठतीति। आतो युगिति युक्। स्थायी॥ छो छेदने। छ्यतीति छायी ॥ पिबतीति पायी ॥ मत्रि गुप्तभाषणे चुरादिः। मन्त्रयतीति णेरिति णिलोपः।मन्त्री ॥ टु याचृ याच्ञायाम्। न याचते इति ना इति नञोऽदादेशः।अयाची॥न वदतीति अवादी॥ राध संसिद्धौ। अपराध्यतीति अपराधी ॥

(तत्त्वदी०)-पाटेरिति॥ यद्यपि णेरित्यनेनैव णिलोपः सिद्धस्तथापि प्रत्ययलक्षणेनोपधावृद्धिर्माभूदित्येवमर्थं लुक्करणम्॥पाटूपट इति ॥ पूर्ववद्धसादिशेषह्रस्वयोरभावः॥ नन्दन इति ॥ नन्दयतीति विग्रहः।टुणदि समृद्धौ॥युवोरित्यन।दूषयतीति वाक्यम्।दुषवैकृत्ये।दुषेर्णाविति दीर्घः॥

दृशादेः शः ॥ दृशपाघ्राध्माधेड्भ्यः शः ॥

(सुबोधिनी)-दृशादेः शः ॥ दृशपाघ्राध्माधेड्भ्यः शप्रत्ययो भवति ॥शप्रत्ययमाह--शस्येत्संज्ञा ॥

(तत्त्वदी०)-दृशादेः॥ आदिपदग्राह्यानाह-दृशपाघ्रेत्यादि ॥

शिति चतुर्वत् ॥ चतुर्षु तिबादिषु यत्कार्यमुक्तं तच्छिति परे भवति॥पश्यः। धयः।धमः।जिघ्रः। पिबः। घ्रः संज्ञाया नान्याघ्रः॥

(सुबोधिनी)–शिति चतुर्वत्॥चतुर्ष्विवेति चतुर्वत् ॥ पश्यतीति दृशादेरिति पश्यादेशः । अप् कर्तरीत्यप् । अदे इत्यलोपः । पश्यः॥पा पाने॥पा रक्षणे इत्ययं तु न गृह्यते । लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति न्यायात्। पिबतीति पिबः॥घ्रा गन्धोपादाने । जिघ्रतीति जिघ्रः । ध्मा शब्दाग्निसंयोगयोः । धमतीति धमः ॥ धेट् पाने । धयतीति धयः ॥ घ्रः संज्ञायां नासंज्ञायां वाच्यायामस्माच्छो न ।विशेषेण जिघ्रतीति उपसर्गे आदन्तादिति कः॥आतोऽनपीत्यालोपे व्याघ्रः॥

(तत्त्वदी०)–पश्य इति॥पश्यतीति विग्रहः।चतुर्वत्करणादप्पश्यादेशौ ॥ एवमन्यत्रापि ॥ अत्र केचिदुपसर्गमनुवर्तयन्ति बहवः।श्रीहर्षोऽपि'फलानि धूमस्य धयान्'इत्युदाहृतवान् ॥ व्याघ्र इति ॥ विशेषेण जिघ्रतीति व्याघ्रः । उपसर्गे आदन्तादिति कः ॥

(अनुपसर्गेभ्यो लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यः शः) लिम्पः । विन्दः । धारयः । पारयः । वेदयः । उदेजयः । चेतयः । सातिः सुखे ।सातयः । साहयः ॥

(सुबोधिनी)–अनुपसर्गेभ्यो लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यः शः ॥ लिप उपदेहे । विद्लृ लाभे । तौदादिकाविमौ । भाविना मुमा निर्दिष्टौ । तेन लाभार्थस्यैव विदेर्ग्रहणं न तु सत्ताद्यर्थकस्य । लिम्पतीति । विन्दतीति तुदादेरित्यः अदेरित्यलोपः । लिम्पः । विन्दः । मुचादेरिति मुम् ॥ धृञ् धारणे । धृङ् अवस्थाने । ञ्यन्तयोर्द्वयोरपि ग्रहणम् । धारयतीति धारयः ॥ पार कर्मसमाप्तौ चुरादिः । पृ पालनादौ इति ञ्यन्तो वा । पारयतीति पारयः ॥ विद चेतनादिषु चुरादिः । ज्ञानाद्यर्थानामन्यतमो ञ्यन्तो वा । वेदयतीति वेदयः ॥ उत्पूर्वः एजृ कम्पने । ञ्यन्तः । उदेजयतीति उदेजयः॥ चित संचेतने चुरादिः । चेतयतीति चेतयः ॥ सातिः सुखे । सौत्रः । सातयतीति सातयः॥ क्विप्प्रत्यये तु सात् परमात्मा सात् विद्यते येषां ते सात्वन्तो भक्ताः॥षह मर्षणे चुरादिः । प्रयोजकञ्यन्तो वा । साहयतीति साहयः ॥ अनुपसर्गेभ्य इति किम् । प्रलिपः । नाम्युपधादिति कः ॥

(तत्त्वदी०)–अनुपसर्गेभ्यः ॥ लिप उपदेहे । विद्लृ लाभे । समुम्निर्देशाल्लाभार्थादन्येषामग्रहणम् ॥ धृञ् धारणे । धृङ् अवस्थाने । द्वयोरपि ञ्यन्तयोर्ग्रहणम् ॥ पार कर्मसमाप्तौ । पॄ पालनपूरणयोरिति वा ञ्यन्तः॥विद चेतनाख्याननिवासेषु। चुरादिञ्यन्तः।ज्ञानाद्यर्थानामन्यतमो वा प्रेरणञ्यन्तः । उत्पूर्व एजृ कम्पने॥षह मर्षणे चुरादिः । प्रेरणार्थञ्यन्तो वा ॥ लिम्पविन्दौ तुदादित्वादः । मुचादित्वान्मुम् । धारयादिष्वदादयोगणाः यादृशाः ॥

(नौ लिम्पेः) निलिम्पाः देवाः ॥

(सुबोधिनी)–नौ लिम्पेः ॥ नौ पूर्वपदे शः ॥ निलिम्पतीति निलिम्पा देवाः ॥

(गवादिषु विन्देः संज्ञायाम्) गोविन्दः । अरविन्दम् ॥

(सुबोधिनी)—गवादिषु विन्देः संज्ञायाम् ॥ कार्येऽण् इत्यस्यापवादोऽयम् । गां विन्दतीति गोविन्दः ॥ चक्रस्य नाभिनेम्योरन्तराले स्थितानि काष्ठान्यरा उच्यन्ते अराकाराणि दलानि तत्सादृश्यादरास्तान् विन्दते लभत इत्यरविन्दम् ॥

(तत्त्वदी०)—अरविन्दमिति ॥ चक्रनाभिनेम्यन्तरालस्थितकाष्ठान्यरास्तदाकाराणि दलानि विन्दति प्राप्नोतीति विग्रहः ॥

(दाञ्धाञोर्वा) ददः । दधः ।

(सुबोधिनी)—दाञ्धाञोर्वा । अनुपसर्गाभ्यामाभ्यां वा शः ॥ ददातीति दधातीति । द्वादेरिति द्वित्वम् । शस्य ङित्त्वाद्वादेरित्यलोपः । ददः । दधः । पक्षे ज्वलादेरिति णः । आतो युगिति युक् । दायः । धायः ॥ उपसर्गे किम् । प्रदः । प्रधः । उपसर्गे इति कः । दद दाने दध धारणे । एतयोरपि ददः दध इति ॥

(तत्त्वदी०)—पश्य इति ॥ पश्यतीति विग्रहः । चतुर्वर्त्करणादप्यश्यादेशौ ॥ एवमन्यत्रापि ॥ अत्र केचिदुपसर्गमनुवर्तयन्ति बहवः । श्रीहर्षोऽपि 'फलानि धूमस्य धयान्' इत्युदाहृतवान् ॥ व्याघ्र इति ॥ विशेषेण जिघ्रतीति व्याघ्रः । उपसर्गे आदन्तादिति कः ॥

ज्वलादेर्णः ॥ ज्वालः । तापः ॥ (श्यादेश्च) अवश्यायः । दायः । धायः ॥

(सुबोधिनी)—ज्वलादेर्णः ॥ अनुपसर्गाज्ज्वलादेर्वा णः ॥ णप्रत्ययमाह—णकारो वृद्ध्यर्थः । ज्वलतीति ज्वालः । चलतीति चालः । तप सन्तापे । तपतीति तापः । पक्षे पचादेरित्यः । ज्वलः । चलः । तपः । उपसर्गे तु । उज्ज्वलः ॥

(तत्त्वदी०)—ज्वलादेरिति ॥ पान्थ इत्यादौ पथ्यादिपाठसामर्थ्यान्नो मध्ये नुम् । अणप्यत्रेति केचित् । 'प्रियाङ्गनान्थः कुचयोर्निरन्त्य' इति श्रीहर्षोऽपि ॥

कार्येऽण् ॥ कर्मण्युपपदे धातोरण् ॥ कुम्भकारः ॥

(सुबोधिनी)—कार्येऽण् ॥ अण्प्रत्ययमाह—णकारो वृद्ध्यर्थः । कुम्भं करोतीत्यत्राणि कृते कर्तृकार्ययोरिति षष्ठ्यन्तस्य कुम्भशब्दस्य नाम्नश्च कृतेति कारशब्देन समासः ॥ कुम्भस्य कारः कुम्भकारः । कथं तर्हि गङ्गाधरभूधरादय इति । पदसंस्कारपक्षे धरतीति धरः गङ्गाया धरः गङ्गाधरः इति शेषे कृति वेति कर्मणि या षष्ठी तदन्तेन समासः ॥

(तत्त्वदी०)—कुम्भकार इति ॥ [illegible] । [illegible] कृते कर्तृकार्ययोरिति षष्ठ्यन्तेन कुम्भशब्देन [illegible] । गङ्गाधर [illegible] गङ्गाया धर इति [illegible] ॥

(ह्वावामश्च) स्वर्गह्वः । तन्तुवायः । धान्यमायः ॥

(सुबोधिनी)-शिति चतुर्वत्॥चतुर्ष्विवेति चतुर्वत् ॥ पश्यतीति दृशादेरिति पश्यादेशः । अप् कर्तरीत्यप् । अदे इत्यलोपः । पश्यः॥पा पाने॥पा रक्षणे इत्ययं तु न गृह्यते । लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति न्यायात्॥ पिबतीति पिबः॥घ्रा गन्धोपादाने । जिघ्रतीति जिघ्रः । ध्मा शब्दाग्निसंयोगयोः । धमतीति धमः ॥ धेट् पाने । धयतीति धयः ॥ घ्रः संज्ञायां नासंज्ञायां वाच्यायामस्माच्छो न ।विशेषेण जिघ्रतीति उपसर्गे आदन्तादिति कः॥आतोऽनपीत्यालोपे व्याघ्रः॥

(तत्त्वदी०)--पश्य इति॥पश्यतीति विग्रहः।चतुर्वत्करणादप्पश्यादेशौ ॥ एवमन्यत्रापि ॥ अत्र केचिदुपसर्गमनुवर्तयन्ति बहवः।श्रीहर्षोऽपि'फलानि धूमस्य धयान्'इत्युदाहृतवान् ॥ व्याघ्र इति ॥ विशेषेण जिघ्रतीति व्याघ्रः । उपसर्गे आदन्तादिति कः ॥

(अनुपसर्गेभ्यो लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यः शः) लिम्पः । विन्दः । धारयः । पारयः । वेदयः । उदेजयः । चेतयः । सातिः सुखे ।सातयः । साहयः ॥

(सुबोधिनी)-अनुपसर्गेभ्यो लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यः शः ॥ लिप उपदेहे । विद्लृ लाभे । तौदादिकाविमौ । भाविना मुमा निर्दिष्टौ । तेन लाभार्थस्यैव विदेर्ग्रहणं न तु सत्ताद्यर्थकस्य । लिम्पतीति । विन्दतीति तुदादेरित्यः अदेरित्यलोपः । लिम्पः । विन्दः । मुचादेरिति मुम् ॥ धृञ् धारणे । धृङ् अवस्थाने । ञ्यन्तयोर्द्वयोरपि ग्रहणम् । धारयतीति धारयः ॥ पार कर्मसमाप्तौ चुरादिः । पृ पालनादौ इति ञ्यन्तो वा । पारयतीति पारयः ॥ विद चेतनादिषु चुरादिः । ज्ञानाद्यर्थानामन्यतमो ञ्यन्तो वा । वेदयतीति वेदयः ॥ उत्पूर्वः एजृ कम्पने । ञ्यन्तः । उदेजयतीति उदेजयः॥ चित संचेतने चुरादिः । चेतयतीति चेतयः ॥ सातिः सुखे । सौत्रः । सातयतीति सातयः॥ क्विप्प्रत्यये तु सात् परमात्मा सात् विद्यते येषां ते सात्वन्तो भक्ताः॥षह मर्षणे चुरादिः । प्रयोजकञ्यन्तो वा । साहयतीति साहयः ॥ अनुपसर्गेभ्य इति किम् । प्रलिपः । नाम्युपधादिति कः ॥

(तत्त्वदी०)-अनुपसर्गेभ्यः ॥ लिप उपदेहे । विद्लृ लाभे । समुम्निर्देशाल्लाभार्थादन्येषामग्रहणम् ॥ धृञ् धारणे । धृङ् अवस्थाने । द्वयोरपि ञ्यन्तयोर्ग्रहणम् ॥ पार कर्मसमाप्तौ । पृ पालनपूरणयोरिति वा ञ्यन्तः॥विद चेतनाख्याननिवासेषु। चुरादिञ्यन्तः।ज्ञानाद्यर्थानामन्यतमो वा प्रेरणञ्यन्तः । उत्पूर्व एजृ कम्पने॥षह मर्षणे चुरादिः । प्रेरणार्थञ्यन्तो वा ॥ लिम्पविन्दौ-स्तुदादित्वादः । मुचादित्वान्मुम् । धार्यादिष्वत्राद्ययोगणाः यादृशाः ॥

(नौ लिम्पेः) निलिम्पाः देवाः ॥

(सुबोधिनी)-नौ लिम्पेः ॥ नौ पूर्वपदे शः ॥ निलिम्पतीति निलिम्पा देवाः ॥

(गवादिषु विन्देः संज्ञायाम्) गोविन्दः । अरविन्दम् ॥

(सुबोधिनी)—गवादिषु विन्देः संज्ञायाम् ॥ कार्येऽण् इत्यस्यापवादोऽयम् । गां विन्दतीति गोविन्दः॥चक्रस्य नाभिनेम्योरन्तराले स्थितानि काष्ठान्यरा उच्यन्ते अराकाराणि दलानि तत्साहश्याद्रास्तान् विन्दते लभत इत्यरविन्दम् ॥

(तत्त्वदी०)—अरविन्दमिति ॥ चक्रनाभिनेम्यन्तरालस्थितकाष्ठान्यरास्तदाकाराणि दलानि विन्दति प्राप्नोतीति विग्रहः ॥

(दाञ्धाञोर्वा) ददः । दधः ।

(सुबोधिनी)—दाञ्धाञोर्वा।अनुपसर्गाभ्यामाभ्यां वा शः ।ददातीति दधातीति । ह्वादिरिति द्वित्वम् । शस्य [illegible] । ददः । दध । पक्षे ज्वलादेरिति णः । आतो युगिति युक्कादाय ।धायः ॥ उपसर्गे किम् । प्रदः । प्रधः।उपसर्गे इति कः । दद् दाने दध धारणे । एतयोरपि ददः दध इति ॥

(तत्त्वदी०)—पश्य इति ॥ [illegible] ॥ [illegible] ॥ अत्र केचिदुपसर्गानन्तर्ये [illegible] ॥ इति ॥ विशेषेण [illegible] ॥

ज्वलादेर्णः ॥ ज्वालः । [illegible] ॥ (श्यादेश्च) अवश्यायः । दायः । धायः ॥

(सुबोधिनी)—ज्वलादेर्णः । अनुपसर्गेभ्यो ज्वलादिभ्यो णः ॥ [illegible] । ज्वलतीति ज्वालः । [illegible] । [illegible] । [illegible] । [illegible] ॥

(तत्त्वदी०)—ज्वलादेरिति [illegible]

कार्येऽण् ॥ कर्मण्युपपदे धातोरण् ॥ कुम्भकारः ॥

(सुबोधिनी)—कार्येऽण् ॥ [illegible] ॥ [illegible] ॥

(तत्त्वदी०)—कुम्भकार इति [illegible]

([illegible]) [illegible]

(सुबोधिनी)-ह्वावामाभ्यश्च ॥ कर्मण्युपपदे एभ्योऽप्यण् ॥ आतो ड इत्यस्यापवादः । स्वर्गं ह्वयतीति सन्ध्यक्षराणामित्यात्वे आतो युक् । स्वर्गह्वायः ॥ वेञ् सन्तुसन्ताने । तन्तुं वयतीति तन्तुवायः॥माङ् माने । मेङ् प्रणिदाने । अनयोरिह ग्रहणं न तु मा माने इत्यस्याकर्मकत्वात् धान्यं मिमीते इति धान्यमायः ॥

(शीलिकामिभक्ष्याचरिक्षमीक्षिभ्यो णः)मांसशीला । मांसकामा । मांसभक्षा । कल्याणाचारा । बहुक्षमा । सुखप्रतीक्षा ॥

(सुबोधिनी)-शीलिकामिभक्ष्याचरिक्षमीक्षिभ्यो णः ॥णप्रत्ययमाह-णो वृद्ध्यर्थः ॥ शीलसमाधौ । मांसं शीलतीति आबतः स्त्रियामित्याप् । मांसशीला॥ मांसं कामयते इति कर्मेञिङिति ञिङ् । ञेरिति ञिलोपः । मांसकामा ॥ भक्ष अदने चुरादिः।मांसं भक्षयतीति मांसभक्षा ॥ कल्याणमाचरतीति कल्याणाचारा॥ क्षमूष् सहने।बहुन् क्षमत इति बहुक्षमा॥ईक्ष दर्शनादौ।सुखं प्रतीक्षे इति सुखप्रतीक्षा॥

आतो डः ॥ कर्मण्युपपदे आदन्ताड्डः ।गोदः। धनदः । पार्ष्णित्रः ॥

(सुबोधिनी)-आतो डः ॥अनुपसर्गादित्येव ॥ डप्रत्ययमाह-अणोऽपवादः । डित्त्वाट्टिलोपः । गां ददातीति गोदः ॥ धनं ददातीति धनदः ॥ पार्ष्णि पश्चात्पदं त्रायते इति पार्ष्णित्रः ॥ अनुपसर्गे किम् । गोसंदायः । अण् युक् च ॥

(तत्त्वदी०)--आतो डः यद्यपि कप्रत्ययेनैवातोऽनपीत्यालोपे रूपसिद्धिस्तथाप्युत्तरार्थं डित्त्वम् । तथा च द्विज इत्यादिसिद्धिः फलम् ॥

नाम्नि च॥ नाम्न्युपपदे धातोर्डः ॥ द्विजः। द्विपः । गृहस्थः॥ ।गिरिशः । पादपः ॥

(सुबोधिनी)- नाम्नि च ॥ नाममात्र इत्यर्थः । आदन्तादित्येव॥ द्वाभ्यां मुखशुण्डाभ्यां पिबतीति द्विपः॥गृहे तिष्ठतीति गृहस्थः ॥ गिरावुपपदे डः छन्दस्येव नान्यत्र भाष्याद्यनुक्तत्वात् । गिरौ शेत इति गिरिशः ॥ पादैः पिबतीति पादपः ॥ कथं तर्हि 'गिरिशमुपचचार प्रत्यहं सा सुकेशी' इति । गिरिरस्यास्तीति गिरिशः । लोमादित्वाच्छः ॥

(तत्त्वदी०)-नाम्नि चेति ॥ नाममात्र इत्यर्थः ॥ द्विप इति ॥ द्वाभ्यां शुण्डादण्डमुखाभ्यां पिबतीति द्विपः।द्विर्जायते इति द्विज 'मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात्' इत्युक्तेः॥

(शुचः शू द्रे) शुचं द्रवतीति शूद्रः ॥

(सुबोधिनी)-शुचः शू द्रे ॥ शुचः शब्दस्य शूरादेशो द्रे परे चात् द्रु धातोर्डप्रत्ययः । द्रु गतौ । शुचं द्रवतीति शूद्रः ॥

(तत्त्वदी०)-शुचः शूद्रे इति ॥शुच शू इत्ययमादेशः द्रे पर इत्यर्थः।शुचं द्विजसेवान्यं शोकं द्रवति प्राप्नोतीति शूद्रः ॥

(उरसो लोपो गुम्वा डान्तेगमौ) उरगः-उरंगः ॥

(सुबोधिनी)-उरसो लोपो मुम्वा डान्तेगमौ ॥ उरस्शब्दस्य सस्य लोपः वा मुमागमः ॥ उरसा गच्छतीति उरगः-उरगः ॥

(तत्त्वदी०)-उरसो लोप इति ॥ सस्येत्यर्थः ॥ उरसा गच्छतीति विग्रहः ॥

(विहायसो विहो मुम्वा डान्तेगमौ)विहगः-विहङ्गः ॥

(सुबोधिनी)-विहायसो विहो मुम्वा डान्तेगमौ ॥ विहायस्शब्दस्य विह ः गमेर्डश्च वा मुम् ॥ विहायसा आकाशेन गच्छतीति विहगः-विहंगः ॥

(भुजतुरयोर्मुम्वा)डान्तेगमौ । भुजगः-भुजङ्गः । तुरगः-तुरङ्गः ॥

(सुबोधिनी)-भुजतुरयोर्मुम्वा ॥ अनयोरुपपदयोर्गमेर्डः अनयोर्मुम् च वा ॥ न कौटिल्येन गच्छतीति भुजगः-भुजंगः ॥ तुरेण वेगेन गच्छतीति तुरगः-तुरंगः

(तत्त्वदी०)-भुजग इति ॥ भुजेन कौटिल्येन गच्छतीति विग्रहः ॥

(संप्रसारणिभ्यो डः) कापवादः ॥ प्रज्यः । आह्वः । प्रह्वः ॥

(सुबोधिनी)-संप्रसारणिभ्यो डः ॥ उपसर्गे आदन्तादित्यस्यापवादः । संप्रसारणं येषां धातूनामस्ति ते संप्रसारणिनस्तेभ्यो डः ॥ ज्या वयोहानौ । प्रजिनातीति प्रज्यः ॥ ह्वेञ् स्पर्द्धायाम् । आह्वयतीति आह्वः । प्रह्वः ॥

(तत्त्वदी०)-प्रसारणिभ्य इति ॥ कापवाद इति ॥ के तुः संप्रसारण स्यादिति भावः ॥ प्रज्य इति ॥ प्राजिनातीति विग्रहः ॥

(तुन्दशोकयोः परिमृजापनुदोरालस्यसुखाहरणयोः कः) तुन्दपरिमृजोऽलसः । शोकापनुदः सुखस्याहर्ता ॥

(सुबोधिनी)-तुन्दशोकयोःपरिमृजापनुदोरालस्यसुखाहरणयोः कः ॥ तुन्दशोकयोः कर्मणोरुपपदयोराभ्यां कः आलस्यसुखाहरणयोरर्थयोः । नुदोरिति पञ्चम्यर्थे षष्ठी ॥ पुनः कप्रत्ययमाह-कित्त्वान्न गुणः । मृजूष् शुद्धौ । तुन्दं परिमार्ष्टीति तुन्दपरिमृजोऽलसः । अत्र मृजेर्वृद्धिरिति वैकल्पिकी वृद्धिर्नेत्येके । स्यादेवेत्यन्ये ॥ णुद प्रेरणे । शोकमपनुदतीति शोकापनुदः सुखस्याहर्ता सुखाभिलाषी । अलसादन्यत्र तुन्दपरिमार्जः । यश्च संसारासारत्वोपदेशेन शोकमपनुदति स शोकापनोदः । अणेव ॥

(तत्त्वदी०)-तुन्दशोकयोरिति ॥ तुन्दशोकयोरुपपदयोः । परिपूर्वो मृजूष् शुद्धौ । अपपूर्वो णुद प्रेरणे इत्यनयोः षष्ठी । पञ्चम्यर्थे षष्ठी । आलस्यसुखाहरणयोरर्थयोः ॥ तुन्दपरिमृजोऽलस इति ॥ य आलस्यात्तुन्दं परिमार्ष्टि स एवमुच्यते । मृजेर्वृद्धिरिति तु व्यवस्थितविभाषया न [illegible] तुन्दपरिमार्ज एव ॥ शोकापनुदः इति ॥ यस्तु संसारानित्यत्वाद्युपदेशेन शोकमपनुदति स शोकापनोद एव ॥

(सुबोधिनी)-ह्वावामाभ्यश्च ॥ कर्मण्युपपदे एभ्योऽप्यण् ॥ आतो ड इत्यस्यापवादः । स्वर्गं ह्वयतीति सन्ध्यक्षराणामित्यात्वे आतो युक् । स्वर्गह्वायः ॥ वेञ् तन्तुसन्ताने । तन्तुं वयतीति तन्तुवायः॥माङ् माने । मेङ् प्रणिदाने । अनयोरिह ग्रहणं न तु मा माने इत्यस्याकर्मकत्वात् धान्यं मिमीते इति धान्यमायः ॥

(शीलिकामिभक्ष्याचरिक्षमीक्षिभ्यो णः)मांसशीला । मांसकामा । मांसभक्षा । कल्याणाचारा । बहुक्षमा । सुखप्रतीक्षा ॥

(सुबोधिनी)-शीलिकामिभक्ष्याचरिक्षमीक्षिभ्यो णः ॥णप्रत्ययमाह-णो वृद्ध्यर्थः ॥ शीलसमाधौ । मांसं शीलतीति आवतः स्त्रियामित्याप् । मांसशीला॥ मांसं कामयते इति कर्मणिङिति णिङ् । णेरिति णिलोपः । मांसकामा ॥ भक्ष अदने चुरादिः।मांसं भक्षयतीति मांसभक्षा ॥ कल्याणमाचरतीति कल्याणाचारा॥ क्षमूष् सहने।बहुन् क्षमत इति बहुक्षमा॥ईक्ष दर्शनादौ।सुखं प्रतीक्षे इति सुखप्रतीक्षा॥

आतो डः ॥ कर्मण्युपपदे आदन्ताड्डः ।गोदः। धनदः । पार्ष्णित्रः ॥

(सुबोधिनी)-आतो डः ॥अनुपसर्गादित्येव ॥ डप्रत्ययमाह-अणोऽपवादः । डित्त्वाट्टिलोपः । गां ददातीति गोदः ॥ धनं ददातीति धनदः ॥ पार्ष्णि पश्चात्पदं त्रायते इति पार्ष्णित्रः ॥ अनुपसर्गे किम् । गोसंदायः । अण् युक् च ॥

(तत्त्वदी०)--आतो डः यद्यपि कप्रत्ययेनैवातोऽनपत्यालोपे रूपसिद्धिस्तथाप्युत्तरार्थं डित्त्वम् । तथा च द्विज इत्यादिसिद्धिः फलम् ॥

नाम्नि च॥ नाम्न्युपपदे धातोर्डः ॥ द्विजः। द्विपः । गृहस्थः॥ गिरिशः । पादपः ॥

(सुबोधिनी)- नाम्नि च ॥ नाममात्र इत्यर्थः । आदन्तादित्येव॥ द्वाभ्यां मुखशुण्डाभ्यां पिबतीति द्विपः॥गृहे तिष्ठतीति गृहस्थः ॥ गिरावुपपदे डः छन्दस्येव नान्यत्र भाष्याद्यनुक्तत्वात् । गिरौ शेत इति गिरिशः ॥ पादैः पिबतीति पादपः ॥ कथं तर्हि 'गिरिशमुपचचार प्रत्यहं सा सुकेशी' इति । गिरिरस्यास्तीति गिरिशः । लोमादित्वाच्छः ॥

(तत्त्वदी०)-नाम्नि चेति ॥ नाममात्र इत्यर्थः ॥ द्विप इति ॥ द्वाभ्यां शुण्डादण्डमुखाभ्यां पिबतीति द्विपः।द्विर्जायते इति द्विज 'मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात्' इत्युक्तेः॥

(शुचः शू द्रे) शुचं द्रवतीति शूद्रः ॥

(सुबोधिनी)-शुचः शू द्रे ॥ शुचः शब्दस्य शूरादेशो द्रे परे चात् द्रु धातोर्डप्रत्ययः । द्रु गतौ । शुचं द्रवतीति शूद्रः ॥

(तत्त्वदी०)-शुचः शूद्रे इति ॥शुच शू इत्ययमादेश, द्रे पर इत्यर्थः।शुचं,द्विजसेवाभावशोकं द्रवति प्राप्नोतीति शूद्रः ॥

(उरसो लोपो सुम्वा डान्तेगमौ) उरगः-उरंगः ॥

(सुबोधिनी)-दारावाहनोऽणन्तस्य च टः संज्ञायाम् ॥ दारुशब्दे उपपदे आङ्पूर्वाद्धन्तेरण् अन्तस्य तस्य टश्च स्यात् ॥पुनरणूप्रत्ययमाह-णित्त्वाद्वृद्धिः।दारु आहन्तीति हनो घदिति घत् । उवमिति वः । दार्वाघाटः।सूत्रे शब्दापेक्षया दाराविति पुंस्त्वम् ।'काष्ठं दार्विन्धनं त्वेधः' इत्यमरः।।टकारविधानार्थमिदं सूत्रम् । अण् तु कार्ये णित्यनेनैव सिद्धः । अन्तग्रहणं स्पष्टार्थम् ॥

(चारौ वा) चार्वाघाटः-चार्वाघातः ॥

(सुबोधिनी)-चारौ वा ॥ चारुशब्दे उपपदे आङ्पूर्वाद्धन्तेरण्,वा टः ॥चारु आहन्तीति चार्वाघाटः-चार्वाघातः ॥

(कर्मणि संपूर्वाच्च) वर्णान् संहन्तीति वर्णसंघाटः-वर्णसंघातः। पदं संहन्तीति पदसंघाटः-पदसंघातः ॥

(सुबोधिनी)-कर्मणि संपूर्वाच्च॥कर्मण्युपपदे संपूर्वाद्धन्तेरण्, वा टः ॥ वर्णान् संहन्तीति वर्णसंघाटः-वर्णसंघातः एवंपदानि संहन्तीति पदसंघाटः-पदसंघातः ॥

(जायापत्योष्टक् लक्षणवति कर्तरि) गमां स्वरे।हनो घ्ने।जायां हन्तीति जायाघ्नो ना । पतिघ्नी स्त्री ॥

(सुबोधिनी)- जायापत्योष्टक् लक्षणवति कर्तरि ॥हन्तेष्टक् । टक्प्रत्ययमाह-टित्त्वाद् ङ्रिवत इतीप् ।मरणसूचकं पाणिरेखादिकं लक्षणं यस्यास्ति स लक्षणवान् तस्मिन्कर्तरि सति । जायां हन्तीति । 'गमां स्वरे' इत्युपधालोपः।हनो घ्ने इति घः । जायाघ्नो ना । पतिघ्नी स्त्री ॥

(तत्त्वदी०)-जायापत्योरिति ॥कथं प्रलम्बघ्नः कृतघ्नः शत्रुघ्नः इत्यादि।मूलविभुजादित्वात् को बोध्यः ॥

(अमनुष्यकर्तृके च)पतिघ्नी पाणिरेखा। जायाघ्नस्तिलकालकः॥

(सुबोधिनी)-अमनुष्यकर्तृके च ॥कर्मण्युपपदे हन्तेष्टक् मनुष्यभिन्ने कर्तरि सति ॥जायाघ्नस्तिलकालकः। पित्तघ्नं घृतम्॥अमनुष्येति किम । आखुघातः शूद्रः अणेव । कथं तर्हि 'बलभद्रः प्रलम्बघ्न' इति शत्रुघ्नः कृतघ्न· इति च ।मूलविभुजादित्वात्कः ॥

(पाणिघताडघौ शिल्पिनि निपात्यौ) पाणिघः।ताडघः।शिल्पिनि किम् । पाणिघातः । ताडघातः ॥

(सुबोधिनी)-पाणिघताडघौ शिल्पिनि निपात्यौ ॥ पाणिताडयोरुपपदयोर्हन्तेष्टक् टिलोपघत्वे च निपात्येते। पाणिं हन्तीति पाणिघः । ताडं हन्तीति ताडघः क्रियासु कौशल्यं शिल्पं तदस्यास्तीति शिल्पी॥ शिल्पिनि किम्। पाणिघातः।ताडघातः । कर्मण्यणित्यण ॥

पः । द्विषतपः । परंतपः ॥ खिमत्ययमाह—आत्मोदरकुक्षिषु भृञः खिः । आत्मानं बिभर्तीति मुमि कृते संयोगान्तस्येति नलोपः। आत्मंभरिः । कुक्षिमुदरं वा बिभर्ति कुक्षिंभरिः, उदरंभरिः ॥ पुनः खमत्ययमाह ॥

(आशिते भुवो भावकरणयोः खः) आशितेन भूयते आशितंभवः । आशितो भवत्यनेनेति वा ॥

(सुबोधिनी)—आशिते भुवो भावकरणयोः खः ॥ आशितशब्दे उपपदे भवतेः खः भावे करणे च॥ यावतौदनेनातिथ्यादिर्भोजितो भवति स ओदन आशितंभवः उच्यते ॥

(तत्त्वदी०)—आशितंभव इति ॥ यावता ओदनेनातिथ्यादिर्भोजितो भवत्याशितंभवः स एवमुच्यते ॥

एजो खश् ॥ जनानेजयतीति जनमेजयः । आत्मानं पण्डितं मन्यते इति पण्डितंमन्यः । मुञ्जं धयतीति मुञ्जंधयः । कूलंधयः ॥

(सुबोधिनी)—एजां खश् ॥ एजादिभ्यः खश् ॥ खश्प्रत्ययमाह—खित्त्वान्मुम् । शित्त्वाच्चतुर्वत्कार्यम् । एजृ कम्पने । जनमेजयतीति अप् कर्तरीत्यप् । अद इत्यलोपः । जनमेजयः ॥ पण्डितमात्मानं मन्यते इति दिवादेरिति यः । पडितंमन्यः । णिनिप्रत्यये पण्डितमानी । मुञ्जं धयतीति अयादेशेन धेटो धय । मुञ्जंधयः ।

(तत्त्वदी०)—एजामिति ॥ बहुवचनमाद्यर्थम् ॥

(खशन्ते पूर्वपदस्यानव्ययस्य ह्रस्वः) मुष्टीं धयतीति मुष्टिंधयः । नाडिंधमः । नासिकंधयः । अनव्ययस्य किम् । दिवामन्या रात्रिः । दोषामन्यमहः । कूलमुद्रुजः कूलमुद्वहः । अरुंतुदः ॥

(सुबोधिनी)—खशन्ते पूर्वपदस्यानव्ययस्य ह्रस्वः ॥ मुष्टीं धयतीति मुष्टिंधयः। मुष्टीं धमतीति मुष्टिंधमः । नाडीं धमतीति नाडिंधमः । नासिकां धयतीति नासिकंधयः । नाडीमुष्टीनासिकानां ह्रस्वः । दशादेरिति ध्माधातोर्धमादेशः ॥ अनव्ययस्य किम् । दिवामन्या रात्रिः । दोषामन्यमहः । रुजो भङ्गे । कूलमुद्रुजतीति कूलमुद्रुजः । तुदादिभ्यः । कूलमुद्वहतीति कूलमुद्वहः । अरुस्तुदतीति अरुंतुदः । मुमि कृते संयोगान्तस्येति सलोपः। 'व्रणोऽस्त्रियामीर्ममरुः' इति 'अरुंतुदस्तु मर्मस्पृक्' इत्यमरः ॥

(तत्त्वदी०)—अरुंतुद इति ॥ व्रणोऽरुरित्यमरः । अरुः तुदतीति विग्रहः । [illegible] इति कृते संयोगान्तस्येति सलोपः ॥

(दार्वाहनोऽणन्तस्य च टः संज्ञायाम्) हन्तेः अणप्रत्ययमाह दारु आहन्तीति दार्वाघाटः ॥

विष्णुः । पलितंभविष्णुः । नग्नंभविष्णुः। अन्धंभविष्णुः। प्रियंभविष्णुः॥ खुकञ्
॥ह-खित्त्वान्मुम् । ञित्त्वाद्वृद्धिः । अनाढ्य आढ्यो भवतीति आढ्यंभावुकः।
नग्नंभावुकः । । स्थूलंभावुकः । पलितंभावुकः । अन्धंभावुकः । प्रियंभावुकः ।

आतो मनिप्क्वनिब्वनिपः ॥ नाम्न्युपपदे आदन्ताद्धातोरेते
प्रत्ययाःस्युः॥ सुदामा। अश्वे तिष्ठतीतिअश्वत्थामा। निपातात्सस्य तः॥

(सुबोधिनी)-आतो मनिप्क्वनिब्वनिपः ॥ प्रत्ययानाह-पित्त्वात्तुक् ।
नात्र गुणः । इकार उच्चारणार्थः। सुष्ठु ददातीति नोपधाया इति दीर्घः। नाम्नो
लोपशिति नलोपः । सुदामा ॥

स्थामि ॥ तादौ किति दोसोमास्थामिर्भवति ॥

(सुबोधिनी)-स्थामि। दोऽवखण्डने । षोऽन्तकर्मणि ॥ मा माने । माङ् माने ।
मेङ् प्रणिदाने इति त्रयाणां ग्रहणम् ॥ ष्ठा गतिनिवृत्तौ ॥ एषामित्त्वं स्यात्तादौ किति।
इत्त्वयोरपवादः ॥

(तत्त्वदी०)-स्थामि । स्थाम् इ इति च्छेदः । इत्यभिप्रेत्याह-दोसो इत्यादि ॥

(शाछोर्वा)

(सुबोधिनी)-शाछोर्वा ॥ शो तनूकरणे। छो छेदने। अनयोरित्वं वा तादौ। किति॥

(तत्त्वदी०)-शाछोर्वा ॥ स्थामीत्यत्र इश्च ईश्चाऽनयोः समाहार इत्याश्रयणेन
शाछोर्वेतीद लब्धम् ॥

**(अपिद्राधागेहाक्पिवतीनामीः किति हसे क्विपि वा न तु
क्यपि)** सुपीवा । घृतपीवा । भूरिदीवा। अनादन्तादपि। सुशर्मा।
सुकर्मा । अपिशब्दान्निरुपपदेभ्योऽपि। ह्रस्वस्य पिति कृति तुक् ।
प्रातरित्वा । वनपि ॥

(सुबोधिनी)-अपिद्राधागेहाक्पिवतीनामीः ॥ दो अवखण्डने। देङ् पालने ।
दाण् दाने । डुदाञ् दाने । एषां चतुर्णां ग्रहणम् । धेट् पाने, डुधाञ् धारणपोष-
णयोरित्युभयोर्ग्रहणम् । गै शब्दे । ओहाक् त्यागे । पा पाने । एषामीत्त्वं स्यात्किति
हसे । क्विपि तु ईत्त्वं वा । क्यपि ईत्त्वं न ॥ सुष्ठु पिबतीति क्त्वान्न गुणः ।
सुपीवा । घृतं पिबतीति घृतपीवा । अनादन्तादपि एते प्रत्ययाः स्युः। शॄ हिंसायाम् ।
सुष्ठु शृणातीति ह्रक्त्योरिति गुण् न । सुशर्मा । ह्रस्वस्य पिति कृति तुक् । ह्रस्वस्य
तुगागमः स्यात्पिति कृति । इण् गतौ । प्रातरेतीति प्रातरित्वा । वनिपि ॥

(जमस्यात्वम्) विशेषेण जायते विजावा । ओणृ । ओणनी-
पराद । पारदृश्वा । राजयुध्वा । सुत्वा । धीवा । पीवा ॥

(अधीने च) राजसात्संपद्यते ॥

(सुबोधिनी)-अधीने च ॥ नाम्नस्तदधीनेऽर्थे सात् स्यात् कृभ्वस्तिसंपद्योगे॥ राजाधीनं संपद्यते इति । नाम्नो नो लोपशिति न लोपः । राजसात्संपद्यते । राजाधीनं करोतीति राजसात्करोति ॥

(देये त्रा च) विप्राधीनं देयं करोति विप्रत्राकरोति। विप्रत्रासंपद्यते । विप्रसात्करोति ॥

(सुबोधिनी)-देये त्रा च॥नाम्नस्तदधीने देयेऽर्थे त्राप्रत्ययः स्यात् चात्सादपि कृभ्वस्तिसंपद्योगे ॥ त्राप्रत्ययमाह-अव्ययत्वाद्विभक्तेर्लुक् । विप्राधीनं देयं करोतीति विप्रत्राकरोति । विप्राधीनं देयं संपद्यते इति विप्रत्रासंपद्यते ॥ देये किम् । राजसाद्भवाति राष्ट्रम् ॥

(देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्यन्तेभ्यो वा त्रा)

देवत्रावन्दे। देवं वन्दे ॥

(सुबोधिनी)-देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्यन्तेभ्यो वा त्रा॥ द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यश्चेभ्यस्त्रा वा स्यात्॥देवान् इति देवत्रा वन्दे।देवेषु इति देवत्रारमे।मनुष्यान् इति मनुष्यत्रा गच्छति।मनुष्येषु इति मनुष्यत्रा वसति।पुरुषान्इति पुरुषत्रा गच्छति। पुरुषेषु इति पुरुषत्रा वसति । पुरून् इति पुरुशब्दोऽत्र बहुशब्दपर्यायः । "पुरुः परागे प्रचुरे स्वर्लोकनृपभेदयोः" इति हेमः । पुरुत्रा गच्छति । पुरुषु इति पुरुत्रा वसति । मर्त्यान् इति मर्त्यत्रा गच्छति । मर्त्येषु इति मर्त्यत्रा वसति ॥

ख्युट् करणे ॥ आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेषूपपदेषु कृञः करणेऽर्थे ख्युट्प्रत्ययः ॥ अनाढ्यमाढ्यं करोत्यनेनाढ्यंकरणम् । सुभगंकरणम् । स्थूलंकरणं दधि । पलितंकरणम् । नग्नंकरणं द्यूतम् । अन्धंकरणम् । प्रियंकरणम् ॥

(सुबोधिनी)-ख्युट् करणे ॥ ख्युट्प्रत्ययमाह-खः खिति पदस्येति मुमर्थः । टइवर्यः । युवोरनाकाविति अनः । आढ्यंकरणम् । एवं सुभगंकरणम् । स्थूलंकरणम् । पलितंकरणम् । नग्नंकरणम् । अन्धंकरणम् । प्रियंकरणम् ॥

(तत्त्वदी०)-च्व्यर्थेष्विति ॥ अभूततद्भावविषयेष्वित्यर्थः ॥ आढ्यंकरणमिति ॥ खित्वान्मुम् ॥

(भुवः खिष्णुखुकञौ कर्तरि) अनाढ्य आढ्यो भवति आढ्यम्भविष्णुः । आढ्यंभावुकः ॥

(सुबोधिनी)-भुवः खिष्णुखुकञौ कर्तरि॥ आढ्यादिषु च्व्यर्थेषूपपदेषु भवतेरेतौ स्तः ॥ खिष्णुप्रत्ययमाह-खित्वान्मुम् । आढ्यंभविष्णुः । एवं सुभगंभविष्णुः ।

(आशासः क्वावुपधाया इत्वम्) आशीः । गीः । पूः ॥

(सुबोधिनी)–आशासः क्वावुपधाया इत्वम्॥आङः शासु इच्छायामित्यात्मनेपदी।शासेरिरिति सूत्रेणेत्वे सिद्धे आशास उपधाया इत्वं क्वावेव नान्यत्रेति नियमार्थमिदं सूत्रम् । तेनाशास्ते इत्यत्रेत्वं न भवति। आशास्से इति आशीः॥गॄ निगरणे । गिरतीति ऋत इरितीर्य्वो र्वि हसे इति दीर्घः।गीः॥पॄ पालनादौ। पिपर्तीति पोरुरित्युर् । य्वो र्वि हसे इति दीर्घः पूः ॥

(इस्मन्त्रक्विषु च्छादेर्ह्रस्वः) छद अपवारणे चुरादिः । तनुं छादयतीति तनुच्छत् ॥ अक्षद्यूः । रेफाच्छ्वोर्लोपः क्वौ झसादौ हे च प्रत्यये । मूः, मुरौ । धूः, धूरौ ॥

(सुबोधिनी)–इस्मन्त्रक्विषु च्छादेर्ह्रस्वः ॥ छद अपवारणे ण्यन्तस्यास्य ह्रस्वः स्यादेषु परेषु ॥ इसि प्रत्यये छदिः । मन् प्रत्यये छद्म । त्रप्रत्यये छत्रम् । क्विपि तु तनुं छादयतीति ञेरिति ञिलोपः । तनुच्छत् । दिवु क्रीडादौ । अक्षैर्दीव्यतीति क्ङिति झसे क्वौ ञ्मे चेति वस्य ऊः।अक्षद्यूः॥मूर्छा मोहसमुच्छ्राययोः । मूर्छतीति । रेफाच्छ्वोरिति छलोपः । य्वो र्वि हसे इति दीर्घः।मूः। धुर्वी हिंसायाम् ।धुर्वतीति रेफाच्छ्वोरिति वलोपः । धूः ॥

(तत्त्वदी०)–तनुच्छादिति ॥ तनु छादयतीति विग्रहः । अक्षैर्दीव्यतीति अक्षद्यूः । मूरिति॥ मूर्छतीति विग्रहः ॥

(दुहः क्वौ घोऽन्तादेशश्च) कामदुघा ॥

(सुबोधिनी)–दुहः क्वौ घोऽन्तादेशश्च ॥ दुहः कप्रत्ययो हस्य घश्च स्यात् ॥ कप्रत्ययमाह–कित्त्वाद्गुणो न । कामं दोग्धीति कामदुघा धेनुः ॥

(दृशेष्टक्सक्वौ चोपमाने कार्ये) उपमाने कर्मण्युपपदे दृशेष्टक्सक्वौ चात्क्विप् ॥

(सुबोधिनी)–दृशेष्टक्सक्वौ चोपमाने कार्ये॥टक्सक्वौ प्रत्ययावाह-टित्त्वादीप् । –कित्त्वाद्गुणो न ॥

आ सर्वादेः ॥ एषु परेषु सर्वादेष्टेरात्वम्॥ अन्यादृशः। अन्यादृक्षः । अन्यादृक् । तादृशः । तादृक्षः । तादृक् ॥

(सुबोधिनी)–आ सर्वादेः॥ सर्वादेष्टेरात्स्याद् दृक्दृशदृक्षेषु परेषु ॥ अन्यमिव पश्यतीति अन्यादृशः । ईपि अन्यादृशी ॥ छशषेति षत्वम्।षढोरिति कत्वम्।अन्यादृक्षः । क्विपि अन्यादृक्।तमिव पश्यतीति तादृशः।ईपि तादृशी । तादृक्षः। तादृक् ॥

(तत्त्वदी०)–एषु परेष्विति॥ एवं चोपमाने कर्मोपपदनिमित्तटक्सक्किप् एषु परेषु सर्वादेष्टेरात्वं नान्यत्र।तेन सर्वं पश्यतीति सर्वदृगित्यत्र न उपमानाभावात्॥ अन्यादृश इति ॥

अन्य इव दृश्यते इति विग्रहः । एवमन्यत्रापि । अत्राहुः कर्त्तरि कृतो विधानात्कर्मार्थताऽयुक्ता तामिव पश्यतीति चेन्न कर्मण्यग्बाधात् अपेक्षितार्थानुपस्थितेश्च । अत्र भाष्ये स इव भवति तादृश इति कर्मकर्त्तरि व्युत्पत्तिः प्रदर्शिता । बाहुलकात्कर्मण्यपीति तु बहवः ॥

(किमिदमः कीश्) कीदृशः । कीदृक्षः । कीदृक् ॥ ईदृशः । ईदृक्षः । ईदृक् ॥ भवादृशः । भवादृक्षः । भवादृक् ॥ यादृक् ॥ **अदसोऽमूः ॥** अदसोऽमूः स्या दृग्दृशदृक्षेषु ॥ अमूदृशः । अमूदृक्षः । अमूदृक् ॥ मादृशः । मादृक्षः । मादृक् ॥ त्वादृशः । त्वादृक्षः । त्वादृक् ॥ युष्मादृशः । युष्मादृक्षः । युष्मादृक् ॥ अस्मादृशः । अस्मादृक्षः । अस्मादृक् ॥ समानस्य सः । सदृशः । सदृक्ष । सदृक् ॥

(सुबोधिनी)–**किमिदमः कीश् ॥** किम्शब्दस्य इदम्शब्दस्य च की ईश आदेशौ स्तः । कमिव पश्यतीति कीदृशः । ङीपि कीदृशी । कीदृक्षः । कीदृक् ॥ इदमिव पश्यतीति ईदृशः । ङीपि ईदृशी । ईदृक्षः । ईदृक् ॥ भवन्तमिव पश्यतीति भवादृशः । ङीपि भवादृशी । भवादृक्षः । भवादृक् ॥ यमिव पश्यतीति यादृशः । ङीपि यादृशी । यादृक्षः । यादृक् ॥ अमुमिव पश्यतीति अदसष्टेरात्वे कृते दस्य म इति मः । मादू इत्यूत्वम् अमूदृशः । ङीपि अमूदृशी । अमूदृक्षः । अमूदृक् ॥ मामिव त्वामिव च पश्यतीति त्वन्मदेकत्वे इति त्वन्मदादेशे टेरात्वे च मादृशः । ङीपि मादृशी । मादृक्षः । मादृक् ॥ त्वादृशः । ङीपि त्वादृशी । त्वादृक्षः । त्वादृक् ॥ अस्मानिव युष्मानिव च पश्यतीति अस्मादृशः । ङीपि अस्मादृशी । अस्मादृक्षः । अस्मादृक् ॥ युष्मादृशः । ङीपि युष्मादृशी । युष्मादृक्षः । युष्मादृक् ॥

णिनिरतीते ॥ धातोरतीते काले शीले च णिनिः ॥ अग्निष्टोमेनायाक्षीत् यजनशीलो वा अग्निष्टोमयाजी । पितृव्यघाती । उष्णभोजी ॥

(सुबोधिनी)–**णिनिरतीते ॥** नाम्न्युपसर्गे चोपपदे धातोरतीते काले ताच्छील्ये णिनिः स्यात्कर्त्तरि ॥ णिनिप्रत्ययमाह–णित्त्वाद्वृद्धिः । इकार उच्चारणार्थः । यज देवपूजादौ । अग्निष्टोमेनेष्टवान् इति । इनामिति दीर्घः । अग्निष्टोमयाजी । स्तोत्रेण समाप्यमानो यो यागः सोऽग्निष्टोमः । पितृव्यं हतवानिति हनो घत् पितृव्यघाती । शीले तु उष्णं भोक्तुं शीलमस्येति उष्णभोजी ॥ शीले किम् । उष्णं भुंक्ते कदाचित् ॥

(तत्त्वदी०)–**णिनिरतीते ॥** शीले तृन्नित्यतः शील इत्यनुवर्तते । **अग्निष्टोमेनायाक्षीदिति ॥** नन्वग्निष्टोमस्य कर्मनामधेयत्वेनाभिदत्वात्कथं करणत्वमस्येति चेन्मन्यन्ते । अन्यायेनोऽपि फलोत्पादनायां करणं न भवतीत्याक्षेपे सत्याहित्याद्वाग्निष्टोमः फलभावनाया करणं भवत्येव ॥ **उष्णभोजीति ॥** उष्णं भोक्तुं शीलमस्येति विग्रहः ॥

(आशासः क्वावुपधाया इत्वम्) आशीः । गीः । पूः ॥

(सुबोधिनी)–आशासः क्वावुपधाया इत्वम्॥ आङः शासु इच्छायामित्यात्मनेपदी। शासेरिरिति सूत्रेणेत्वे सिद्धे आशास उपधाया इत्वं क्वावेव नान्यत्रेति नियमार्थमिदं सूत्रम् । तेनाशास्ते इत्यत्रेत्वं न भवति। आशास्से इति आशीः॥गॄ निगरणे । गिरतीति ऋत इरितीर्।य्वो विं हसे इति दीर्घः।गीः॥पॄ पालनादौ। पिपर्तीति पोरुरित्युर् । य्वो विंहसे इति दीर्घः पूः ॥

(इस्मन्त्रक्विपु च्छादेर्ह्रस्वः) छद अपवारणे चुरादिः । तनुं छादयतीति तनुच्छत् ॥ अक्षद्यूः । रेफाच्छ्वोर्लोपः क्वौ झसादौ हे च प्रत्यये । मूः, मुरौ । धूः, धूरौ ॥

(सुबोधिनी)–इस्मन्त्रक्विपु च्छादेर्ह्रस्वः ॥ छद अपवारणे ण्यन्तस्यास्य ह्रस्वः स्यादेषु परेषु ॥ इसि प्रत्यये छदिः । मन् प्रत्यये छद्म । त्रप्रत्यये छत्रम् । क्विपि तु तनुं छादयतीति ञेरिति ञिलोपः । तनुच्छत् । दिवु क्रीडादौ । अक्षैर्दीव्यतीति क्ङिति झसे क्वौ ञमे चेति वस्य ऊः।अक्षद्यूः॥मूर्छा मोहसमुच्छ्राययोः । मूर्छतीति । रेफाच्छ्वोरिति छलोपः । य्वो विं हसे इति दीर्घः।मूः। धुर्वी हिंसायाम् ।धुर्वतीति रेफाच्छ्वोरिति वलोपः । धूः ॥

(तत्त्वदी०)–तनुच्छादिति ॥ तनु छादयतीति विग्रहः । अक्षैर्दीव्यतीति अक्षद्यूः । मूरिति॥ मूर्छतीति विग्रहः ॥

(दुहः क्वो घोऽन्तादेशश्च) कामदुघा ॥

(सुबोधिनी)–दुहः क्वो घोऽन्तादेशश्च ॥ दुहः कप्रत्ययो हस्य घश्च स्यात् ॥ कप्रत्ययमाह–कित्त्वाद्गुणो न । कामं दोग्धीति कामदुघा धेनुः ॥

(दृशेष्टक्सकौ चोपमाने कार्ये) उपमाने कर्मण्युपपदे दृशेष्टक्सकौ चात्क्विप् ॥

(सुबोधिनी)–दृशेष्टक्सकौ चोपमाने कार्ये॥टक्सकौ प्रत्ययावाह-टित्त्वादीप् । --कित्त्वाद्गुणो न ॥

आसर्वादेः ॥ एषु परेषु सर्वादेष्टेरात्वम्॥ अन्यादृशः। अन्यादृक्षः । अन्यादृक् । तादृशः । तादृक्षः । तादृक् ॥

(सुबोधिनी)–आसर्वादेः॥ सर्वादेष्टेरात्स्याद् दृक्दृशदृक्षेषु परेषु ॥ अन्यमिव पश्यतीति अन्यादृशः । ईपि अन्यादृशी ॥ छशषेति षत्वम्।षढोरिति कत्वम्।अन्यादृक्षः । क्विपि अन्यादृक्।तमिव पश्यतीति तादृशः।ईपि तादृशी । तादृक्षः। तादृक् ॥

(तत्त्वदी०)--एषु परेष्विति॥ एवं चोपमाने कर्मोपपदनिमित्तकटक्सक्किप् एषु परेषु सर्वादेष्टेरात्वं नान्यत्र।तेन सर्वं पश्यतीति सर्वदृगित्यत्र न उपमानाभावात्॥ अन्यादृश इति ॥

अन्य इव दृश्यते इति विग्रहः । एवमन्यत्रापि । अत्राहुः कर्त्तरि कृतो विधानात्कर्मार्थताऽयुक्ता तामिव पश्यतीति चेन्न कर्मण्यग्व्याघात् अपेक्षितार्थानुपस्थितेश्च । अत्र भाष्ये स इव भवति तादृश इति कर्मकर्त्तरि व्युत्पत्तिः प्रदर्शिता । बाहुलकात्कर्मण्यपीति तु बहवः ॥

(किमिदमः कीश्) कीदृशः । कीदृक्षः । कीदृक् ॥ ईदृशः । ईदृक्षः । ईदृक् ॥ भवादृशः । भवादृक्षः । भवादृक् ॥ यादृक् ॥ **अदसोऽमूः** ॥ अदसोऽमूः स्या दृग्दृशदृक्षेषु ॥ अमूदृशः । अमूदृक्षः । अमूदृक् ॥ मादृशः । मादृक्षः । मादृक् ॥ त्वादृशः । त्वादृक्षः । त्वादृक् ॥ युष्मादृशः । युष्मादृक्षः । युष्मादृक् ॥ अस्मादृशः । अस्मादृक्षः । अस्मादृक् ॥ समानस्य सः । सदृशः । सदृक्ष । सदृक् ॥

(सुबोधिनी)–**किमिदमः कीश्** ॥ किमृशब्दस्य इदमृशब्दस्य च की ईश आदेशौ स्तः । कमिव पश्यतीति कीदृशः । ईपि कीदृशी । कीदृक्षः । कीदृक् ॥ इदमिव पश्यतीति ईदृशः । ईपि ईदृशी । ईदृक्षः । ईदृक् ॥ भवन्तमिव पश्यतीति भवादृशः । ईपि भवादृशी । भवादृक्षः । भवादृक् ॥ यमिव पश्यतीति यादृशः । ईपि यादृशी । यादृक्षः । यादृक् ॥ अमुमिव पश्यतीति अदसष्टेरात्वे कृते दस्य म इति मः । मादू इत्यूत्वम् अमूदृशः । ईपि अमूदृशी । अमूदृक्षः । अमूदृक् ॥ मामिव त्वामिव च पश्यतीति त्वन्मदेकत्वे इति त्वन्मदादेशे टेरात्वे च मादृशः । ईपि मादृशी । मादृक्षः । मादृक् ॥ त्वादृशः । ईपि त्वादृशी । त्वादृक्षः । त्वादृक् ॥ अस्मानिव युष्मानिव च पश्यतीति अस्मादृशः । ईपि अस्मादृशी । अस्मादृक्षः । अस्मादृक् ॥ युष्मादृशः । ईपि युष्मादृशी । युष्मादृक्षः । युष्मादृक् ॥

णिनिरतीते ॥ धातोरतीते काले शीले च णिनिः ॥ अग्निष्टोमेनायाक्षीत् यजनशीलो वा अग्निष्टोमयाजी । पितृव्यघाती । उष्णभोजी ॥

(सुबोधिनी)–**णिनिरतीते** ॥ नाम्न्युपसर्गे चोपपदे धातोरतीते काले ताच्छील्ये णिनिः स्यात्कर्तरि ॥ णिनिप्रत्ययमाह–णित्त्वाद्वृद्धिः । इकार उच्चारणार्थः । यज देवपूजादौ । अग्निष्टोमेनेष्टवान् इति । इनामिति दीर्घः । अग्निष्टोमयाजी । स्तोत्रेण समाप्यमानो यो यागः सोऽग्निष्टोमः । पितृव्यं हतवानिति हनो घत् पितृव्यघाती । शीले तु उष्णं भोक्तुं शीलमस्येति उष्णभोजी ॥ शीले किम् । उष्णं भुंक्ते कदाचित् ॥

(तत्त्वदी०)–**णिनिरतीते** ॥ शीले तृन्नित्यत. शीले इत्यनुवर्तते । **अग्निष्टोमेनायाक्षीदिति** ॥ नन्वग्निष्टोमस्य कर्मनामधेयत्वेनामेदात्कथं करणत्वमस्येति चेत्सत्यम् । अन्यांशोऽपि फलोत्पादनायां करणं संभवतीत्यास्रे सत्तानित्यादग्निष्टोमः फलभावनाया करण मस्त्येव ॥ **उष्णभोजीति** ॥ उष्णं भोक्तुं शीलमस्येति विग्रहः ॥

मुद हर्षे । प्रामोदि इति प्रमुदितः साधुस्तेन ॥ उदुपधात् किम् । विदितम् । भावकर्मणोः किम् । रुचितं वनम् । गत्यर्थादकर्मकादिति कर्तरि क्तः । सेट् किम् । कुष्टम् । कुष निष्कर्षे । अवृविकरणात्किम् । गुध्यतेर्गुधितम् ॥

(शीङ्स्विदिमिदिक्ष्विदिधृषमृषपूङः सेटौ क्तक्तवतू कितौ न)
शयितः । प्रस्वेदितः । शयितवान् । प्रस्वेदितवान् ।क्ष्वेदितः । क्ष्वेदितवान् । धर्षितः । धर्षितवान् ॥

(सुबोधिनी)–शीङ्स्विदिमिदिक्ष्विदिधृषमृषपूङः सेटौ क्तक्तवतू कितौ न ॥ अकित्वाद्गुणः । अशयिष्टेति शयितः शयितवान् सः । कृत इतीट् । अनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थः । शेश्यितः।शेश्यितवान् । नुधातोरिति यः । किंच । स्विदादीनामादीदित इतीण्निषेधे प्राप्ते भावे कर्तरि चादित इति सेट्कत्वम् । पूङः कित इतीण्निषेधे प्राप्ते पूङो वा कित इति सेट्कत्वम् । ञिष्विदा स्नेहनमोचनयोरिति भ्वादिरत्र गृह्यते न तु 'ञिष्विदा गात्रप्रक्षरणे' दिवादिः भ्वादिसाहचर्यात् । प्रास्वेदिष्टेति प्रस्वेदितश्चैत्रः । प्रस्वेदितं तेन । प्रस्वेदितवान् । ञिधृषा प्रागल्भ्ये । प्रधर्षितः प्रधर्षितवान् । प्रधर्षितस्तेन ॥

(मृषः क्षान्तौ) मर्षितः । मर्षितवान् ॥

(सुबोधिनी)–मृषः क्षान्तौ ॥ मृषः सेटौ क्तक्तवतू कितौ न स्तः क्षमायामर्थे॥ मर्षितः । मर्षितवान् ॥ क्षमायां किम् । अपमृषितं वाक्यम् । अविस्पष्टमित्यर्थः ॥

(पूङो वा कितस्तस्येट्) पवितः-पूतः । पवितवान्-पूतवान् ॥

(सुबोधिनी)--पूङो वा कितस्तस्येट् ॥ पूङः परस्य कितस्तस्येड्वा स्यात् ॥ पूङ् पवने । पूतः ॥

कितः ॥ उवर्णान्तादृवर्णान्तात् श्विश्रिभ्यां च परस्य कितस्तस्येण्न ॥ भूतः । वृतः । श्रितः । श्वयते संप्रसारणस्य दीर्घः किति ते । शूनः । वेञो ह्रस्वः किति ते । उतम् ॥

(सुबोधिनी)–कितः ॥ वुः से इत्यतो वुरित्यनुवृत्तम् ॥ श्विश्र्यृवर्णोवर्णान्तेभ्यः परस्य कितः प्रत्ययस्येण्न ॥ अभूदिति भूतः । वृङ् संभक्तौ । वृञ् वरणे च । वृतः । श्रिञ् सेवायाम् । श्रितः । टु ओ श्वि इर् गतिवृद्ध्योः । यजामिति सम्प्रसारणम् । श्वयतेः संप्रसारणस्य दीर्घः । शूनः । वेञ् तन्तुसन्ताने । यजामिति संप्रसारणे वेञो ह्रस्वः । उतम् ॥

(तत्त्वदी०)–कित इति॥वुः सेरित्यतो वुरित्यस्यानुवृत्तेरुवर्णान्तादित्यादि। नकारान्तादित्ते नेति योगविभागात् ॥ श्विश्रिभ्यामिति च लभ्यते ॥

ादीदितः ॥ आदित ईदितश्च:क्तक्तवत्वोर्नेट् ॥

सुबोधिनी)–आदीदितः॥आच्च ईच्च आदीतौ आदीतौ इतौ यस्य स आदी-
स्मादादीदितो धातोः क्तक्तवत्वोरिण्न स्यात्॥ कृत इत्यस्यापवादः ॥

तत्त्वदी०)–आदीदित इति॥ आच्च ईच्च आदीतौ इतौ यस्य तथा तस्मात् ।कृत
तस्यापवादः ॥

ीतां तक् वर्तमानेऽपि ॥ ञीतां धातूनां मतिबुद्धिपूजार्थानां
र्तमानेऽपि तक् ॥ राज्ञां मतः । बुद्धः । इष्टः ॥

सुबोधिनी) ञीतां तक् वर्तमानेऽपि॥ञिरितेषां ते ञीतस्तेषां मतिबुद्धि-
भ्यश्च तक् स्यात् वर्तमानेऽर्थे ।मतिरिहेच्छा बुद्धेः पृथग्ग्रहणात् । राज्ञां मतः।
। तैरिष्यमाण इत्यर्थः । बुद्धः ॥ विदितः ॥ पूजितः। अर्चितः ॥

तत्त्वदी०)–ञीतामिति ॥ ञिरितेषां ते ञीतस्तेषाम् ॥

दस्तस्य नो दश्च ॥ दकारात्परस्य कितस्तस्य नत्वं दकारस्य
च ॥ भेदितम्–भिन्नम् ॥

(सुबोधिनी)–दस्तस्य नो दश्च॥दात्परस्यकितस्तस्य नत्वंचाद्स्यापि नत्वंस्यात्॥

(भावे कर्तरि चादितःक्तक्तवत्वोरिड्वा)॥मेदितः–भिन्नः।प्रस्वे-
दितः–प्रस्विन्नः। क्ष्वेदितः–क्ष्विण्णः॥

(सुबोधिनी)–भावे कर्त्तरि चादितः क्तक्तवत्वोरिड्वा ॥ आकारेतो धातो-
वकर्त्रर्थस्थितयोः क्तक्तवत्वोरिड्वा स्यात् ॥ ञिमिदा स्नेहने । भिद्यते इति भिन्नं तेन।
ञिष्विदामिदीति क्तस्याकित्त्वाद्गुणः । मेदते इति मेदितःसः ॥ञिष्विदा स्नेहन-
चिनयोः । प्रस्विद्यते इति प्रस्विन्नं तेन । प्रस्वेदते इति प्रस्वेदितःसः ॥ ञिक्ष्विदा
स्नेहनमोचनयोः । क्ष्विण्णं तेन । क्ष्वेदितः सः॥

(तत्त्वदी०)–आदित इति ॥ आत्-इद्यस्य स तथा ॥

अदो जघुः ॥ किति तकारे ॥ जग्धम् ॥

(सुबोधिनी)–अदो जघुः ॥अदो जघुरादेशःस्यात्किति तादौ प्रत्यये॥उकार
उच्चारणार्थः । तयोर्ध इति तस्य धः । झबे जबा इति घस्य गः । जग्धम् ।

रः ॥ रेफात्कितस्तस्य नत्वम् ॥ विकीर्णम् । जीर्णम् ।

(सुबोधिनी)–रः॥रात्कितस्तस्य नत्वं स्यात् ॥ कॄ विक्षेपे। जॄ वयोहानौ। ऋत
इरितीर् । र्वो र्वि दसे इति दीर्घः । विकीर्णम् । जीर्णम् ॥

(तत्त्वदी०)–रः इति ॥ [illegible]
[illegible]

[illegible]

(शीङ्स्विदिमिदिक्ष्विदिधृषः सेटौ क्तक्तवतू कितौ न) [illegible] । [illegible] । [illegible] । [illegible] । धर्षितः । धर्षितवान् ॥

(सुबोधिनी)—शीङ्स्विदिमिदिक्ष्विदिधृषः सेटौ क्तक्तवतू कितौ न ॥ [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] इति मेद्यत्वम् । [illegible] वा किन इति मेद्यत्वम् । ञिष्विदा स्नेहनमोचनयोरिति स्वादित्व गृहीत न तु 'ञिष्विदा गात्रप्रक्षरणे' दिवादेः स्वादिनाहचर्यात् । प्रस्वेदितः प्रस्वेदितवान् । प्रस्वेदितं तेन । प्रस्वेदितवान् । ञिधृषा प्रागल्भ्ये । प्रधर्षितः प्रधर्षितवान् । प्रधर्षितस्तेन ॥

(मृषः क्षान्तौ) मर्षितः । मर्षितवान ॥

(सुबोधिनी)—मृषः क्षान्तौ ॥ मृषः सेटौ क्तक्तवतू कितौ न स्तः क्षमायामर्थे ॥ मर्षितः । मर्षितवान ॥ क्षमायां किम । अपमृषितं वाक्यम् । अविस्पष्टमित्यर्थः ॥

(पूङो वा क्तिनस्तस्येट्) पवितः—पूतः । पवितवान्—पूतवान् ॥

(सुबोधिनी)—पूङो वा क्तिनस्तस्येट् ॥ पूङः परस्य क्तिनस्तस्येड्वा स्यात् ॥ पूङ् पवने । पूतः ॥

क्तिनः ॥ उवर्णान्तादिवर्णान्तात् श्विश्रिभ्यां च परस्य क्तिनस्तस्येण्न ॥ भूतः । वृतः । श्रितः । श्वयतेः संप्रसारणस्य दीर्घः क्तिति ते । शूनः । वेञो ह्रस्वः क्तिति ते । उतम् ॥

(सुबोधिनी)—क्तिनः ॥ वुः से इत्यतो वुरित्यनुवृत्तम् ॥ श्विश्रिऋवर्णोवर्णान्तेभ्यः परस्य क्तिनः प्रत्ययस्येण्न ॥ अभूदिति भूतः । वृङ् संभक्तौ । वृञ् वरणे च । वृतः । श्रिञ् सेवायाम । श्रितः । टु ओ श्वि इर् गतिवृद्ध्योः । यजामिति सम्प्रसारणम् । अयतः संप्रसारणस्य दीर्घः । शूनः । वेञ् तन्तुसन्ताने । यजामिति संप्रसारणे वेञो ह्रस्वः । उतम ॥

(तत्त्वदी०)—क्तिन इति॥वुः सेरित्यतो वुरित्यस्यानुवृत्तेरुवर्णान्तादित्यादि। नैकस्वरादित्यतो नेति योगविभागात् ॥ श्विश्रिभ्यामिति च लभ्यते ॥

(तत्त्वदी०)-अन्यत्रेति॥ अविनयादन्यत्रेत्यर्थः। वृषेरादित्त्व चिन्त्यमिति कश्चित्। अन्यस्तु अविनयादन्यत्र भावकर्मणोर्धृष्ट धर्षितमित्यादौ विकल्पेट्कत्वार्थमाह ॥

(दृढः स्थूलबलयोः) दृहितो दृंहितोऽन्यः । दृह दृहि वृद्धौ ॥

(सुबोधिनी)-दृढः स्थूलबलयोः । स्थूलो मांसलस्तस्मिन्नर्थे। बलमस्यास्तीति बलः अइकौ चेत्यः । तस्मिन् बलवत्यर्थे च दृह दृहि आभ्यां परस्य क्तप्रत्ययस्य ढत्वं धातोरिडभावहलोपौ च इदितो नलोपश्च निपात्यते । दृढः ॥ ननु हो ढ इति ढत्वं तथोर्ध इति धत्वे ष्टुत्वे च ढि ढ इति ढलोपे कृते दृढेति रूपासिद्धौ सत्यां किमर्थं ढत्वह-लोपयोर्निपातनम् । उच्यते। तथा हि सति ढलोपस्यासिद्धत्वेनालघुत्वात् द्रढिमेत्यत्र ऋ-र इमनीति रभावो न स्यात् ॥ परिद्रढय्य गत इत्यत्र परिद्रढीत्यस्मान्नामधातोः क्त्वा-प्रत्यये क्यापि लघुपूर्वात्परस्य ञेरिति ञेरयादेशो न स्याच्च । अतोऽसिद्धत्वनिवृत्तये निपातनम् ॥

(तत्त्वदी०)--स्थूलबलयोरिति॥ बलमस्यास्तीति बलः। अइकावित्यः। मांसलो निश्चलो दृढः॥

(प्रभौ परिवृढः) परिवृहितः परिवृंहितोऽन्यः ॥

(सुबोधिनी)-प्रभौ परिवृढः ॥ प्रभौ वाच्ये वृह वृहि वृद्धौ आभ्यां परस्य क्तस्य ढत्वं धातोरिडभावहलोपौ च इदितो नलोपश्च निपात्यते । 'प्रभुः परिवृढोऽ-धिपः' इत्यमरः ॥ अत्रापि ढत्वहलोपयोर्निपातनम् । व्रढिमा परिव्रढय्येत्यादिसिद्ध्यर्थं प्राग्वदेव ॥

(कृच्छ्रगहनयोः कपः) कष्टम् । कष्टो मोहः । कष्टं शास्त्रम् । कषितमन्यत् ॥

(सुबोधिनी)-कृच्छ्रगहनयोः कषः ॥ एतयोरर्थयोः कषः परस्य क्तस्येण्न स्यात् ॥ 'स्यात्कष्टं कृच्छ्रमाभीलम्' इत्यमरः ॥ अत्र कष्टशब्देन दुःखं तत्कारणं च गृह्यते । कष हिंसायाम् । कष्टो मोहः । दुःखहेतुरित्यर्थः । कष्टं शास्त्रम् दुरवगाह-मित्यर्थः ॥

(घुष्टोऽविशब्दने) घुष्टा रज्जुः। अविशब्दने किम्। घुषितं वाक्यम् ॥

(सुबोधिनी)-घुष्टोऽविशब्दने । विशब्दनं प्रतिज्ञानं न विशब्दनमविशब्दनं तस्मिन्नर्थे घुषेः परस्य क्तस्येण्न स्यात् ॥ घुषिर शब्दार्थे भ्वादिः । घुषिर अवि-शब्दने चुरादिः । द्वयोरप्यत्र ग्रहणम् । ननु विशब्दनेऽर्थे इण्निषेधाभावात् ञिप्रत्यये उपधागुणे कृते सेटो क्तक्तवत्वोरिति ञिलोपे च घोषितमित्यपि स्यात् । अत्राहः । विशब्दनेऽर्थे चुरादेर्ञिरेवानित्य इति ॥

(तत्त्वदी०)--घुषितमिति ॥ शब्देन प्रकटीकृतमभिप्रायमित्यर्थः ॥

(सुबोधिनी)—ऋणमाधमर्ण्ये ॥ऋ गतौ अस्मात् तस्य नत्वं निपात्यते॥ अधमं दुःखमदमृणमस्य सोऽधमर्णस्तस्य भाव आधमर्ण्यं तस्मिन्नाधमर्ण्येऽर्थे। 'अधमर्णस्तु ग्राहकः' इत्यमरः ॥

(तत्त्वदी०)—ऋणमाधमर्ण्ये इति॥ आधमर्ण्ये इति ॥अधमे ऋणे अधममृणं यस्येति वाऽधमर्णस्तस्य भावस्तस्मिन्। तेन चाधमर्ण्यव्यवहारो लक्ष्यते। तथा चोत्तमर्णेऽपि प्रयोगः सिध्यति ॥

(क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टवाढानिमन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु) क्षुब्धो मन्थः। स्वन शब्दे। स्वान्तं मनः। ध्वान्तं तमः। लगे संगे। लग्नं सक्तम्। म्लिष्टमविस्पष्टम्। रेभृ शब्दे। विरिब्धः स्वरः। फाण्टमनायाससाध्यः कषायविशेषः। वाहृ प्रयत्ने। वाढं भृशम्। अन्यत्र तु क्षुभितम्। स्वनितम्। ध्वनितम्। लगितम्। म्लेच्छितम्। विरेभितम्। फाणितम्। वाहितम्॥

(सुबोधिनी)—क्षुब्ध १ स्वान्त २ ध्वान्त ३ लग्न ४ म्लिष्ट५ विरिब्ध६ फाण्ट ७ वाढानि ८ मन्थ १ मन २ स्तमः ३ सक्ता ४ विस्पष्ट५स्वरा ६ नायास७भृशेषु ८॥ क्षुब्धादीन्यष्टावनिट्कानि निपात्यन्ते मन्थादिष्वर्थेषु ॥ क्षुभ संचलने। तथोर्ध इति तस्य धः। झषे जवा इति भस्य बः। क्षुब्धः ॥ स्वन ध्वन शब्दे। अमान्तस्येति दीर्घः। स्वान्तम्। ध्वान्तम् ॥ लगे नत्वमपि निपात्यते।लग्नम्॥म्लेच्छ अव्यक्ते शब्दे रेभृ शब्दे। अनयोरुपधाया इत्वमपि निपात्यते। छशषेति षत्वं ष्टुत्वम्। म्लिष्टम्। तथोर्ध इति धः। झषे इति भस्य बः। विरिब्धः ॥ फण गतौ। अमान्तस्येति दीर्घः ष्टुत्वम्। णस्यानुस्वारो निपात्यते। फाण्टम् ॥ वाहृ प्रयत्ने। हो ढ इति ढः। तथोर्ध इति तस्य धः। ष्टुत्वम्। ढि ढ इति ढलोपे वाढम्। कथं तर्हि क्षुब्धो राजेति। आगमजमनित्यमित्यागमजस्यानित्यत्वादिड्भावः ॥

(तत्त्वदी०)—क्षुब्धमित्यादि॥ क्षुब्धमित्यादीन्यष्टौ निपात्यन्ते मन्थादिष्वर्थविशेषेषु वाच्येष्वित्यर्थः ॥ मन्थ इति ॥ द्रवद्रव्यसंपृक्ताः सक्तवो मन्थः मन्थनदण्डश्च ॥

(धृष्टविशस्तावविनये) धृष्टः विशस्तः। अन्यत्र धर्षितः। विशसितः ॥

(सुबोधिनी)—धृष्टविशस्तावविनये॥ अविनयेऽर्थे एतावनिटौ स्तः। ञिधृषा प्रागल्भ्ये। अस्य आदीदित इतीण्णिषेधे सिद्धे शसु हिंसायामस्य उदितःक्त्वो वेडिति क्त्वायां वेट्कत्वात्क्वचिद्विट इतीण्णिषेधे सिद्धे अनयोरविनये एवानिट्त्वं नान्यत्रेति नियमार्थं सूत्रम्। विनये तु धर्षितः। शीङ्स्विदिमिदीति क्तस्याकित्त्वाद्गुणः ॥

(तत्त्वदी०)-अन्यत्रेति ॥ अविनयादन्यत्रेत्यर्थः। धृषेरादित्त्वं चिन्त्यमिति कश्चित्। अन्यस्तु अविनयादन्यत्र भावकर्मणोर्धृष्ट धर्षितमित्यादौ विकल्पेट्कत्वार्थमाह ॥

(दृढः स्थूलबलयोः) दृहितो दृंहितोऽन्यः । बृह बृहि वृद्धौ ॥

(सुबोधिनी)-दृढः स्थूलबलयोः । स्थूलो मांसलस्तस्मिन्नर्थे। बलमस्यास्तीति बलः अर्शआद्यच् चेत्यः । तस्मिन् बलवदर्थे च दृह दृहि आभ्यां परस्य क्तप्रत्ययस्य ढत्वं धातोरिडभावहलोपौ च इदितो नलोपश्च निपात्यते । दृढः ॥ ननु हो ढ इति ढत्वं तथोर्धः इति धत्वे ष्टुत्वे च । ढि ढ इति ढलोपे कृते दृढेति रूपासिद्धौ सत्यां किमर्थं ढत्वहलोपयोर्निपातनम् । उच्यते। तथा हि सति ढलोपस्यासिद्धत्वेनालघुत्वात् द्रढिमेत्यत्र ऋतो र इमनीति रभावो न स्यात् ॥ परिद्रढय्य गत इत्यत्र परिदृढेत्यस्मान्नामधातोः क्त्वाप्रत्यये क्यपि लघुपूर्वात्परस्य णेरिति णेरयादेशो न स्याच्च । अतोऽसिद्धत्वनिवृत्तये निपातनम् ॥

(तत्त्वदी०)--स्थूलबलयोरिति॥बलमस्यास्तीति बलः। अर्शआदित्वात्। मांसलो निर्बलो दृढः॥

(प्रभौ परिवृढः) परिवृहितः परिवृंहितोऽन्यः ॥

(सुबोधिनी)-प्रभौ परिवृढः ॥ प्रभौ वाच्ये बृह बृहि वृद्धौ आभ्यां परस्य क्तस्य ढत्वं धातोरिडभावहलोपौ च इदितो नलोपश्च निपात्यते । 'प्रभुः परिवृढोऽधिपः' इत्यमरः ॥ अत्रापि ढत्वहलोपयोर्निपातनम् । व्रढिमा परिव्रढय्येत्यादिसिद्ध्यर्थं प्राग्वदेव ॥

(कृच्छ्रगहनयोः कषः) कष्टम् । कष्टो मोहः । कष्टं शास्त्रम् ।

कषितमन्यत् ॥

(सुबोधिनी)-कृच्छ्रगहनयोः कषः ॥ एतयोरर्थयोः कषः परस्य क्तस्येण्न स्यात् ॥ 'स्यात्कष्टं कृच्छ्रमाभीलम्' इत्यमरः ॥ अत्र कष्टशब्देन दुःखं तत्कारणं च गृह्यते । कष हिंसायाम् । कष्टो मोहः । दुःखहेतुरित्यर्थः । कष्टं शास्त्रम् दुरवगाहमित्यर्थः ॥

(घुषेरविशब्दने) घुष्टा रज्जुः। अविशब्दने किम्। घुषितं वाक्यम् ॥

(सुबोधिनी)-घुषेरविशब्दने । विशब्दनं प्रतिज्ञानं न विशब्दनमविशब्दनं तस्मिन्नर्थे घुषेः परस्य क्तस्येण्न स्यात् ॥ घुषिर शब्दार्थे भ्वादिः । घुषिर अविशब्दने चुरादिः । द्वयोरप्यत्र ग्रहणम् । ननु विशब्दनेऽर्थे इण्निषेधाभावात् णिप्रत्यये उपधागुणे कृते सेटोः क्तक्तवत्वोरिति णिलोपे च घोषितमित्यपि स्यात् । अत्राहुः । विशब्दनेऽर्थे चुरादेर्णिरेवानित्य इति ॥

(तत्त्वदी०)--घुषितमिति ॥ शब्देन प्रकटीकृतनाभिप्रायमित्यर्थः ॥

(सुबोधिनी)-ऋणमाधमर्ण्ये ॥ऋ गतौ अस्मात् तस्य नत्वं निपात्यते॥ अधमं दुःखमदमृणमस्य सोऽधमर्णस्तस्य भाव आधमर्ण्यं तस्मिन्नाधमर्ण्येऽर्थे। 'अधमर्णस्तु ग्राहकः' इत्यमरः ॥

(तत्त्वदी०)-ऋणमाधमर्ण्ये इति॥ आधमर्ण्ये इति ॥अधमे ऋणे अधममृणं यस्येति वाऽधमर्णस्तस्य भावस्तस्मिन् । तेन चाधमर्ण्यव्यवहारो लक्ष्यते । तथा चोत्तमर्णेऽपि प्रयोगः सिध्यति ॥

(क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानिमन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु) क्षुब्धो मन्थः । स्वन शब्दे । स्वान्तं मनः । ध्वान्तं तमः । लगे संगे । लग्नं सक्तम् । म्लिष्टमविस्पष्टम् । रेभृ शब्दे । विरिब्धः स्वरः । फाण्टमनायाससाध्यः कषायविशेषः । बाहृ प्रयत्ने । बाढं भृशम् । अन्यत्र तु क्षुभितम् । स्वनितम् । ध्वनितम् । लगितम् । म्लेच्छितम् । विरेभितम्। फाणितम् । बाहितम् ॥

(सुबोधिनी)-क्षुब्ध १ स्वान्त २ ध्वान्त ३ लग्न ४ म्लिष्ट५ विरिब्ध६ फाण्ट ७ बाढानि ८ मन्थ १ मन २ स्तमः ३ सक्ता ४ विस्पष्ट५स्वरा ६ नायास७भृशेषु ८॥ क्षुब्धादीन्यष्टावनिट्कानि निपात्यन्ते मन्थादिष्वर्थेषु ॥ क्षुभ संचलने । तथोर्ध इति तस्य धः । झषे जबा इति भस्य बः । क्षुब्धः ॥ स्वन ध्वन शब्दे । अमान्तस्येति दीर्घः । स्वान्तम् । ध्वान्तम् ॥ लगे नत्वमपि निपात्यते।लग्नम्॥म्लेच्छ अव्यक्ते शब्दे रेभृ शब्दे । अनयोरुपधाया इत्वमपि निपात्यते । छशषेति षत्वं ष्टुत्वम् । म्लिष्टम् । तथोर्ध इति धः । झषे इति भस्य बः। विरिब्धः ॥ फण गतौ । अमान्तस्येति दीर्घः ष्टुत्वम् । णस्यानुस्वारो निपात्यते । फाण्टम् ॥ बाहृ प्रयत्ने । हो ढ इति ढः । तथोर्ध इति तस्य धः । ष्टुत्वम् । ढि ढ इति ढलोपे बाढम्। कथं तर्हि क्षुब्धो राजेति । आगमजमनित्यमित्यागमजस्यानित्यत्वादिड्भावः ॥

(तत्त्वदी०)-क्षुब्धमित्यादि॥ क्षुब्धमित्यादीन्यष्टौ निपात्यन्ते मन्थादिष्वर्थविशेषेषु वाच्येष्वित्यर्थः ॥ मन्थ इति ॥ द्रवद्रव्यसपृक्ताः सक्तवो मन्थः मन्थनदण्डश्च ॥

(धृष्टविशस्तावविनये) धृष्टः विशस्तः । अन्यत्र धर्षितः। विशसितः ॥

(सुबोधिनी)-धृष्टविशस्तावविनये॥ अविनयेऽर्थे एतावनिटौ स्तः ।ञिधृषा प्रागल्भ्ये । अस्य आदीदित इतीण्निषेधे सिद्धे शसु हिंसायामस्य उदितःक्त्वो वेडिति क्त्वायां वेट्कत्वात्कचिद्वेट इतीण्निषेधे सिद्धे अनयोरविनय एवानिट्त्वं नान्यत्रेति नियमार्थं सूत्रम् । विनये तु धर्षितः । शीङ्स्विदिमिदीति क्तस्याकित्त्वाद्गुणः ॥

(गमहनविदविशदृशां वा) बभूवान् । भुवो वुक् । बभूवुषः । बभूवुषा । अद् भक्षणे । आदिवान् । ऋ गतौ । आरिवान् । डुदाञ् दाने । ददिवान् । ददरिद्रिवान् । वस्योत्वे इडभावः आदुषः । जक्षिवान् । जक्षिवान् । जग्मिवान्–जगन्वान् । जग्मुषः । जघ्निवान्–जघन्वान् ॥ जघ्नुषा । विविदिवान्–विविद्वान् । विविदुषः । विविशिवान्–विविश्वान् । ददृशिवान्–ददृश्वान् । ईयिवान् । सेदिवान् । ऊषिवान् । शुश्रुवान् । शुश्रुवुषः ॥

(सुबोधिनी)–गमहनविदविशदृशां वा ॥ एभ्यः परस्य क्वसुप्रत्ययस्येड्वा स्यात् ॥ विशिना साहचर्यात् विद्लृ लाभे इत्यस्य ग्रहणम् । भू सत्तायाम् । बभूवान्, बभूवांसौ । शसादौ तु वसोर्व उरित्युत्वे कृते भुवो वुगिति वुक् । बभूवुषः । बभूवुषा । बभूवद्भ्यामित्यादि । बभूवुषी स्त्री ॥ अद भक्षणे । द्वित्वहलादिशेषपूर्वदीर्घसवर्णदीर्घेषु कृतेषु कृते द्वित्वेऽप्ययमेकस्वर एवेति इड् भवति । आदिवान् । वस्योत्वे कृते इडभावो भवति निमित्ताभावे नैमित्तिकस्याप्यभाव इत्युक्तत्वात् । आदुषो स्त्री ॥ ऋ गतौ । गुणोऽर्तीति गुणे कृते द्वित्वादिषु कृतेष्वप्येकस्वर एवेति, इड् भवति । आरिवान् । आरुषी स्त्री ॥ डुदाञ् दाने । कृते द्वित्वे नायमेकस्वरः । अनेकस्वरत्वादिण्निषेधे प्राप्ते सूत्रे आदन्तग्रहणादिड्भवति । आतोऽनपीत्यालोपः । ददिवान् । ददुषी स्त्री ॥ दरिद्रा दुर्गतौ । आदन्तग्रहणादिट् । आतोऽनपीत्यालोपः । ददरिद्रिवान् । ददरिद्रुषी स्त्री । अद भक्षणे । सिसयोरदेर्घस्लृ इति लिटि वा घस्लृ आदेशः । द्वित्वे कृते नायमेकस्वरः । सूत्रे घसेर्ग्रहणादिट् । उपधालोपात्प्रागेव द्वित्वम् । पश्चाद्गमां स्वरे इत्युपधालोपः । घसादेः ष इति षत्वम् । खसे चपा इति घस्य कः । जक्षिवान् । जक्षुषी स्त्री ॥ गम्लृ गतौ । गमादीनां चतुर्णामिड्वा । द्वित्वादि । गमामित्युपधालोपः । जगामेति जग्मिवान् । इडभावे मो नो धातोरिति मस्य नः । जगन्वान् । जग्मुषी स्त्री । 'श्रेयांसि सर्वाण्यधिजग्मुषस्ते' इति रघुवंशे ॥ हन हिंसागत्योः । द्वित्वादि गमामित्युपधालोपः । हनो घ्न इति हस्य घः । जघ्निवान् इडभावे पूर्वाद्धन्तेरिति परस्य हस्य घ जघन्वान् । जघ्नुषी स्त्री ॥ विद्लृ लाभे । विविदिवान् । इडभावे । विविद्वान् । विविदुषी स्त्री ॥ विश प्रवेशने । विविशिवान्–विविश्वान् । विविशुषी स्त्री ॥ इण् गतौ । द्वित्वम् । इणःपरस्य वसोरिट् निपात्यते । द्वित्वे सत्येकस्वराभावाद्विधिरयम् । इणः क्ङिति णादाविति पूर्वदीर्घः । नवर्णे दीर्घ इति सूत्रं बाधित्वा नित्यत्वादिणः क्ङिति स्वरे इति यः वसोरिडागमस्य क्तिस्वरस्य परत्र सत्त्वात् । ईयिवान् । ईयुषी स्त्री ॥ षद्लृ विशरणादौ । द्वित्वादि । लोपः पचामित्येत्वपूर्वलोपौ । इट् । सेदिवान् । सेदुषी स्त्री । 'निषेदुषीमासनबन्धधीरः' इति रघुवंशे ॥ वस निवासे । द्वित्वादि । णवादौ पूर्वस्येति पूर्वस्य संप्रसारणम् । यजामिति परस्य संप्रसारणम् । सवर्णे

आसितं तेन । गत्यर्थेभ्यः कर्त्तरि कर्मणि च क्तः । ग्रामं यातः सः । ग्रामो यातस्तेन । भुजेः कर्मणि क्तः । तेन भुक्तमन्नम् । कथं तर्हि "भुक्ता ब्राह्मणाः पीता गावः" इति । उच्यते । भुक्तमस्त्येषामिति अस्त्यर्थे अः ॥

- (तत्त्वदी०)-मुकुन्दस्येत्यादि ॥ आस्यतेऽस्मिन्नित्यासितमासनमित्यर्थः यायतेऽस्मिन्निति यातम् ॥ भुज्यतेऽस्मिन्निति भुक्तम् । भाजनमित्यर्थः ॥ त्रिष्वपि वर्तमानार्थाधारार्थक्तस्येति कर्तरि षष्ठी ॥

- **(जीर्यतेरतृ) जरन्, जरन्तौ ॥**

(सुबोधिनी)-जीर्यतेरतृ ॥ जॄष् वयोहानौ अस्माद्भूतेऽर्थे अतृ प्रत्ययः स्यात् ॥ अतृप्रत्ययमाह-ऋदित्वाद् वितो नुमिति नुम् । ऋतो गुणे कृते नामत्वात्स्यादौ संयोगान्तस्येति तलोपः । तलोपस्यासिद्धत्वान्नोपधाया इति दीर्घो न भवति । ना जरन् । स्त्री जरती । क्तक्तवत्वोः । जीर्णः । जीर्णवान् ॥

क्वसुकानौ णबेवत् ॥ धातोरतीते काले एतौ भवतस्तौ च यथाक्रमं णबेवत् ॥ द्वित्वम् । संयोगान्तस्य लोपः ॥ चकृवान् । वसोर्व उः । चक्रुषः । चक्रुषा । वसां रसे । चकृवद्भ्याम् । चक्राणः । भेजिवान् । जजागृवान् । द्वित्वे सत्येकस्वरादादन्ताद्घसेश्च वसोरिट् नान्यस्मात् ॥

(सुबोधिनी)-क्वसुकानौ णबेवत् ॥ भूतसामान्ये क्वसुकानौ प्रत्ययावाह-क्वसोः ककारो गुणनिषेधार्थः । उकारस्तु पुंसि वितो नुमिति नुमर्थः स्त्रियां तु ऋन्नित इतीबर्थः । कानप्रत्ययस्य कित्करणं तिस्तिराण इत्यत्र ऋसंयोगादित्यकित्वाद् गुणस्य निषेधार्थम् । णबादिपरे यत्कार्यं द्वित्वादि तत्सर्वमनयोः परयोरपि स्यात् । डुकृञ् करणे । द्वित्वादिना चकृवसिति जाते नामसंज्ञायां स्यादिः । सन्महत इति पुंसि पञ्चसु दीर्घः । क्लीबे तु शौ दीर्घः । संयोगान्तस्येति सलोपः । चकृवान्, चकृवांसौ, चकृवांसः । चकृवांसम्, चकृवांसौ, शसादौ तु वसोर्व उरित्युत्वे ऋ रमिति रः । चक्रुषः । चक्रुषा, वसां रसे इति सस्य दत्वम् । चकृवद्भ्याम्, चकृवद्भिरित्यादि । स्त्रियां तु ऋन्नित इतीप् । वसोर्व उरित्युत्वे षत्वे च चक्रुषी । क्लीबे तु चकृवत्, चक्रुषी, चकृवांसि ॥ भज सेवायाम् । भेजिवान् । भेजुषी स्त्री ॥ जागृ निद्राक्षये । जजागृवान् । जजागुषी स्त्री । द्वित्वे सत्येकस्वरादादन्ताद् घसेश्च वसोरिट् नान्यस्मात् । द्वित्वे कृते सत्येकस्वराद्धातोरादन्ताद्घसेर्घसेश्च परस्य वसोरिट् स्यात् नान्येभ्यः परस्य वसोः । कृतेऽपि द्वित्वे एकस्वरा ये धातवोऽवशिष्यन्ते तेभ्य इत्यर्थः । हवक्तयोरिति निषेधं बाधित्वा क्रादेरिति नियमात्सर्वत्र प्राप्तस्येटो नियमः ॥

(तत्त्वदी०)-णबेवादिति ॥ यथा परस्मैपदिभ्यो णप् तथा क्वसुः । यथात्मनेपदिभ्य ए तथा कानः । **द्वित्वे सतीति** ॥ द्वित्वे कृते सति एकस्वरो यस्तस्मादित्यर्थः ॥

(सुबोधिनी)-भविष्यति स्यप शतृशानचः ॥ भविष्यत्स्यबन्ताद्धातोः परयोरात्पयोः स्थाने शतृशानौ वा स्तः ॥ करिष्यतीति करिष्यन् । सिमतेतीट् । करिष्यते इति करिष्यमाणः ॥

(ताच्छील्यवयोवचनशक्तिष्वानश्) भोगं भुञ्जानः । कवचं बिभ्राणः । शत्रुं निघ्नानः ॥

(सुबोधिनी)-ताच्छील्यवयोवचनशक्तिष्वानश् ॥ ताच्छील्यं तत्स्वभावता । वयो यौवनादिः । शक्तिः सामर्थ्यम् । एषु द्योत्येषु धातोः कर्तरि आनश् स्यात् ॥ आनश्प्रत्ययमाह-शित्वाच्चतुर्वत्कार्यम् । परस्मैपदिभ्योऽप्यानश् स्यादेतदर्थमिदम् । भुनक्तीति रुधादित्वान्नुम् । नमसोऽस्येत्यलोपः भुञ्जानः। बिभर्तीति बिभ्राणः। हन्तीति गमामित्युपधालोपः हनो घ्ने इति हस्य घः । निघ्नानः ॥

(तत्त्वदी०)-ताच्छील्य इति ॥ ताच्छील्य तत्स्वभावता । वयो यौवनादिः शक्तिः सामर्थ्यम् ॥ पदानियमोऽत्र ॥

(इङ्धार्योरकृच्छ्रिणि कर्तरि शतृ) इङ् अध्ययने । अधीयन् । धृञ् धारणे ण्यन्तः । धारयन् । द्विष अप्रीतौ ॥

(सुबोधिनी)-इङ्धार्योरकृच्छ्रिणि कर्तरि शतृ ॥ अकृच्छ्रः सुखसाध्यो धात्वर्थः । आभ्यां शतृप्रत्ययः स्यादकृच्छ्रिणि कर्तरि । पुनः शतृप्रत्ययमाह-इङ आत्मनेपदित्वाच्छतृप्रत्ययो न सिद्ध्यति धारयतेरपि आत्मगामिनि क्रियाफले शतृप्रत्ययो न सिध्यति तदर्थोऽयमारम्भः । इङ् अध्ययने । अधीते इति अदादित्वादपो लुक् । नुधातोरितीय् । अधीयन् । धार्यते इति अप् । धारयन् ॥

(तत्त्वदी०)-इङ् ॥ अकृच्छ्रः सुखसाध्यो धात्वर्थः सोऽस्यास्तीत्यकृच्छ्री । ण्यन्तत्वादुभयपदित्वेनोभयप्राप्तौ शत्रेव यथा स्यादित्येतदर्थमिदम् ॥

(द्विषः शत्रौ) द्वेष्टीति द्विषन् ॥

(सुबोधिनी)-द्विषः शत्रौ ॥ द्विष अप्रीतौ । अस्माच्छत्रौ वाच्ये शतृप्रत्ययः स्यात् ॥ द्वेष्टीति द्विषन् ॥

(अर्ह पूजायाम्) अर्हन् ॥

(सुबोधिनी)-अर्ह पूजायाम् ॥ अर्ह पूजायामस्माच्छतृप्रत्ययः स्यात्पूजायामर्थे । अर्हतीति अर्हन् ॥

(तत्त्वदी०)-अर्ह इति ॥ पूजाया किम् । अर्हति चौरो वधम् ॥

शीले तृन् ॥ कटं कर्त्ता । हृञ् । हर्ता ॥

([illegible]धिनी)-शीले ॥ तृन्प्रत्ययमाह--नकारः स्वरार्थः । इतः परं वक्ष्यमाणाः [illegible]ल्यादिषु बोध्याः । करोतीत्येवं शीलः कर्ता कटस्य ॥

(इष्णुस्नुक्नु शीले) अलंकरिष्णुः। निराकरिष्णुः। जनी प्रजनिष्णुः॥

(सुबोधिनी)-इष्णुस्नुक्नु शीले॥ धातोरेते प्रत्ययाः शीलेऽर्थे॥ इष्णुस्नुक्नुप्रत्ययानाह-क्नुकककारो गुणनिषेधार्थः। अलंकरोतीत्येवंशीलोऽलंकरिष्णुः। निराकरोतीत्येवंशीलो निराकरिष्णुः। जनी प्रादुर्भावे। प्रजायते इत्येवंशीलः प्रजनिष्णुः॥

(तत्त्वदी०)-इष्णुस्नुक्नु-॥ इष्णुश्च स्नुश्च क्नुश्च एषां समाहारः। ण्यन्तभ्राजभूसहचरवृधवृतप्रजनरुच्यपत्रपालंकृञ्निराकृञुत्पचोत्पतोन्मद इष्णु।

(जिभुवोर्नैङ्गुणौ स्नौ) जि जये जिष्णुः। भूष्णुः। ग्लास्नुः। त्रसी त्रस्नुः। गृध्नुः। ञिधृषा धृष्णुः। क्षिपः क्षिप्नुः॥

(सुबोधिनी)-जिभुवोर्नैङ्गुणौ स्नौ॥ जयतीत्येवं शीलो जिष्णुः॥ भवतीत्येवंशीलो भूष्णुः॥ ग्लायतीत्येवंशीलो ग्लास्नुः॥ त्रसी उद्वेगे। क्नुः॥ हवक्तयोरितीण्न। त्रस्नुः॥ गृधु अभिकाङ्क्षायाम्। गृध्नुः॥ ञिधृषा प्रागल्भ्ये। धृष्णुः॥ क्षिप प्रेरणे क्षिप्नुः॥

पाकोकणः॥ शीलार्थे षाक उ उकण् प्रत्यया भवन्ति॥ जल्पाकः। भिक्ष याच्ञायाम् भिक्षाकः। कुट्ट च्छेदने कुट्टाकः दुष्टः। लुण्ठ चौर्ये लुण्ठाकः। वृङ् संभक्तौ वराकः॥ भिक्षुः। आङः शासि इच्छायाम्। इदितो नुम्। आशंसुः। चिकीर्षुः॥ लष कान्तौ लाषुकः। पत्लृ पतने पातुकः। आतो युक् स्थायुकः। भावुकः। वृषु सेचने वर्षुकः। घातुकः। कामुकः॥

(सुबोधिनी)-षाकोकणः॥ षाक उ उकण्-प्रत्ययानाह-षाकस्य षः ङीबर्थ इतीबर्थः। उकणो णो वृद्ध्यर्थः। जल्पतीत्येवंशीलः। जल्प व्यक्तायां वाचि। जल्पाकः॥ भिक्ष भिक्षायाम्। भिक्षाकः॥ कुट्ट छेदने। लुण्ठ स्तेये। चौरादिकाविमौ। कुट्टाकः। लुण्ठाक॥ वृञ् वरणे। वृङ् संभक्तौ। वराकः॥ सान्ताशंसभिक्षिभ्य उः। नः प्रत्ययस्तदन्तो धातुः सान्त उच्यते। आङः शासि इच्छायामयमेव गृह्यते न तु शंसु स्तुतौ आङा सह निर्देशात्॥ भिक्ष भिक्षायाम्। भिक्षुः। आशंसुः। कर्तुमिच्छति चिकीर्षतीति सप्रत्यये द्वित्वादयः से इतीत्वम्। से दीर्घ इति दीर्घः। ऋत इरितीर्। रषो विं हसे इति दीर्घः। षत्वम्। चिकीर्षति जातम्। उप्रत्यये यत इत्यल्लोपः। चिकीर्षुः॥ लष कान्तौ। उकण्। लाषुकः॥ पत्लृ पतने। पातुकः॥ पद गतौ। पादुकः॥ ष्ठा गतिनिवृत्तौ। आतो युगिति युक्। स्थायुकः॥ भू सत्तायाम्। भावुकः। वृषु सेचने। उपधाया लघोरिति गुणः। वर्षुकः॥ हन हिंसागत्योः हनो घादिति घत्। घातुकः॥ कमु कान्तौ। कामुकः॥ गम्लृ गतौ। गामुकः॥ दॄ हिंसायाम् दारुकः॥

(सुबोधिनी)–भविष्यति स्यप् शतृशानपरः ॥ भविष्यत्यर्थवन्ताद्धातोः परयोरात्ययोः स्थाने शतृशानौ वा स्तः ॥ करिष्यतीति करिष्यन् । सिसतेतीट् । करिष्यते इति करिष्यमाणः ॥

(ताच्छील्यवयोवचनशक्तिष्वानश्) भोगं भुञ्जानः । कवचं बिभ्राणः । शत्रुं निघ्नानः ॥

(सुबोधिनी)–ताच्छील्यवयोवचनशक्तिष्वानश् ॥ ताच्छील्यं तत्स्वभावता । वयो यौवनादिः । शक्तिः सामर्थ्यम् । एषु द्योत्येषु धातोः कर्तरि आनश् स्यात् ॥ आनश्प्रत्ययमाह–शित्वाच्चतुर्वत्कार्यम् । परस्मैपदिभ्योऽप्यानश् स्यादेतदर्थमिदम् । भुनक्तीति रुधादित्वान्नुम् । नमसोऽस्येत्यलोपः भुञ्जानः। बिभर्तीति बिभ्राणः। हन्तीति गमामित्युपधालोपः हनो घ्ने इति हस्य घः । निघ्नानः ॥

(तत्त्वदी०)–ताच्छील्य इति ॥ ताच्छील्य तत्स्वभावता । वयो यौवनादिः शक्तिः सामर्थ्यम् ॥ पदानियमोऽत्र ॥

(इङ्धार्योरकृच्छ्रिणि कर्तरि शतृ) इङ् अध्ययने । अधीयन् । धृञ् धारणे ञ्यन्तः । धारयन् । द्विष अप्रीतौ ॥

(सुबोधिनी)–इङ्धार्योरकृच्छ्रिणि कर्तरि शतृ ॥ अकृच्छ्रः सुखसाध्यो धात्वर्थः । आभ्यां शतृप्रत्ययः स्यादकृच्छ्रिणि कर्तरि । पुनः शतृप्रत्ययमाह–इङ आत्मनेपदित्वाच्छतृप्रत्ययो न सिद्ध्यति धारयतेरपि आत्मगामिनि क्रियाफले शतृप्रत्ययो न सिध्यति तदर्थोऽयमारम्भः । इङ् अध्ययने । अधीते इति अदादित्वादपो लुक् । नुधातोरितीय् । अधीयन् । धार्यते इति अप् । धारयन् ॥

(तत्त्वदी०)–इङ् ॥ अकृच्छ्रः सुखसाध्यो धात्वर्थः सोऽस्यास्तीत्यकृच्छ्री । ञ्यन्तत्वादुभयपदित्वेनोभयप्राप्तौ शत्रेव यथा स्यादित्येतदर्थमिदम् ॥

(द्विषः शत्रौ) द्वेष्टीति द्विषन् ॥

(सुबोधिनी)–द्विषः शत्रौ ॥ द्विष अप्रीतौ । अस्माच्छत्रौ वाच्ये शतृप्रत्ययः स्यात् ॥ द्वेष्टीति द्विषन् ॥

(अर्ह पूजायाम्) अर्हन् ॥

(सुबोधिनी)–अर्ह पूजायाम् ॥ अर्ह पूजायामस्माच्छतृप्रत्ययः स्यात्पूजायामर्थे । अर्हतीति अर्हन् ॥

(तत्त्वदी०)–अर्ह इति ॥ पूजायां किम् । अर्हति चौरो वधम् ॥

शीले तृन् ॥ कटं कर्त्ता । हृञ् । हर्ता ॥

([illegible])–शीले ॥ तृन्प्रत्ययमाह–नकारः स्वरार्थः । इतः परं वक्ष्यमाणाः [illegible] बोध्याः । करोतीत्येवं शीलः कर्ता कटस्य ॥

(इष्णुस्नुक्नु शीले) अलंकरिष्णुः । निराकरिष्णुः । जनी प्रजनिष्णुः ॥

(सुबोधिनी)-इष्णुस्नुक्नु शीले ॥ धातोरेते प्रत्ययाःशीलेऽर्थे ॥ इष्णुस्नुक्नुप्रत्ययानाह-क्नुककारो गुणनिषेधार्थः । अलंकरोतीत्येवंशीलोऽलंकरिष्णुः । निराकरोतीत्येवंशीलो निराकरिष्णुः । जनी प्रादुर्भावे । प्रजायते इत्येवंशीलः प्रजनिष्णुः ॥

(तत्त्वदी०)-इष्णुस्नुक्नु-॥ इष्णुश्च स्नुश्च क्नुश्च एषां समाहारः। ण्यन्तभ्राजभूसहचरवृधवृतप्रजनरुच्यत्रपालङ्कृञ्निराकृञुत्पचोत्पतोन्मद इष्णु ।

(जिभुवोर्नेङ्गुणौ स्नौ) जि जये जिष्णुः । भूष्णुः । ग्लास्नुः । त्रसी त्रस्नुः । गृध्नुः । ञिधृषा धृष्णुः । क्षिपः क्षिप्नुः ॥

(सुबोधिनी)-जिभुवोर्नेङ्गुणौ स्नौ ॥ जयतीत्येवं शीलो जिष्णुः ॥ भवतीत्येवंशीलो भूष्णुः ॥ ग्लायतीत्येवंशीलो ग्लास्नुः॥त्रसी उद्वेगे । क्नुः ॥ ध्वक्त्योरितीण्न । त्रस्नुः॥ गृधु अभिकाङ्क्षायाम् । गृध्नुः॥ञिधृषा प्रागल्भ्ये । धृष्णुः॥क्षिप प्रेरणे क्षिप्नुः ॥

पाकोकणः॥ शीलार्थे षाक उ उकण् प्रत्यया भवन्ति ॥ जल्पाकः । भिक्ष याच्ञायाम् भिक्षाकः । कुट्ट च्छेदने कुट्टाकः दुष्टः । लुण्ठ चौर्ये लुण्ठाकः । वृङ् संभक्तौ वराकः ॥ भिक्षुः । आङःशासि इच्छायाम् । इदितो नुम् । आशंसुः । चिकीर्षुः ॥ लष कान्तौ लाषुकः । पत्लृ पतने पातुकः । आतो युक् स्थायुकः । भावुकः । वृषु सेचने वर्षुकः। घातुकः । कामुकः ॥

(सुबोधिनी)-षाकोकणः ॥ षाक उ उकण्-प्रत्ययानाह-षाकस्य षः ष्वित इत्यर्थः । उकणो णो वृद्ध्यर्थः । जल्पतीत्येवशीलः । जल्प व्यक्तायां वाचि । जल्पाकः ॥ भिक्ष भिक्षायाम् । भिक्षाकः ॥ कुट्ट छेदने । लुण्ठ स्तेये । चौरादिकाविमौ । कुट्टाकः । लुण्ठाकः ॥ वृञ् वरणे । वृङ् संभक्तौ । वराकः ॥ सन्ताशंसभिक्षिभ्य उः । सः प्रत्ययस्तदन्तो धातुः सान्त उच्यते । आङः शासि इच्छायामयमेव गृह्यते न तु शंसु स्तुतौ आङा सह निर्देशात् ॥ भिक्ष भिक्षायाम् । भिक्षुःआशंसुः। कर्तुमिच्छति चिकीर्षतीति सप्रत्यये द्वित्वाद्यः से इतीत्वम् । से दीर्घ इति दीर्घः । ऋन इरिति । रवो र्वि हसे इति दीर्घः। षत्वम् । चिकीर्षति जातम् । उप्रत्यये यत इत्यल्लोपः । चिकीर्षुः ॥ लष कान्तौ । उकण् । लाषुकः ॥ पत्लृ पतने । पातुकः ॥ पद गतौ । पादुकः ॥ ष्ठा गतिनिवृत्तौ । आतो युगिति युक् । स्थायुकः ॥ भूसत्तायाम् । भावुकः । वृषु सेचने । उपधाया लघोरिति गुणः । वर्षुकः ॥ हन हिंसागत्योः हनो घादिति घत् । घातुकः ॥ कमु कान्तौ । कामुकः ॥ गम्लृ गतौ । गामुकः ॥ दॄ हिंसायाम् दारुकः ॥

स्युक्तत्वात् । अतस्तद्व्यावृत्तये तदन्तविधिःस्यादित्यदादिग्रहणम्॥**वर्तन** इति॥ वर्तते तच्छील इति विग्रहः। अनुदात्तेतःकिम् । भविता ॥ हसादेःकिम्॥एधिता ॥ अकर्मकात्किम् ॥ वसिता वस्त्रम् ॥

(ज्वादेश्च) जु गतौ वेगे च। जवनः । सरणः । गर्द्धनः। क्रोधनः। रोषणः । मण्डनः । भूषणः ॥

(सुबोधिनी)-ज्वादेश्च ॥ युः स्यात् ॥ जुगतौ वेगे च । जवनः ॥ सृ गतौ । सरणः ॥ गृधु अभिकाङ्क्षायाम् । गर्द्धनः॥ क्रुध क्रोधे । क्रोधनः॥ रुष रोषे । रोषणः॥ मडि भूषायाम् । मण्डनः ॥ भूष अलंकारे । भूषणः ॥

(ज्यादेरिनिः) जयी । प्रजवी । दरी । क्षयी ॥

(सुबोधिनी)-ज्यादेरिनिः ॥ इनिप्रत्ययः स्यात् ॥ इनिप्रत्ययमाह-इकार उच्चारणार्थः ॥ जि जये। जि अभिभवे च । इनामिति दीर्घः । जयी ॥ जु गतौ वेगे च । प्रजवी ॥ दृङ् आदरे । दरी ॥ क्षि क्षये क्षि निवासगत्योश्च । क्षयी ॥

(दादेरुः) दारुः । धारुः। सेरुः ॥

(सुबोधिनी)-दादेरुः ॥ रुप्रत्ययः स्यात् ॥ रुप्रत्ययमाह-डुदाञ् दाने । दोऽ वखण्डने । देङ् पालने । त्रयाणामेषां ग्रहणम् । दारुः । न तु दाण्दापोर्ग्रहणम् ॥ डुधाञ् धारणादौ । धारुः ॥ षिञ् बन्धने । सेरुः ॥

(सृघस्यदः क्मरः) सृमरः । घस्मरः । अद्मरः ॥

(सुबोधिनी)-सृघस्यदः क्मरः ॥ क्मरप्रत्ययः स्यात् ॥ क्मरप्रत्ययमाह-कित्त्वाद्गुणो न । सृ गतौ । सृमरः॥ घस्लृ अदने । घस्मरः ॥ अद भक्षणे । अद्मरः॥

(भञ्जभासमिदो घुरः) भङ्गुरः । भासुरः । मेदुरः ॥

(सुबोधिनी)-भञ्जभासमिदो घुरः ॥ एभ्यो घुरप्रत्ययः स्यात् ॥ घुरप्रत्ययमाह-घित्त्वात् चजोरिति गः। भञ्जो आमर्दने । भङ्गुरः ॥ भासृ दीप्तौ । भासुरः॥ ञिमिदा स्नेहने मेदुरः ॥

(तत्त्वदी०)-भञ्जभासमिद इति ॥ भञ्जेः कर्मकर्तरि । अभिधानस्वाभाव्यमत्र हेतुः॥

(विदिभिदिच्छिदेः कुरः) विदुरः । भिदुरम् । छिदुरम् ॥

(सुबोधिनी)-विदिभिदिच्छिदेः कुरः ॥ कुरप्रत्ययःस्यात् ॥ कुरप्रत्ययमाह-कित्त्वाद्गुणो न। विद ज्ञाने अस्यैव ग्रहणं न तु विद्लृ लाभे इत्यस्य संप्रदायात। विदुरः ॥ भिदिर् विदारणे । भिदुरम् ॥ छिदिर् द्वैधीकरणे । छिदुरम् ॥ कुरः कर्तरि भवति । तथा च माघः'प्रियतमाय वपुर्गुरुमत्सरच्छिदुरयाभ्दुरयाचितमङ्गना' इह अदुरिति च्छेदः ॥

(तत्त्वदी०)-विदिभिदीति ॥ ज्ञानार्थे विदिर्व्याख्यानात् ॥ छिदुरमिति ॥ कर्म-कर्तरीति कश्चित् । भाष्ये तु न तथा एवमाद्योऽपि प्रागुक्त एव मुख्यकर्तरि । 'गुरुमत्सरच्छिदुरया-दुरयाचितमञ्जनाः' इति ॥

(इण्नशजिसर्तिभ्यः क्वरप्) ह्रस्वस्य पिति तुक् ॥ इत्वरः । इत्वरी । नश्वरः । जित्वरः । सृत्वरः । गमेर्लोपश्च । गत्वरः ॥

(सुबोधिनी)-इण्नशजिसर्तिभ्यः क्वरप् ॥ एभ्यः क्वरप् प्रत्ययः स्यात् । क्वरप्प्रत्ययमाह । कित्त्वान्न गुणः । टित्त्वात् टिड्ढाणञिति ङीप् । पित्त्वात्तुक् । इण् गतौ । इत्वरः। इत्वरी स्त्री ॥ णश् अदर्शने । नश्वरः॥ जि जये । जित्वरः ॥ सृ गतौ सृत्वरः ॥ गम्लृ गतौ । मलोपो निपात्यते गत्वरः ॥

(तत्त्वदी०)-इत्वरः। ह्रस्वस्येति तुक् । ट् ईबर्थः॥

(जागर्तेरूकः) जागरूकः ॥

(सुबोधिनी)-जागर्तेरूकः ॥ ऊकप्रत्ययः स्यात् ॥ ऊकप्रत्ययमाह--जागृ निद्राक्षये । जागरूकः ॥

यङ ऊकः॥यजजपदशवदिभ्यो यङन्तेभ्य ऊकः शीले॥लुक् ॥

ऊके सति यङो लुक् ॥ यायजूकः । जञ्जपूकः । दंदशूकः । वावदूकः ॥

(सुबोधिनी)--यङ ऊकः ॥ यजादिभ्यो यङन्तेभ्य ऊकः स्यात् ॥ यजेर्यङि कृते द्वित्वादि । आत इति पूर्वस्य दीर्घेऽतिशयेन यजतीति यायज्यते २ इति यायजूकः॥ जप व्यक्तायां वाचि । अतिशयेन जपतीति जपजभेति नुक् । जंजप्यते २ इति जंजपूकः ॥ दंश दशने । अतिशयेन दशतीति नुक् । दंदश्यते २ इति दंदशूकः । नो लोप इति नलोपः ॥ वद व्यक्तायां वाचि । अतिशयेन वदतीति वावद्यते २ इति वावदूकः ॥

(भियः क्रुक्लुकनौ) भीरुः । भीरुकः । भीलुकः ॥

(सुबोधिनी)-भियःक्रुक्लुकनौ ॥ ञिभी भये । अस्मादेते प्रत्ययाःस्युः॥ क्रुक्लुकन्प्रत्ययानाह-कित्त्वान्न गुणः । 'भीरुभीरुकभीलुकाः' इत्यमरः ॥

(नमादेरः) नम्रः । स्मेरः । नञ्पूर्वाज्जसेः क्रियासातत्ये ॥ अज-स्रम् । कम्रः । हिंस्रः । दीप्रः ॥

(सुबोधिनी)-नमादेरः॥रप्रत्ययः स्यात् ॥ रप्रत्ययमाह--णम प्रह्वत्वे शब्दे च नम्रः । ष्मिङ् ईषद्धसने । स्मेरः ॥ जसु मोक्षणे नञ्पूर्वः । न जस्यत इत्यजस्रम् ॥ कमु कान्तौ । कम्रः ॥ हिसि हिंसायाम् । हिंस्रः ॥ दीपी दीप्तौ दीप्रः ॥

(विन्दुरिच्छुरेतौ निपात्यौ) वेत्ति तच्छीलो विन्दुः । इच्छतीतीच्छुः ॥

(सुबोधिनी)–विन्दुरिच्छुरेतौ निपात्यौ ॥ वेत्तेर्नुम् इषेश्छत्वं च निपात्यते॥ विद् ज्ञाने इत्यस्यैव ग्रहणं नेतरेषाम् । इषु इच्छायामित्यस्यैव ग्रहणं न तु ईष गतौ इष आभीक्ष्ण्ये इत्यनयोरनभिधानान्निपातनाद्वा । वेत्तीत्येवं शीलो विन्दुः। इच्छतीत्येवंशील इच्छुः। विन्दुशब्दः पवर्गीयादिस्तु विदि अवयवे अस्मान्मृगय्वादित्वात्कुप्रत्यये बोध्यः

(तत्त्वदी०)–विन्दुरिच्छुरिति॥वेत्तेर्ज्ञानार्थस्य नुमागमः॥ एवमिषेरिच्छार्थस्य छत्वमुप्रत्ययश्च॥

(स्वपितृषिधृषेर्नजिङ्) स्वप्नक् । तृष्णक् । धृष्णक् ॥

(सुबोधिनी)–स्वपितृषिधृषेर्नजिङ् ॥ एभ्यो नजिङ् प्रत्ययः स्यात् ॥ नजिङ्प्रत्ययमाह । ङित्त्वान्न गुणः । इकार उच्चारणार्थः । ञिष्वप् शये । चोः कुरिति जस्य गः । स्वप्नक् ॥ तृष पिपासायाम् । तृष्णक् ॥ ञिधृषा प्रागल्भ्ये । धृष्णक् ॥

(तत्त्वदी०)–स्वपि ॥ धृष्णगिति ॥ ङित्त्वान्न गुणः ॥

(स्थादेर्वरः) स्थावरः । ईश्वरः । भास्वरः । पेस्वरः । कस्वरः ॥

(सुबोधिनी)–स्थादेर्वरः ॥ एभ्यो वरप्रत्ययः स्यात् ॥ वरप्रत्ययमाह–ष्ठा गतिनिवृत्तौ । स्थावरः ॥ ईश ऐश्वर्ये । ह्वक्त्वयोरितीण्न । ईश्वरः ॥ भासृ दीप्तौ भास्वरः॥ पिस गतौ । पेस्वरः ॥ कस गतौ । कस्वरः ॥

(तत्त्वदी०)–ईश्वर इति ॥ ह्वक्त्वयोरिति नेट् ।

आदृतः किर्द्विश्च भूते ॥ आदन्तादृदन्ताज्जनिगमिनमिभ्यो यङन्तेभ्यः सासहिवावहिचाचलिपापतिभ्यः ध्रिप्रत्ययो भूते शीले धातोश्च द्वित्वं किल्लिड्वद्भाव्यः॥ "रामः सोमं पपिर्यज्ञे ददिर्गाश्चक्रिरद्भुतम् । याजकान्वव्रिराजह्निः पौण्डरीके महाद्विजान् ॥"
जज्ञिः । नेमिः । जग्मिः । सासहिः । वावहिः । चाचलिः । पापतिः ॥

(सुबोधिनी)–आदृतः किर्द्विश्च भूते ॥ किप्रत्ययमाह–कित्त्वान्न गुणः । किप्रत्यये द्वित्वादि । पा पाने । द्वित्वादि । आतोऽनपीत्यालोपः । पपिः॥ डुदाञ् दाने । ददिः ॥ डुकृञ् करणे । चक्रिः ॥ वृङ् संभक्तौ । र इत्यः । वव्रिः ॥ हृञ् हरणे । आजह्रिः ॥ जनी प्रादुर्भावे । गमामित्युपधालोपः । जज्ञिः ॥ णम प्रह्वत्वे शब्दे च । लोपः पचामित्येत्वपूर्वलोपौ । नेमिः ॥ गम्लृ गतौ । गमामित्युपधालोपः । जग्मिः॥ षह मर्षणे । वह प्रापणे । चल कम्पने । पत्लृ पतने।एते यङन्ताः । अतिशयेन सहते इति आत इति पूर्वस्यात्त्वम् । सासह्यते। सासहांचक्रे इति । यत इत्यलोपः । अनपि च इसादीति यलोपः । सासहिः॥अतिशयेन वहतीति वावह्यते।वावहांचक्रे इति वावहिः

अतिशयेन चलतीति । चाचल्यते । चाचलांचक्रे इति चाचालिः ॥ अतिशयेन पततीति पनीपत्यते । पनीपतांचक्रे इति। श्रन्चुस्रंसु इति प्राप्तस्य नीकोऽभावो निपात्यते। पापातिः ॥ " रामः सोमं पापयिंज्ञे दादिर्गाश्च क्रेद्भुतम्।याजकान्वाव्रिराजहिःपौण्डरीके महाद्विजान्॥"रामो यज्ञे सोमं पपाविति पपिः।अक्तादाविति वर्जनान्न कर्माणि षष्ठी। रामो यज्ञे गाः सुरभीः ददाविति ददिः। रामो यज्ञे अद्भुतमाश्चर्यं चकारेति चाक्रिः। रामो यज्ञे याजकान् यज्ञकर्तॄन् वव्रे इति वाव्रिः।रामःपौण्डरीकनाम्नि यज्ञे महान्तश्च ते द्विजाश्च महाद्विजास्तान् आजहारेति आजहिः ॥

(तत्त्वदी०)-आहृत इति॥ आङ् क्त तत्तस्मात्।। लिड्वद्भावेनेमिरित्यादानेरपूर्वलोपौ। जग्मिरिति ॥ गमा स्वर इत्यलोप.॥

अथोणादयः ।

(कादेरुण्) कारुः।वातीति वायुः। पायुः । जायुः । मिनोतीति मायुः । स्वद आस्वादने स्वादुः । साधुः । आशुः । दीर्यते इति दारुः । सानुः ॥

(सुबोधिनी)-अथोणादयः कादेरुण् ॥ उण् प्रत्ययः स्यात्॥उण्प्रत्ययमाहणित्वाद्वृद्ध्यादि। डुकृञ् करणे। करोतीति कारुःशिल्पी कारकश्च। तत्राद्ये योगरूढिर्द्वितीये तु योगमात्रमिति विवेकः । अत एव यौगिके तु धात्वर्थं प्रति कारकान्वयो भवत्येव । तथा च भट्टिः 'राघवस्य ततः कार्यं कारुर्वानरपुंगवः। सर्ववानरसेनानामाश्वागमनमादिशत् " इति ॥"विश्वकर्मणि ना कारुस्त्रिषु कारकशिल्पिनोः " इति मेदिनी ॥ 'कारुःशिल्पिनि कारके' इति धरणिः॥वा गतिगन्धनयोः। आतो युगिति युक्। वायुः ॥ पा पाने पा रक्षणे च । पिबत्यनेन तैलादिकमिति पायुः । युक् । 'गुदं त्वपानं पायुर्ना' इत्यमरः ॥ पाति रक्षतीति विग्रहे रक्षकोऽपि पायुः ॥ जि अभिभवे । जयत्यभिभवति रोगान् इति जायुः औषधम् । भेषजौषधभैषज्यान्यगदो जायुः' इत्यमरः ॥ पुंलिङ्गसाहचर्याज्जायुः पुंसि ॥ डुमिञ् प्रक्षेपणे।मिनोति प्रक्षिपति देहे ऊष्माणमिति निर्मिनोतीति मिनोतिर्वीडागमित्यात्वं युक् च । मायुः।'मायुः पित्तं कफः श्लेष्मा' इत्यमरः ॥ गां वाचं विकृतां मिनोति प्रक्षिपतीति गोमायुः शृगालः॥स्वद आस्वादने स्वदते रोचते इति स्वादुः ॥ साध संसिद्धौ साध्नोति परकार्यमिति साधुः । स्वादुसाधू विशेष्यनिघ्नौ ॥ अशूङ् व्याप्तौ । अश्नुते इत्याशुः । 'आशुर्व्रीहिः पाटलः स्यात्' । शीघ्रार्थेऽव्ययम् । तत्र लिङ्गसामान्ये नपुंसकत्वे क्लीबिः । तद्विशिष्टद्रव्यपरत्वे तु त्रिलिङ्गः। अथ शीघ्रं त्वरितमित्युक्तम् । "क्लीबे शीघ्राद्यसत्त्वे स्यात्त्रिष्वेषां सत्त्वगामि यत्" इत्यमरः ॥दॄ विदारणे । दीर्यते इति दारु । 'काष्ठं दार्विन्धनं त्वेधः' इत्यमरः ॥ षण दाने । सानुः । 'स्नुः प्रस्थः सानुरस्त्रियाम्' इत्यमरः ॥

(तत्त्वदी०)**कादे**रिति॥कृ आदिर्यस्य स कादिस्तस्मात् । कृवापाजिमिस्वदीत्यादय आदिशब्दग्राह्याः । णो वृद्ध्यर्थः ॥ **कारु**रिति॥कारुःशिल्पिनि कारके।द्वितीयेऽर्थे योगमात्रम्।' राघवस्य ततः कार्यं कारुर्वानरपुंगवः' इति भट्टिश्चात एव॥**वायु**रिति ॥ आतो युक् ॥ **पायु**रिति ॥ पिबत्यनेनौपधमिति पायुर्गुदम् ।'गुदं त्वपानं पायुर्ना' इत्यमरः॥**जायु**रिति ॥ जयति रोगानिति जायुरौपधम् । 'भेषजौषधभैषज्यान्यगदो जायुः'इत्यमरः॥**मिनोती**ति॥प्रक्षिपति देहे ऊष्माणमिति । 'मायुः पित्त कफःश्लेष्मा'इत्यमरः॥स्वदते रोचते इति स्वादु मिष्टम् ॥ साध्नोति परकार्यमिति साधुः ॥ अश्नुते इत्याशुर्व्रीहिभेदः शीघ्रार्थश्च।विलम्बाभावमात्रपरत्वे क्लीवम्।तद्विशिष्टद्रव्यपरत्वे तु त्रिलिङ्गम् । 'त्रिष्वेषां मेघगामि यत्' इत्यमरोक्तेः ॥

(जनेर्ञुण्) जानु । चारु । चाटु । किंगृणातीति किंशारुः ।
जरामेति जरायुः ॥

(सुबोधिनी)—जनेर्ञुण् ॥ ञुण्प्रत्ययमाह—ञकाराणितौ । अनुबन्धद्वयसामर्थ्यात् जनिवध्योर्नेति वृद्धिनिषेधो न प्रवर्तते । जन जनने । जानु, जानुनी॥चर गतौ । चारु रम्यम् ॥ चट भेदने । चाटु । 'चटु चाटु प्रियं वाक्यम्' इति हेमचन्द्रः ॥ 'चाटुर्नारि प्रियोक्तिःस्यात्' इति रत्नमाला॥तथा च माघः 'चक्रुश्च किल चाटून्प्रौढयोषिद्वदस्य'इति । माघे तु क्लीवेऽपि । 'चाटु चाकृतकसंभ्रममासाम्' इति । शॄ हिंसायाम्॥ किंशारुः । 'किंशारुर्ना सस्यशूके विशिखे कङ्कपक्षिणि' इति मेदिनी ॥ इण् गतौ । वृद्धौ कृतायामायादेशे च जरायुः गर्भाशयः ॥

(तत्त्वदी०)—जनेर्ञुणिति ॥'चटु चाटु प्रिय वाक्यम्'इति हेमचन्द्रः ॥ चाटुर्नारि प्रियोक्तिः स्यात्' इति रत्नकोशात्पुंस्त्वमपि । तयोभयत्रोदाहृतं माघेन—'चाटु च कृतकसंभ्रममासाम्।' 'चक्रुश्च किल चाटून्प्रौढयोपिद्वदस्य'इति च॥'किंशारुर्ना सस्यशूके विशिखे कङ्कपक्षिणि'इति ॥

(त्रोरस्य लः) तरन्ति वर्णा अनेनेति तालु ॥

(सुबोधिनी)—त्रोरस्य लः॥तॄ ऋ इति प्रश्लिष्य द्वयोरपि सवर्णे दीर्घे कृते त्रॄ तयोस्त्रोः। तॄ प्लवनतरणयोः । ऋ गतौ । अनयोरस्य लः स्यात ॥ उणि वृद्धौ सत्यां तालु ॥ इयर्ति अर्यते वा आलुः । शाकविशेषो घटी चा'कर्कर्यालुर्गलन्तिका'इति॥

(कृके वचः कश्च) कृकेन गलेन वक्तीति कृकवाकुः ॥

(सुबोधिनी)—कृके वचःकश्च ॥कृकशब्दे उपपदे वचे कोऽन्तादेशःस्याद्धुणि॥ कृकवाकुः । 'कृकवाकुर्मयूरे च सरटे चरणायुधे ' इति विश्वः ॥

(भ्रादेरुः) मरुः । शयुः । तरुः । चरुः । त्सर छद्मगतौ त्सरुः ।
तनुः । धनुः । मयुः । कटुः । चटुः । अणुः । गृणातीति शरु ।
स्वरुः । त्रपुः । असवः।वसुः । हनुः । बन्धुः । मनुः । बिन्दुः ॥

(सुबोधिनी)–म्रादेरुः ॥ उप्रत्ययः स्यात् ॥ उप्रत्ययमाह–मृङ् प्राणत्यागे । म्रियन्तेऽस्मिन्भूतानीति मरुः निर्जलदेशः। भृञ् भरणे । डुभृञ् धारणादौ च भरति बिभर्ति वा भरुः।'भरुः स्वर्णे हरे पुंसि' इति मेदिनी ॥ 'भरुर्भर्तृकनकयोः'इति हैमः॥ शीङ् स्वप्ने । शेते इति शयुः । 'अजगरे शयुर्वाहस इत्युभौ' इत्यमरः ॥ तॄ प्लवनतरणयोः । तरन्ति नरकमेनेन रोपका इति तरुर्वृक्षः ॥ चर गत्यादौ । चरन्ति भक्षयन्ति वा इममिति चरुः । 'चरुर्भाण्डे च हव्यान्ने' इति विश्वः । घृतपक्कमन्नमित्यर्थः ॥ त्सर छद्मगतौ । त्सरुः खड्गादिमुष्टिः ॥ तनु विस्तारे । तनुः । "तनुः काये त्वचि स्त्री स्यात्त्रिष्वल्पे विरले कृशे" इति मेदिनी ॥ 'स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः ॥ धन धान्ये । धनुः । "स्यात्तनुस्तनुषा सार्धं धनुषा च धनुर्विदुः" इति विश्वः॥ उकारान्ते श्रीहर्षः-"शुद्धवंशजनितोऽपि गुणस्य स्थानतामनुभवन्नपि शक्रः। क्षिप्नुरेनमृजुमाशु सपक्षं सायकं धनुरिवाजनि वक्रः॥" 'धनुः पुमान् पियालद्रौ राशिभेदे शरासने'इति शान्ते मेदिनी ॥ 'अथास्त्रियां धनुश्चापौ' इत्यमरः॥डुमिञ् प्रक्षेपणे । मीनातिमिनोतीत्यात्वं तु नेह बाहुलकात् । मयुः । 'तुरङ्गवदनो मयुः' इत्यमरः ॥ 'मयुस्तुरंगवदने मृगेऽपि मयुरिष्यते' इति विश्वः ॥ टुमस्जो शुद्धौ । मज्जति पानीये इति न्यङ्क्वादित्वात् । ... मद्गुः। 'मद्गुः पानीयकाकिका'इति रभसः। अण शब्दे । अणुः ।'व्रीहिभेदस्त्वणुः पुमान्' इति 'लवलेशकणाणवः'इति चामरः। कटे वर्षादौ । कटति रसनामिति कटुः । "कटुः स्त्री कटुरोहिण्यां लताराजिकयोरपि । नपुंसकमकार्ये स्यात्पुंल्लिङ्गो रसमात्रके । त्रिषु तद्वत्सुगन्धेऽथ मत्सरेऽपि खरेऽपि च" इति मेदिनी ॥ वट वेष्टने । वटतीति वटुः ।'वटुर्द्विजसुतः स्मृतः' इति संसारावर्तः। शॄ हिंसायाम् । शरुः । 'शरुः कोपे शरे वज्रे' इति हैमः ॥ स्वृ शब्दोपतापयोः । स्वरुः 'शतकोटिः स्वरुः शम्बः' इत्यमरः ॥ त्रपूष् लज्जायाम् । अग्निं दृष्ट्वा त्रपते लज्जते इति त्रपुः । 'रंगसीसकयोस्त्रपुः' इति मेदिनी ॥ असु क्षेपणे । अस्यन्ति क्षिपन्ति शरीरमिति असवः। 'पुंसि भूम्न्यसवः प्राणाः'इत्यमरः॥वस निवासे । वसुः । "वसुर्मयूखाग्न्योर्धनाधिपे । देवभेदेऽग्नौ योक्त्रेऽग्नौ वसु तोये धने मणौ" ॥ हन हिंसागत्योः । हनुः । 'हनुः पुमान् पो गण्डात्' इति वररुचिविशेषः॥ स्त्रीलिङ्गोऽप्ययम् ।'हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम् । द्वयोः कपोलावयवे" इति मेदिनी ॥ मतुबन्त्ये हनुमान् । शाकिकेश दीर्घोऽपि निर्दिष्टः । हनूमान्॥बन्ध बन्धने । स्नेहेन बध्नातीति बन्धुः। 'बन्धुर्बन्धूकपुष्पे स्याद्बन्धुर्भ्रातरि बान्धवे' इति विश्वः ॥ मन ज्ञाने । मनुः । ... मन्त्रश्च ॥

चर्मादिः ॥ डुधाञ् धारणपोषणयोः । "धातुर्ना नेन्द्रिये त्रिषु । शब्दयोनिमहाभूततद्गुणेषु रसादिषु। मनःशिलादौ श्लेष्मादौ विशेषाद्गैरिकेऽस्त्रि च" इति मेदिनी॥"श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः ॥ इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः" इत्यमरः ॥ क्रुश आक्रोशे । छशषेति षत्वं ष्टुत्वं तृवद्भावः क्रोष्टा । स्तुरारित्यार् । क्रोष्टारौ ॥

(तत्त्वदी०)--स्यादेरिति॥सिनातीति सेतुःजलमिति शेषः ॥ मस्तुरिति ॥ दधिमण्डम्॥ धातुरिति ॥ 'मनःशिलादौ धातुः स्यादिन्द्रियेषु तथैव च' ॥

(अरतेस्तुक्) ऋतुः । मन्तुः । जनी प्रादुर्भावे । जन्तुः ॥

(सुबोधिनी)—अर्तेस्तुक् ॥ तुक्प्रत्ययमाह—कित्त्वान्न गुणः । ऋ गतौ।ऋतुः । 'ऋतुर्वर्षादिषट्सु च'। 'आर्तवे मासि च पुमान्' इति मेदिनी।।'ऋतुःस्त्री कुसुमेऽपि च' इत्यमरः'।।'ऋतुः स्त्रीपुष्पकालयोः' इति विश्वः॥पुनस्तुप्रत्ययमाह—मन ज्ञाने मन्तुः। 'मन्तुः पुंस्यपराधेऽपि मनुष्येऽपि प्रजापतौ' इति मेदिनी।।जनी प्रादुर्भावे। जन्तुःप्राणी॥

(तत्त्वदी०)—ऋतुरिति ॥ 'स्त्रीपुष्पे च ऋतुः काले' । मन्तुरपराधः ॥

(चायः किः) केतुः । वस्तु ॥

(सुबोधिनी)—चायः किः ॥ चायृ पूजानिशामनयोः अस्मात् तुप्रत्ययो धातोः किरादेशश्च स्यात् ॥ केतुः। 'केतुर्ग्रहपताकयोः' इति विश्वः॥'केतुर्ना रुक्पताकारिग्रहोत्पातेषु लक्ष्मणि' इति मेदिनी ॥ वस निवासे तुः वस्तु ॥

(तत्त्वदी०)—केतुरिति ॥ पताकाग्रहोत्पातेषु लक्षणि च ॥

(आगारे णित्) वास्तुः ॥

(सुबोधिनी)—आगारे णित् ॥ आगारेऽर्थे वसेस्तुण् स्यात् ॥ तुण्प्रत्ययमाह—णित्त्वाद्वृद्धिः । वास्तुः।'वेश्मभूर्वास्तुरस्त्रियाम्' इत्यमरः ॥

(कृञः क्तुः) क्रतुः ॥

(सुबोधिनी)—कृञःक्तुः ॥ क्तुप्रत्ययमाह—कित्त्वान्न गुणः । डुकृञ् करणे। क्रतुः । 'क्रतुर्यज्ञे मुनौ पुंसि' इति मेदिनी ॥

(तत्त्वदी०)—क्रतुरिति ॥ 'क्रतुर्यज्ञे मुनौ पुंसि' ॥

(जीवेरातृकन् वृद्धिश्च) जीवयति कुमुदानीति जैवातृकः ॥

(सुबोधिनी)—जीवेरातृकन् वृद्धिश्च ॥ जीव प्राणधारणे अस्मात् आतृकन्प्रत्ययः स्याद्धातोर्वृद्धिश्च । [illegible] जैवातृकः [illegible] त्रिषु इति मेदिनी ॥ [illegible] ॥ [illegible] 'जैवातृकः [illegible]' ॥

(तत्त्वदी०)—जीवेरिति ॥ 'जैवातृकः [illegible]' ॥

(कृषादेरूः) कर्षूः । खर्ज व्यथने । खर्जूः ॥

(सुबोधिनी)—कृषादेरूः ॥ ऊप्रत्ययमाह—कृष विलेखने कर्षूः । 'कर्षूः पुंसि करीषाग्नौ कर्षूर्नद्यां स्त्रियां मता' इति विश्वः ॥ 'कर्षूः पुमान् करीषाग्नौ स्त्रियां कुल्याल्पखातयोः" इति मेदिनी ॥ खर्ज व्यथने । खर्जूः । 'खर्जूः खर्जूरी कीटकं द्रुपुः' इति हैमः ॥ पामा च ॥

(तत्त्वदी०)—कृषादेरिति ॥'कर्षूः पुंसि करीषाग्नौ कर्षूर्नद्यां स्त्रियां मता' । खर्जूः कीटान्तरे वृत्तौ' इति मेदिनी ॥

(वहो धश्च) वहति प्राप्नोति धनमिति वधूः ।

(सुबोधिनी)—वहो धश्च ॥ वह प्रापणे अस्य धान्तादेश ऊप्रत्ययश्च स्यात् ॥ वधूः स्त्रीविशेषः। 'वधूः स्नुषा नवोढा स्त्री भार्यापृक्कानासु च' इति विश्वः ॥ 'वधूर्जाया स्नुषा स्त्रीषु पृक्का च महिला वधूः' इति त्रिकाण्डशेषः ॥

(तत्त्वदी०)—वधूः स्नुषा नवोढा स्त्री भार्या च ॥

(कषेश्छश्च) कच्छूः ॥

(सुबोधिनी)—कषेश्छश्च ॥ कष हिंसायामस्मादूप्रत्ययः स्यादन्तस्य छश्च ॥ कच्छूः । 'कच्छूः तु पामपामा विचर्चिका' इत्यमरः ॥

(तत्त्वदी०)—कच्छूः पामा ॥

(कास्वादयः) कस्यते हन्यतेऽनया कासूः । पद्यते प्राप्यतेऽनया पादूः । लबि गतौ अलाबूः । कशेरूः । दर्दूः ॥

(सुबोधिनी)—कास्वादयः ॥ ऊणप्रत्ययान्ता निपात्यन्ते । णित्त्वाद्वृद्धिः॥ ऊणप्रत्ययमाह—कस गतौ कासूः । 'कासूर्विकलवाचि स्यात्तथा शक्त्यायुधे स्त्रियाम्' इति मेदिनी ॥ 'कासूः शक्त्यायुधे रुजि । बुद्धौ विकलवाचि स्यात्' इति हैम ॥पद गतौ॥ पादूः चरणधारिणी । लबि अवस्रंसने । नञ्युपपदे लम्बेर्नलोपो निपात्यते । न लम्बते जले इत्यलाबूः । 'तुम्ब्यलाबूरुभे समे' इत्यमरः । शॄ हिंसायाम् । कशब्दे उपपदे शृणातेरूप्रत्ययः ऋत एरादेशश्च निपात्यते । कशेरूः । बाहुलकादुप्रत्ययोऽपि । 'कशेरुस्तृणकन्दे स्त्री' इति ॥ दरिद्रा दुर्गतौ । ऊप्रत्यये इकारस्याकारस्य च लोपो निपात्यते । दर्दूः कुष्ठभेदः । मृगय्वादित्वात्कुप्रत्यये दर्दुरपि । 'दर्दुर्णो दद्रुरोगी स्यात्' इत्यमरः ॥

(तत्त्वदी०)—'कासूर्विकलवाचि स्यात्तथा शक्त्यायुधे स्त्रियाम्' इति मेदिनी ॥ पादूश्चरणधारिणी । 'तुम्ब्यलाबूरुभे समे' 'कशेरुस्तृणकन्दे स्त्री' ॥

(अन्द्वादयः) अन्दूः ॥

(सुबोधिनी)–अन्द्वादयः ॥ कूप्रत्ययान्ता निपात्यन्ते । अदि बन्धने । अन्दूः 'अन्दूः स्त्रियां स्यान्निगडे प्रभेदे भूषणस्य च' इति मेदिनी ॥'अन्दुको हस्तिनिगडे' इत्यमरः। संज्ञायां कप्रत्यये पूर्वस्य ह्रस्वः। केचित्तु अम गतौ अस्य दुगागमे कूप्रत्यये च अन्दूर्बुद्धिरिति व्याचख्युः ॥

(तत्त्वदी०)–अन्द्वादयः ॥ 'अन्दूः स्त्रिया स्यान्निगडे प्रभेदे भूषणस्य च' ॥

(जनेर्बुक्) जम्बूः। कर्कं दधातीति कर्कन्धूः। दिधिं धैर्यं स्यतीति दिधिषूः ॥

(सुबोधिनी)–जनेर्बुक् ॥ जनी प्रादुर्भावे अस्य बुगागमःस्यात्कूप्रत्यये॥ जम्बूः जमु अदने अस्येत्येके । बाहुलकात्कुप्रत्ययोऽपि । जम्बुः। उक्तं च विक्रमादित्यकाव्ये 'तस्य जम्बोः फलरसो नदीभूय प्रवर्तते' इति ।'परिणतजंबुफलोपभोगहृष्टाः'इति भारविः॥ डुधाञ् धारणादौ ।आतोऽनपीत्यालोपनिपातनात्पूर्वपदस्य नुम् । कर्कं दधातीति कर्कंधूः । 'कर्कंधूर्बदरी कोलिः' इत्यमरः ॥ षोऽन्तकर्मणि । दिधिं धैर्यं स्यति त्यजतीति संध्यक्षराणामित्यात्वे आतोऽनपीत्यालोपे च दिधिषूः। कैश्चित्तु दधातेरित्वं दित्वं षुक् च निपात्यते दधात्यसाविति दिधिषूरिति व्याख्यातम्। 'पुनर्भूर्दिधिषूरूढा द्विः'इत्यमरः ॥ द्विरूढा द्विवारं विवाहितेत्यर्थः ॥

(तत्त्वदी०)–कर्कंधूर्बदरी । दिधिषूः पुनर्भूः॥

(मृग्रोरुतिः) मरुत् । गरुत् ॥

(सुबोधिनी)–मृग्रोरुतिः ॥ उतिप्रत्ययमाह–इकार उच्चारणार्थः। मृङ् प्राणत्यागे ।मरुत् । अणप्रत्यये मारुतः ।मरुतशब्दोऽप्यव्युत्पन्नोऽस्ति । 'मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुत्' इति विक्रमादित्यकोशः॥'कोऽयं वाति स दाक्षिणात्यमरुतः' इति कविराजश्लोकः। गॄ निगरणे ॥

(तत्त्वदी०)–मृग्रोरिति ॥ गरुत्पक्षः गर्मुत्तृणं च ॥

(गिरतेरुतिस्तस्य मुट्) गर्मुत् ॥

(सुबोधिनी)–गिरतेरुतिस्तस्य मुट् ॥ अस्मात्परस्योत्प्रत्ययस्य मुडागमः स्यात् ॥ गर्मुत् । 'गर्मुत्स्त्री स्वर्णलाभयोः' इति मेदिनी ॥

(चटेरुलः) चट भेदने चटुलम् ॥

(सुबोधिनी)–चटेरुलः ॥ उलप्रत्ययमाह । चट भेदने। चटुलं शोभनम् ॥

(हृादेरिति) हरित् । सरित् । युष सौत्रो धातुः । युष भजने ॥ योषित् ॥

(सुबोधिनी)–हृादेरितिः ॥ इतिप्रत्ययमाह–इकार उच्चारणार्थः । हृञ् हरणे । हरित् ।'हरित्ककुभि वर्णे च तृणवाजिविशेषयोः' इति विश्वः॥ 'हरिद्दिशि स्त्रियां पुंसि

हयवर्णविशेषयोः । अस्त्रियां स्यात्तृणेऽपि च' इति मेदिनी ॥ रुह बीजजन्मनि । रोहित् । 'रोहिन्मृग्यां लताभेदे स्त्रीनार्कें' इति मेदिनी ॥ युष इति धातुः सौत्रः। योषित् । 'स्त्री योषिदबला योषा' इत्यमरः ॥

(तत्त्वदी०)-ह्लादेरिति॥'हारित्कुनि वर्णे च तृणवाजिविशेषयोः'। 'रोहिन्मृगविशेषे स्त्री'।

(ताडेर्णिलुक् च) तडित् ॥

(सुबोधिनी)-ताडेर्णिलुक् च ॥ इतिप्रत्यये अस्य णेर्लुक् स्यात् ॥ तड आघाते । ताडयतीति तडित् । 'तडित्सौदामनी विद्युत्' इत्यमरः ॥

(शमेर्ढः) शण्ढः ॥

(सुबोधिनी)-शमेर्ढः॥ ढप्रत्ययमाह-बाहुलकात् ढस्येत्संज्ञा न । शमु उपशमे । हवत्त्योरित्तीण्न । शण्ढः। 'शण्ढः स्यात्पुंसि गोपतौ । आकृष्टाण्डे वर्षवरे तृतीयप्रकृतावपि' इति मेदिनी ॥

(तत्त्वदी०)-शमेरिति ॥ शण्ढः क्लीब. ॥

(कमादेरठः) कमठः । जरठः। (रमेर्वृद्धिश्च) रामठम्। शमेः खः । शंखः । कणेष्ठः । कण्ठः ॥

(सुबोधिनी)-कमादेरठः ॥ अटप्रत्ययमाह-कमु कान्तौ । कमठः । 'कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकम्' इति मेदिनी। जॄ वयोहानौ । जरठः।'जरठःकठिने पाण्डौ कर्कशेऽप्यभिधेयवत्' इति विश्वः ॥ 'जरठः कठिने जीर्णे' इति वैजयन्ती ॥ रमेर्वृद्धिश्च ॥ रमु क्रीडायामस्य वृद्धिः स्यादठप्रत्यये च । रामठं हिंगु ॥ शमेः खः॥ खप्रत्ययमाह--शमु उपशमे । शंखः । 'शंखो निधौ ललाटास्थ्नि कम्बौ न स्त्री' इत्यमरः ॥ शंखः कम्बौ न योषित्स्त्री भालास्थ्नि निधिभिन्नखे' इति मेदिनी ॥ कणेष्ठः ॥ ठप्रत्ययमाह-कण शब्दे । निपातनात् णस्यानुस्वारे कण्ठः । 'कण्ठो गले सान्निधाने ध्वनौ मदनपादपे' इति मेदिनी ॥

(तत्त्वदी०)-कमादेरिति ॥ रामठं हिंगु ॥

(वृषलादयः कलप्रत्ययान्ता निपात्याः) वृषलः । शप् शबलः । पल गतौ पललम् । तरलम् । तरलम् । कम्बलम् । मुस खण्डने । मुसलम् ॥

(सुबोधिनी)--वृषलादयः कलप्रत्ययान्ता निपात्याः ॥ कित्त्वान्न गुणः ॥ वृष सेचने । वृषलः । 'वृषलस्तुरगे शूद्रे' इति हेमः ॥ शप आक्रोशे।निपातनात्पस्य वः । शबलः ॥ पल गतौ । पललम् । 'पललं तिलचूर्णे च पङ्के मांसे नपुंसकम् । ना राक्षसे' इति मेदिनी ॥ तृ प्लवने । बाहुलकाद्गुणः। तरलः।'तरलः [illegible] गायोज्ज्वलवल्लीपोतिषु' इति मेदिनी । "तरला [illegible] ॥ न शर्मा न च

(सुबोधिनी)–भियोऽजिः षुक् ह्रस्वश्च ॥ ञिभी भये अस्मादजिप्रत्ययः स्यात् ॥ अजिप्रत्ययमाह–इकार उच्चारणार्थः । अजिप्रत्यये भियो ह्रस्वः षुगागमश्च स्यात् ॥ ह्रस्वविधानसामर्थ्यान्न गुणः। भिषक् ।'भिषग्वैद्यौ चिकित्सके' इत्यमरः ॥

(**युष्यसिभ्यां मदिक्**) युष सौत्रः । युष्मद् । अस्मद् ॥

(सुबोधिनी)–युष्यसिभ्यां मदिक् ॥ मदिक्प्रत्ययमाह–कित्त्वाद्गुणो न। इकार उच्चारणार्थः । युष सौत्रो धातुः । युष्मद् । असु क्षेपणे । त्वम् । अहम् ॥

(**स्त्वादेर्मः**) स्तोमः । सोमः । होमः । धर्मः । क्षेमम् । भामः । वामः । यामः । पद्मम् । नयतीति नेमः ॥

(सुबोधिनी)–स्त्वादेर्मः ॥ मप्रत्ययमाह–ष्टुञ् स्तुतौ । स्तोमः संघातः॥ षुञ् अभिषवे । "सोमस्तुहिनदीधितौ॥वानरे च कुबेरे च पितृदेवे समीरणे। वसुप्रभेदे कर्पूरे नीरे सोमलतौषधौ" इति मेदिनी ॥ हु दानादनयोः । होमः। देवतोद्देशेन हविःप्रक्षेपो होमः॥धृञ् धारणे।धर्मः।"धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयोःक्रतौ । अहिंसोपनिषन्न्याये ना धनुर्यमसोमपे" इति मेदिनी ॥ 'धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ' इति विश्वः ॥ क्षि क्षये । क्षेमम ॥ भा दीप्तौ भामः । 'भामः क्रोधे रुचौ दीप्तौ'। इति विश्व आदित्यश्च । या प्रापणे । यामः । 'यामस्तु पुंसि प्रहरे संयमेऽपि प्रकीर्तितः' इति मेदिनी ॥ वा गतिगन्धनयोः । वामः। "वामं धने पुंसि हरे कामदेवे पयोधरे । वल्गुप्रतीपसव्येषु त्रिषुनार्यांस्त्रियामथ।वामी शृगाली वडवारासभीकलभीषु च"इति मेदिनी॥पद् गतौ । पद्मम् ।'पद्मोऽस्त्री पद्मके व्यूहनिधिसंख्यान्तरेऽम्बुजे। ना नागे' इति मेदिनी ॥ णीञ् प्रापणे । नेमः । 'नेमः कालेऽवधौ गर्त्ते प्राकारे कैतवेऽपि च' इति मेदिनी ॥ 'नेमस्त्वर्द्धे प्राकारगर्त्तयोरवधौ कैतवेऽपि च' इति हैमः ॥

(**जिह्मादयो निपात्यन्ते**) जिह्मः । ग्रसु ग्लसु अदने ग्रामः । सिमः । शुष्मम् । श्यैङ् श्यामः । धूमः । युग्मम् । रुक्मम् । तिग्मम् । हिमम् । भीमः । भीष्मः । घृ क्षरणे दीप्तौ च । जिघर्त्यनेन धर्मः । ग्रसे ग्रीष्मः ॥

(सुबोधिनी)–जिह्मादयो निपात्यन्ते ॥ ओहाङ् त्यागे अस्मात् मन्प्रत्ययः मन्प्रत्ययः सन्वद्भवति आदौ लोपश्च निपातनात् । तेन द्वित्वादिः। यः से इति पूर्वस्य [illegible] । जिह्मः । 'जिह्मः कुटिलमन्दयोः' इत्यमरः 'जिह्मन्तु कुटिले मन्दे क्लीबे तगरपादपे' इति मेदिनी॥ग्रसु अदने । ग्रसेर्ग्रत्वं निपात्यते । ग्रामः । 'ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वके' इति विश्वः। शब्दादिपूर्वके ग्रामशब्दो वृन्दे । शब्दग्रामः गुणग्राम इति यथा । 'संवसथस्तु ग्रामः' इत्यमरः । 'वृन्देऽसंघपूर्वे स्मृतः' इति विश्वः।

(सुबोधिनी)--विडादेः कित् ॥ अङ्कप्रत्ययमाह–कित्वान्न गुणः । विड आक्रोशे । 'विडङ्गःविडङ्गःकृमिसंबध्ने विडङ्गो नागरेऽन्यवत्' इति विश्वः॥'विडङ्ग त्रिष्वभिज्ञे स्यात्कामिघ्ने पुंनपुंसकम्' इति मेदिनी ॥ मृद क्षोदे । मृदङ्गः । 'मृदंगः पटहे घोषे' इति मेदिनी ॥

(गमादेर्गः) गङ्गा । छो छागः । खड्गः ॥

(सुबोधिनी)–गमादेर्गः ॥ गप्रत्ययमाह–गम्लृ गतौ । गङ्गा ॥ छो छेदने । छागः । खड भेदने । खड्गः । 'खड्गो गण्डकशृङ्गे स्यान्निस्त्रिंशे गण्डकेऽपि च' इति शब्दतरङ्गिणी । 'खड्गो गण्डकशृङ्गासिबुद्धभेदेषु गण्डके' इति मेदिनी ॥

(भृङ्गादयः) भृञ भृङ्गः । शृङ्गम् । शार्ङ्गः। पूगः । मोदतेः मुद्गः ।

(सुबोधिनी)–भृङ्गादयः ॥ गक्प्रत्ययान्ता निपात्यन्ते–डुभृञ् धारणपोषणयोः । प्रत्ययस्य नुट् निपातनात् । भृंगः । 'भृङ्गाः षिङ्गालिधूम्याटाः' इति विश्वः ॥ 'भृङ्गो धूम्याटषिङ्गयोः । मधुव्रते भृङ्गराजे पुंसि भृङ्गं गुडत्वचि' इति मेदिनी ॥ शॄ हिंसायाम् । शृणातेर्ह्रस्वः प्रत्ययस्य नुडागमश्च निपात्यते । शृङ्गम् "शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके । विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कूर्चशीर्षके । स्त्रीविषायां स्वर्णमीनभेदयोर्ऋषभौषधौ' इति मेदिनी ॥ "शृङ्गं विषाणमाख्यातं शैलाग्रे जलयन्त्रके । मीनौषधिसुवर्णानां भेदे शृङ्गी प्रयुज्यते"। इत्युत्पलिनीकोशे शृणातेः शकुनौ वाच्ये गण् प्रत्ययः तस्य नुट् च निपात्यते । णित्वाद्वृद्धिः । शार्ङ्गः पक्षी । शार्ङ्गं धनुरिति तु शृङ्गस्य विकार इत्यर्थेऽण्प्रत्यये बोध्यम् ॥ पूङ् पवने । पूयते मुखमनेनेति पूगः । 'पूगस्तु क्रमुके वृन्दे' इति मेदिनी ॥ मुद हर्षे । मुद्गः शस्यभेदः ॥

(शरदादयोऽदिप्रत्ययान्ता निपात्याः) शॄ शरत् । दृणातेः दरत् । दृषत् । त्यजेः त्यत् । तनेः तत् । यजेः यत् । इण् एतत् ॥

(सुबोधिनी)–शरदादयोऽदिप्रत्ययान्ता निपात्याः॥ शॄ हिंसायाम् । अदिप्रत्ययः । इकार उच्चारणार्थः । शरत् ।'शरत्स्त्री वत्सरेऽप्यृतौ'इति मेदिनी ॥ दॄ विदारणे । दरत् । 'दरास्त्रियां प्रपाते च भयपर्वतयोरपि' इति मेदिनी ॥ दृणातेः पुक् ह्रस्वगुणाभावश्च निपात्यते । दृषत् । 'दृषन्निष्पेषणशिलापट्टप्रस्तरयोः स्त्रियाम्' इति मेदनी ॥ त्यज हानौ ॥ निपातनाट्टिलोपः । त्यद् ॥ तनु विस्तारे । निपातनाट्टिलोपः । तद् ॥ यज देवपूजादौ । टिलोपो निपातनात् । यद् ॥ इण् गतौ । अस्य गुणे कृते तुगागमो निपात्यते । एतद् ॥

(तत्त्वदी०)-शरदादय इति ॥ शरद्धृदयकृलयोः ॥

(भियोऽजिः पुक् ह्रस्वश्च) भिषक् ॥

(सुबोधिनी)--भियोऽजिः षुक् ह्रस्वश्च ॥ ञिभी भये अस्मादजिप्रत्ययः स्यात् ॥ अजिप्रत्ययमाह–इकार उच्चारणार्थः । अजिप्रत्यये भियो ह्रस्वः षुगागमश्च स्यात् ॥ ह्रस्वविधानसामर्थ्यान्न गुणः। भिषक् ।'भिषग्वैद्यौ चिकित्सके' इत्यमरः ॥

(युष्यसिभ्यां मदिक्) युष सौत्रः । युष्मद् । अस्मद् ॥

(सुबोधिनी)–युष्यसिभ्यां मदिक् ॥ मदिक्प्रत्ययमाह–कित्त्वाद्गुणो न। इकार उच्चारणार्थः । युष सौत्रो धातुः । युष्मद् । असु क्षेपणे । त्वम् । अहम् ॥

(स्त्वादेर्मः) स्तोमः । सोमः । होमः । धर्मः । क्षेमम् । भामः । वामः । यामः । पद्मम् । नयतीति नेमः ॥

(सुबोधिनी)–स्त्वादेर्मः ॥ मप्रत्ययमाह–ष्टुञ् स्तुतौ । स्तोमः संघातः ॥ षुञ् अभिषवे । "सोमस्तुहिनदीधितौ॥वानरे च कुबेरे च पितृदेवे समीरणे। वसुप्रभेदे कर्पूरे नीरे सोमलतौषधौ" इति मेदिनी ॥ हु दानादनयोः । होमः। देवतोद्देशेन हविःप्रक्षेपो होमः॥धृञ् धारणे।धर्मः।"धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ । अहिंसोपनिषन्न्याये ना धनुर्यमसोमपे" इति मेदिनी ॥ 'धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ' इति विश्वः ॥ क्षि क्षये । क्षेमम् ॥ भा दीप्तौ भामः । 'भामः क्रोधे रुचौ दीप्तौ'। इति विश्व आदित्यश्च । या प्रापणे । यामः । 'यामस्तु पुंसि प्रहरे संयमेऽपि प्रकीर्तितः' इति मेदिनी ॥ वा गतिगन्धनयोः । वामः । "वामं धने पुंसि हरे कामदेवे पयोधरे । वल्गुप्रतीपसव्येषु त्रिषु नार्यां स्त्रियाम् यथा॥वामी शृगाली वडवारासभीकरभीषु च"इति मेदिनी॥पद गतौ । पद्मम् ।'पद्मोऽस्त्री पद्मके व्यूहनिधिसंख्यान्तरेऽम्बुजे । ना नागे' इति मेदिनी ॥ णीञ् प्रापणे । नेमः । 'नेमः कालेऽवधौ गर्त्ते प्राकारे कैतवेऽपि च' इति मेदिनी ॥ 'नेमस्त्वर्द्धे प्राकारगर्त्तयोरवधौ कैतवेऽपि च' इति हैमः ॥

(जिह्मादयो निपात्यन्ते) जिह्मः । ग्रसु ग्लसु अदने ग्रामः । सिमः । शुष्मम् । श्यैङ् श्यामः । धूमः । युग्मम् । रुक्मम् । तिग्मम् । हिमम् । भीमः । भीष्मः । घृ क्षरणे दीप्तौ च । जिघर्त्यनेन घर्मः । ग्रसे ग्रीष्मः ॥

(सुबोधिनी)–जिह्मादयो निपात्यन्ते ॥ ओहाक् त्यागे अस्मात् मप्रत्ययः नप्रत्ययवत्कार्यं इति आतो लोपश्च निपातनात् । तेन द्वित्वादिः। षः मे इति दृश्यतम् । जिह्मः । 'जिह्मः कुटिलमन्दयोः' इत्यमरः 'जिह्मस्तु कुटिले मन्दे क्लीबे तगरपादपे' इति मेदिनी॥ग्रसु अदने । ग्रसेरात्वं निपात्यते । ग्रामः । 'ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वके' इति विश्वः॥शब्दादिपूर्वको ग्रामशब्दो वृन्दे । इन्द्रियग्रामः गुणग्राम इति यथा । 'शब्दादिपूर्वो वृन्देऽपि ग्रामः' इत्यमरः ॥ 'संग्रामः संयुगे स्मृतः' इति विश्वः।

(सुबोधिनी)-बिडादेः कित् ॥ अङ्गकप्रत्ययमाह-कित्वान्न गुणः । बिड आक्रोशे । 'विडङ्गः।विडङ्गःक्रमिसंघघ्ने विडङ्गो नागरेऽन्यवत्' इति विश्वः॥'विडङ्ग त्रिष्वभिज्ञे स्यात्क्रामिघ्ने पुंनपुंसकम्' इति मेदिनी ॥ मृद क्षोदे । मृदङ्गः । 'मृदंगः पटहे घोषे' इति मेदिनी ॥

(गमादेर्गः) गङ्गा । छो छागः । खड्गः ॥

(सुबोधिनी)-गमादेर्गः ॥ गप्रत्ययमाह-गम्लृ गतौ । गङ्गा ॥ छो छेदने । छागः । खड भेदने । खड्गः । 'खड्गो गण्डकशृङ्गे स्यान्निस्त्रिंशे गण्डकेऽपि च' इति शब्दतरङ्गिणी । 'खड्गो गण्डकशृङ्गासिबुद्धभेदेषु गण्डके' इति मेदिनी ॥

(भृङ्गादयः) भृञ भृङ्गः । शृङ्गम् । शार्ङ्गः। पूग । मोदतेः मुद्गः ।

(सुबोधिनी)-भृङ्गादयः ॥ गकप्रत्ययान्ता निपात्यन्ते-डुभृञ धारणपोषणयोः । प्रत्ययस्य नुट् निपातनात् । भृंगः । 'भृङ्गाः पिङ्गालिधूम्याटाः' इति विश्वः ॥ 'भृङ्गो धूम्याटषिङ्गयोः । मधुव्रते भृङ्गराजे पुंसि भृङ्गं गुडत्वचि' इति मेदिनी ॥ शॄ हिंसायाम् । शृणातेर्ह्रस्वः प्रत्ययस्य नुडागमश्च निपात्यते । शृङ्गम् "शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके । विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कूर्चशीर्षके । स्त्रीविषायां स्वर्णमीनभेदयोर्ऋषभौषधौ' इति मेदिनी ॥ "शृङ्गं विषाणमाख्यातं शैलाग्रे जलयन्त्रके । मीनौषधिसुवर्णानां भेदे शृङ्गी प्रयुज्यते"। इत्युत्पलिनीकोशे शृणातेः शकुनौ वाच्ये गण् प्रत्ययः तस्य नुट् च निपात्यते । णित्वाद्वृद्धिः । शार्ङ्गः पक्षी । शार्ङ्गं धनुरिति तु शृङ्गस्य विकार इत्यर्थेऽण्प्रत्यये बोध्यम् ॥ पूङ् पवने । पूयते मुखमनेनेति पूगः । 'पूगस्तु क्रमुके वृन्दे' इति मेदिनी ॥ मुद हर्षे । मुद्गः शस्यभेदः ॥

(शरदादयोऽदिप्रत्ययान्ता निपात्याः) शॄ शरत् । दृणातेः दरत् । दृषत् । त्यजेः त्यत् । तनेः तत् । यजेः यत् । इण् एतत् ॥

(सुबोधिनी)-शरदादयोऽदिप्रत्ययान्ता निपात्याः॥ शॄ हिंसायाम् । अदिप्रत्ययः । इकार उच्चारणार्थः । शरत् ।'शरत्स्त्री वत्सरेऽप्यृतौ'इति मेदिनी ॥ दॄ विदारणे । दरत् । 'दरत्स्त्रियां प्रपाते च भयपर्वतयोरपि' इति मेदिनी ॥ दृणातेः पुक् ह्रस्वगुणाभावश्च निपात्यते । दृषत् । 'दृषान्निष्पेषणशिलापट्टप्रस्तरयोः स्त्रियाम्' इति मेदनी ॥ त्यज हानौ ॥ निपातनाट्टिलोपः । त्यद् ॥ तनु विस्तारे । निपातनाट्टिलोपः । तद् ॥ यज देवपूजादौ । टिलोपो निपातनात् । यद् ॥ इण् गतौ । अस्य गुणे कृते तुगागमो निपात्यते । एतद् ॥

(तत्त्वदी०)-शरदादय इति ॥ शरद्धृदयकृलयोः ॥

(भियोऽजिः षुक् ह्रस्वश्च) भिषक् ॥

(सुबोधिनी)--भियोऽजिः षुक् ह्रस्वश्च ॥ ञिभी भये अस्मादजिप्रत्ययः स्यात् ॥ अजिप्रत्ययमाह-इकार उच्चारणार्थः । अजिप्रत्यये भियो ह्रस्वः षुगागमश्च स्यात् ॥ ह्रस्वविधानसामर्थ्यान्न गुणः। भिषक् ।'भिषग्वैद्यौ चिकित्सके' इत्यमरः ॥

(युष्यसिभ्यां मदिक्) युष सौत्रः । युष्मद् । अस्मद् ॥

(सुबोधिनी)-युष्यसिभ्यां मदिक् ॥ मदिक्प्रत्ययमाह-किर्त्त्वाद्गुणो न। इकार उच्चारणार्थः । युष सौत्रो धातुः । युष्मद् । असु क्षेपणे । त्वम् । अहम् ॥

(स्त्वादेर्मः) स्तोमः । सोमः । होमः । धर्मः । क्षेमम् । भामः । वामः । यामः । पद्मम् । नयतीति नेमः ॥

(सुबोधिनी)-स्त्वादेर्मः ॥ मप्रत्ययमाह-ष्टुञ् स्तुतौ । स्तोमः संघातः।' षुञ् अभिषवे । "सोमस्तुहिनदीधितौ॥वानरे च कुबेरे च पितृदेवे समीरणे। वसुप्रभेदे कर्पूरे नीरे सोमलतौषधौ" इति मेदिनी ॥ हु दानादनयोः । होमः। देवतोद्देशेन हविःप्रक्षेपो होमः॥धृञ् धारणे।धर्मः।"धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयोःक्रतौ । अहिंसोपनिषन्न्याये ना धनुर्यमसोमपे" इति मेदिनी ॥ 'धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ' इति विश्वः ॥ क्षि क्षये । क्षेमम् ॥ भा दीप्तौ भामः । 'भामः क्रोधे रुचौ दीप्तौ'। इति विश्व आदित्यश्च । या प्रापणे । यामः । 'यामस्तु पुंसि प्रहरे संयमेऽपि प्रकीर्तितः' इति मेदिनी ॥ वा गतिगन्धनयोः । वामः । "वामं धने पुंसि हरे कामदेवे पयोधरे । वल्गुप्रतीपसव्येषु त्रिषुनार्यांस्त्रियामथ।वामी शृगाली वडवारासभीकलभीषु च"इति मेदिनी॥पद् गतौ । पद्मम् ।'पद्मोऽस्त्री पद्मके व्यूहनिधिसंख्यान्तरेऽम्बुजे । ना नागे' इति मेदिनी ॥ णीञ् प्रापणे । नेमः । 'नेमः कालेऽवधौ गर्त्ते प्राकारे कैतवेऽपि च' इति मेदिनी ॥ 'नेमस्त्वर्द्धे प्राकारगर्त्तयोरवधौ केतवेऽपि च' इति हैमः ॥

(जिह्मादयो निपात्यन्ते) जिह्मः । ग्रसु ग्लसु अदने ग्रामः । सिमः । शुष्मम् । श्यैङ् श्यामः । धूमः । युग्मम् । रुक्मम् । तिग्मम् । हिमम् । भीमः । भीष्मः । घृ क्षरणे दीप्तौ च । जिघर्त्यनेन धर्मः । ग्रसे ग्रीष्मः ॥

(सुबोधिनी)-जिह्मादयो निपात्यन्ते ॥ ओहाक् त्यागे अस्मात् मनप्रत्ययः सन्वत्प्रयत्नवदिति आतो लोपश्च निपातनात् । तेन द्वित्वादिः। षः से इति पूर्वरूपम् । जिह्मः । 'जिह्मः कुटिलमन्दयोः' इत्यमरः 'जिह्मस्तु कुटिले मन्दे क्लीबे तगरपादपे' इति मेदिनी॥ग्रसु अदने । ग्रसेष्टगत्वं निपात्यते । ग्रामः । 'ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वके' इति विश्वः॥शब्दादिपूर्वको ग्रामो वृन्दे । शब्दग्रामः गुणग्राम इति यथा । 'शब्दादिपूर्वो वृन्देऽपि ग्रामः' इत्यमरः ॥ 'संग्रामः संयुगे स्मृतः' इति विश्वः।

षिञ् बन्धने। निपातनान्मकप्रत्ययान्तो वक्ष्यमाणो ज्ञेयः।सिमः सर्वादिगणे पठितः॥ शुष् शोषणे । शुष्मम् ।'शुष्मममग्निसमीरयोः' इति विश्वः ॥ 'शुष्मं तेजसि वायौ ना' इति मेदिनी ॥ श्यैङ् गतौ । श्यामः । 'त्रिपु श्यामौ हरित्कृष्णौ श्यामा स्याच्छारिका-निशा' इत्यमरः ॥ "श्यामो वटे प्रयागस्य वारिदे वृद्धदारके। पिके च कृष्ण-हरितोः पुंसि स्यात्तद्वति त्रिपु॥मरिचे सिन्धुलवणे क्लीबं स्त्री शारिवौषधौ ।अप्रसूतां-गनायां च प्रियंगावपि गुग्गुलौ ॥ यमुनायां त्रियामायां कृष्णात्रिवृति कौषधौ।नीलि-कायाम्''इति मेदिनी ॥ धूञ् कम्पने । धूमः ॥ युजिर् योगे । निपातनाज्जस्य गः । युग्मम् ॥ रुच दीप्तौ । निपातनाच्चस्य कः । रुक्मम् । 'रुक्मं तु काञ्चने लोहे' इति विश्वः ॥ तिज निशाने। निपातनाज्जस्य गः।ति । 'तिग्मं तीक्ष्णं खरं तद्वत्' इत्य-मरः ॥ हन हिंसागत्योः । हन्तेर्हिरादेशो निपातनात् । हिमम् ।'हिमं तुषारमलयोद्भव-योः स्यान्नपुंसकम् ।शीतले वाच्यलिङ्गः'इति मेदिनी ॥ ञिभी भये । भियः षुगागमो वा निपात्यते ।बिभेत्यस्मादिति भीमः । भीष्मः।'भीष्मो गांगेयघोरयोः' इति विश्वः॥ 'भीमोऽम्लवेतसे घोरे शंभौ मध्यमपाण्डवे' इति मेदिनी॥घृ क्षरणदीप्त्योः।निपातना-द्गुणः । घर्मः । 'घर्मः स्यादातपे ग्रीष्मेऽप्युष्णस्वेदाम्भसोरपि' इति मेदिनी ॥ ग्रस अदने । अस्य निपातनात् ग्रीषादेशः । ग्रीष्मः।'ग्रीष्म उष्णर्तुभेदयोः'इति मेदिनी॥

(प्रथेः षिवः संप्रसारणं) पृथिवी ॥

(सुबोधिनी)--प्रथेः षिवः संप्रसारणं च ।। षिवप्रत्ययमाह–षित्त्वादीप् ॥ षवप्रत्यय इत्येके । प्रथ प्रख्याने । पृथिवी ।'पृथिवी पृथवी पृथ्वी धरा सर्वसहा रसा' इति शब्दार्णवः ॥

(तत्त्वदी०)–प्रथेः षिव इति ॥ षव इत्येके । पृथिवी पृथवी पृथ्वी ॥

(अशादेः क्वः) अश्वः । खट काङ्क्षायाम् खट्वा । विश्वम । सर्वा-दिरयम् ॥

(सुबोधिनी)–अशादेः क्वः ॥ कित्वान्न गुणः ०–अशूङ् व्याप्तौ। अश्वः। 'अश्वः पुंजातिभेदे च तुरंगे च पुमानयम्' ॥'अश्वः पुंभेदवाजि-नोः' इति विश्वः॥ खट काङ्क्षायाम् । ।ति खट्वा ॥ विश प्रवेशने । विश्वः।"विश्वा प्रविशि- पुंसि देवप्रभेदेष्वखिले त्रिषु'' इति

(स्रादेर्वः) स्रुतमनेन

(सुबोधिनी)–स्रादेर्वः ॥ म

ग्र निगरणे । गर्वः अहंकारः । स्रु ।

(ग्रीवादयो वप्रत्ययान्ता निपात्यन्ते) ग्रीवा। लिहन्त्यनयेति जिह्वा॥

(सुबोधिनी)–ग्रीवादयो वप्रत्ययान्ता निपात्यन्ते॥ गॄ निगरणे। ईडागमो गुणाभावश्च निपातनात्। गिरन्त्यनयेति ग्रीवा॥ लिह आस्वादने। लस्य जो गुणाभावश्च निपातनात्। लिहन्त्यनयेति जिह्वा॥

(तत्त्वदी०)–ग्रीवादय इति॥ [illegible]॥

(श्वादेः कन्) युवा। वृषा। तक्ष्णोति काष्ठानि तक्षा। राजा। धवि गतौ। धन्वयाति शरानिति धन्वा। प्रतिदिवा॥

(सुबोधिनी)–श्वादेः कन्॥ [illegible] कित्त्वान्न गुणः। यु मिश्रणे। यौतीति युवा [illegible]। नाम्नो नो लोपशिति नलोपः। युवा। 'युवा [illegible]' इति मेदिनी॥ वृषु सेचने। वृषा। 'वृषा कर्णे महेन्द्रे ना' इति मेदिनी॥ तक्षू तनूकरणे। तक्षा। 'तक्षा तु वर्धकि-स्त्वष्टा रथकारश्च काष्ठतट्' इत्यमरः॥ राजृ दीप्तौ। राजा। 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः' इत्यमरः॥ [illegible]। 'धन्वा [illegible]' इत्यमरः॥ 'अथास्त्रियाम्। धनुश्चापौ [illegible]' इत्यमरः॥ 'धन्वा तु मरु-देशे ना [illegible]' इति मेदिनी॥ दिवु क्रीडादौ। प्रतिदीव्यन्त्यस्मि-न्निति प्रतिदिवा दिवसः॥

(सप्यशूभ्यां तुट् च) षप समवाये। सप्त। अष्ट॥

(सुबोधिनी)–सप्यशूभ्यां तुट् च॥ [illegible] कनिन् प्रत्ययः स्यात् तुडाग-मश्च॥ षप समवाये। [illegible] तुट्। [illegible] नलोपः। सप्त॥ अशूङ् व्याप्तौ। [illegible] अष्ट।

(नञि जहातेः) अह॥

(सुबोधिनी)–नञि जहातेः॥ [illegible] कनिन् प्रत्ययः स्यात्॥ [illegible]। अहः।

([illegible]) श्वा। [illegible]

[illegible]

(सुबोधिनी) [illegible]

षिञ् बन्धने । निपातनान्मकप्रत्ययान्तो वक्ष्यमाणो ज्ञेयः।सिमः सर्वादिगणे पठितः॥ शुष् शोषणे । शुष्मम् ।'शुष्ममग्निसमीरयोः' इति विश्वः ॥ 'शुष्मं तेजसि वायौ ना' इति मेदिनी ॥ श्यैङ् गतौ । श्यामः । 'त्रिषु श्यामौ हरितकृष्णौ श्यामा स्याच्छा-रिका-निशा' इत्यमरः ॥ "श्यामो वटे प्रयागस्य वारिदे वृद्धदारके । पिके च कृष्ण-हरितोः पुंसि स्यात्तद्वति त्रिषु॥मरिचे सिन्धुलवणे क्लीबं स्त्री शारिवौषधौ ।अप्रसूतां-गनायां च प्रियंगावपि गुग्गुलौ ॥ यमुनायां त्रियामायां कृष्णात्रिवृति कौषधौ।नीलि-कायाम्"इति मेदिनी ॥ धूञ् कम्पने । धूमः ॥ युजिर् योगे । निपातनाज्जस्य गः । युग्मम् ॥ रुच दीप्तौ । निपातनाच्चस्य कः । रुक्मम् । 'रुक्मं तु काञ्चने लोहे' इति विश्वः ॥ तिज निशाने । निपातनाज्जस्य गः।ति । 'तिग्मं तीक्ष्णं खरं तद्वत्' इत्य-मरः ॥ हन हिंसागत्योः । हन्तेर्हिरादेशो निपातनात् । हिमम् ।'हिमं तुषारमलयोद्भव-योः स्यान्नपुंसकम् ।शीतले वाच्यलिङ्गः'इति मेदिनी ॥ ञिभी भये । भियः षुगागमो वा निपात्यते ।बिभेत्यस्मादिति भीमः । भीष्मः।'भीष्मो गांगेयघोरयोः' इति विश्वः॥ 'भीमोऽम्लवेतसे घोरे शंभौ मध्यमपाण्डवे' इति मेदिनी॥घृ क्षरणदीप्त्योः।निपातना-द्गुणः । घर्मः । 'घर्मः स्यादातपे ग्रीष्मेऽप्युष्णस्वेदाम्भसोरपि' इति मेदिनी ॥ ग्रस अदने । ग्रस निपातनात् ग्रीषादेशः । ग्रीष्मः।'ग्रीष्म उष्णर्तुभेदयोः'इति मेदिनी॥

(प्रथेः षिवः संप्रसारणं) पृथिवी ॥

(सुबोधिनी)--प्रथेः षिवः संप्रसारणं च ।। षिवप्रत्ययमाह-षित्त्वादीष् ॥ षवप्रत्यय इत्येके । प्रथ प्रख्याने । पृथिवी ।'पृथिवी पृथवी पृथ्वी धरा सर्वसहा रसा' इति शब्दार्णवः ॥

(तत्त्वदी०)-प्रथेः षिव इति ॥ षव इत्येके । पृथिवी पृथवी पृथ्वी ॥

(अशादेः क्वः) अश्वः । खट काङ्क्षायाम् खट्वा । विश्वम् । सर्वा-दिरयम् ॥

(सुबोधिनी)-अशादेः क्वः ॥ कित्वान्न गुणः । क्वप्रत्ययमाह-अशूङ् व्याप्तौ। अश्वः। 'अश्वः पुंजातिभेदे च तुरंगे च पुमानयम्' इति मेदिनी ॥'अश्वःपुंभेदवाजि-नोः' इति विश्वः॥ खट काङ्क्षायाम् ॥ खट्यते शयनार्थिभिः काङ्क्ष्यते इति खट्वा ॥ विश प्रवेशने । विश्वः।"विश्वा प्रतिविषायां स्त्री जगति स्यान्नपुंसकम् । न ना शुण्ठ्यां पुंसि देवप्रभेदेऽप्यखिले त्रिषु" इति मेदिनी ॥

(न्रादेर्वः)मृनमनन विष्वमिति सर्वः । गर्वः । शर्वः ॥

(सुबोधिनी)-न्रादेर्वः ।। वप्रत्ययमाह-सृ गतौ । सृतमनेन विश्वमिति सर्वः । गृ निगरणे । गर्वः अहंकारः । शृ हिंसायाम् । शर्वो रुद्रः ॥

(सर्तेर्णित्) सार्थः ॥

(सुबोधिनी)–सर्तेर्णित् ॥ थण्प्रत्ययमाह–णित्त्वाद्वृद्धिः । सृ गतौ सार्थः । 'सार्थो वणिक्समूहे स्यादपि संघातमात्रके' इति मेदिनी ॥

(निशीथादयः) निशीथः । तीर्थः । रिचिर् विरेचने रिक्थम् । षिचिर् क्षरणे सिक्थम् । पृषु सेचने पृष्ठम् । गूथम् । यु मिश्रणे । यूथम् । प्रोथः ॥

(सुबोधिनी)–निशीथादयः॥थक्प्रत्ययान्ता निपात्यन्ते–शीङ् स्वप्ने।निशीथः। 'निशीथस्तु पुमानर्धरात्रे स्याद्रात्रिमात्रके' इति मेदिनी ॥ तॄ प्लवनतरणयोः । ऋत इतीर् । 'र्वोर्वि हले' इति दीर्घः । तीर्थम् । "तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु । अवतारर्षिजुष्टाम्भःस्त्रीरजःसु च विश्रुतम्" इति विश्वः॥ रिचिर् विरेचने । चोः कुरिति कः । रिक्थम् । 'रिक्थमृक्थं धनं वसु' इत्यमरः ॥ षिचिर् क्षरणे । सिक्थम् । 'सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकम्' इति मेदिनी ॥ पृषु सेचने । पृष्ठम् । 'पृष्ठं तु चरमं तनोः' इत्यमरः ॥ 'पृष्ठं चरममात्रेऽपि देहस्यावयवान्तरे'इति मेदिनी ॥ स्तोत्रविशेषेऽपि पृष्ठम्। पृष्ठैः स्तुवत इत्यादौ तथा निर्णयात् ॥गु पुरीषोत्सर्गे निपातनाद्दीर्घः । गूथं विष्ठा ॥ यु मिश्रणे । निपातनाद्दीर्घः । यूथम् । 'यूथं तिर्यक्समूहेऽपि वृन्दमात्रेऽपि भाषितम्' इति विश्वः॥ यूथं तदग्रसरगर्वितकृष्णसारम्' इति रघुवंशे ॥ प्रुङ् गतौ । निपातनाद्गुणः । प्रोथः । 'प्रोथोऽस्त्री हयघोणायां ना कट्यामध्वगे त्रिषु' इति मेदिनी । 'प्रोथमस्त्री तुरंगास्ये प्रोथः प्रस्थित उच्यते'॥

(तत्त्वदी०)–**निशीथादय** इति॥रात्रावर्धरात्रे च निशीथः॥**तीर्थ**मिति ॥"तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु ।अवतारर्षिजुष्टाम्भःस्त्रीरजस्सु च विश्रुतम्" इति विश्व॥**रिक्थ**मिति॥'रिक्थमृक्थं धनं वसु'॥गूथ विष्ठा॥यूथ समूह ॥'प्रोथमस्त्री तुरगास्ये प्रोथः प्रस्थित उच्यते'॥

(स्फायादे रक्) स्फारम् । तञ्चु संकोचने तक्रम् । वञ्चु वक्रः । शक्रः । क्षिप्रम् । क्षुद्रः । चक्रम् । चदि चन्द्रः । टन्दी टन्द्रः । श्विता । श्वित्रम् । वृत्रः । वीरः । नीरम् । छिद्रम् । उस्रा । शुभ्रम् ॥

(सुबोधिनी)–स्फायादे रक् ॥ रक्प्रत्ययमाह–कित्त्वाद्गुणो न । स्फायी वृद्धौ । इवत्त्योरितीण्न ।'यस्योर्वसे' इति यलोपः । स्फारः । 'स्फारः स्यात्पुंसि विकटे करकादेश्च बुद्बुदे' इति मेदिनी॥तञ्चु संकोचने । न्यङ्क्वादित्वात्कुत्वम् ।नो लोप इति नलोपः । तक्रम् । 'तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम्' इत्यमरः ॥ वञ्चु प्रलम्भने । वक्रः । 'वक्रः स्यात्कुटिले क्रूरे पुम्भेदे शनैश्चरे' इति विश्वः ॥ शक्लृ शक्तौ । शक्रः । 'शक्रः पुमान्देवराजे कुटजार्जुनभूरुहोः'इति मेदिनी॥क्षिप प्रेरणे।क्षिप्रम् ॥ क्षुदिर् संपेषणे । क्षुद्रः'क्षुद्रःस्यादधमक्रूरकृपणाल्पेषु वाच्यवत्' इति मेदिनी ॥

पूष वृद्धौ । इनामिति दीर्घः।पूषा, पूषणौ, पूषणः ॥ प्लिह गतौ । इकारस्य दीर्घत्वं निपात्यते । प्लीहा कुक्षिव्याधिः ॥ मुह वैचित्ये । मुहेरुपधाया दीर्घः । धोऽन्तादेशो रमागमश्च निपातनात् । मूर्वा । 'मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः॥मुर्वी बन्धने। अस्योकारस्य दीर्घत्वं वस्य धश्च निपात्यते इत्युज्ज्वलदत्तः । मूर्द्धा ॥ टुमस्जो शुद्धौ। मस्जेश्चुत्वेन सस्य शः झवे जवा इति सस्य जः। मज्जा । नकारान्तोऽयम्।आवन्तोऽप्यभ्युपगम्यते । 'ऊष्मया सार्द्धमूष्मापि मज्जोक्तौ मज्जया सह' इति द्विरूपकोशः॥ माङ् माने । इनामिति दीर्घः । 'अर्यमा तु पुमान्सूर्ये पितृदेवान्तरेऽपि च' इति मेदिनी ॥ टुओश्विइर् गतिवृद्धयोः । धातोरिकारलोपः संप्रसारणाभावः सप्तम्या अलुक् च निपात्यते । मातरीत्यव्ययमन्तरिक्षवाचि तस्मिन् श्वयतीति मातरिश्वा । 'मातरिश्वा सदागतिः' इत्यमरः॥अथ च श्वादेरिति सूत्रेण वस्योत्वं न भवति अभिव्यक्ते पदार्थपरत्वेन कुक्कुरवाचकस्यैव श्वशब्दस्य तदन्तस्य च ग्रहणात्। तेन मातरिश्वनः मातरिश्वनेत्यादि ॥ मह पूजायाम् । धातोर्हस्य घः अनुगागमश्च निपात्यते । मघवा इन्द्रः ॥ ॥ इत्युणादौ प्रथमः पादः ॥

(कृहृभ्योरेणुः) करेणुः । हरेणुः ॥

(सुबोधिनी)--कृहृभ्योरेणुः ॥ एणुप्रत्ययमाह--डुकृञ् करणे । करेणुः । 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः॥ 'करेणुर्गजयोषायां स्त्रियां पुंसि मतंगजे'इति मेदिनी ॥ हृञ् हरणे । हरेणुः । 'हरेणुर्ना सतीने स्त्री रेणुकाकुलयोषयोः' इति मेदिनी।॥ हरेणुर्गन्धद्रव्यं कलायश्चेति बोध्यम् । 'कलायस्तु सतीनकः' इत्यमरः ॥

(कुषादेः क्थः) कुष्ठम् । रथः । काशृ दीप्तौ काष्ठम् । अवभृथः ॥

(सुबोधिनी)--कुषादेः क्थः ॥ क्थप्रत्ययमाह--कित्त्वान्न गुणः । कुष निष्कर्षे कुष्ठम् । 'कुष्ठं रोगे पुष्करेऽस्त्री' इति मेदिनी ।।'कुष्ठं रोगे सुगन्धे च' इति विश्वः॥ रमु क्रीडायाम् । लोपस्त्वनुदात्ततनामिति मलोपः । रथः । 'रथः पुमानवयवे स्यन्दने वेतसेऽपि च' इति मेदिनी ॥ 'रथः स्यात्स्यन्दने काये चरणे वेतसेऽपि च' इति विश्वः ॥ काशृ दीप्तौ । छशषेति षत्वं ष्टुत्वम् । "काष्ठा दारुदारिद्रायां कालमानप्रकर्षयोः । स्थानमात्रे दिशि च स्त्री दारुणि स्यान्नपुंसकम्" इति मेदिनी ॥ 'काष्ठं दार्विन्धनं त्वेधः' इत्यमरः ॥ डुभृञ् धारणादौ । अवभृथो यज्ञस्नानम् ॥

(उपादेस्थः) ओष्ठः । कोष्ठः । गाथा । अर्थः । शु गतौ शोथः ॥

(सुबोधिनी)--उपादेस्थः॥ थप्रत्ययमाह--उष दाहे । ओष्ठः ॥ कुष निष्कर्षे। कोष्ठः'कोष्ठः कुक्षिकुसूलयोः'॥गै शब्दे । गाथा । 'गाथा श्लोके संस्कृतान्यभाषायां शेषवृत्तयोः' इति मेदिनी ॥ ऋ गतौ । अर्थः 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरः ॥ शु गतौ । शोथः ' शोफस्तु श्वयथुः शोथः' इत्यमरः ॥

(सर्तेर्णित्) सार्थः ॥

(सुबोधिनी)–सर्तेर्णित् ॥ थण्प्रत्ययमाह–णित्त्वाद्वृद्धिः । सृ गतौ सार्थः । 'सार्थो वणिक्समूहे स्यादपि संघातमात्रके' इति मेदिनी ॥

(निशीथादयः) निशीथः । तीर्थः । रिचिर् विरेचने रिक्थम् । षिचिर् क्षरणे सिक्थम् । पृषु सेचने पृष्ठम् । गूथम् । यु मिश्रणे । यूथम् । प्रोथः ॥

(सुबोधिनी)–निशीथादयः॥थक्प्रत्ययान्ता निपात्यन्ते–शीङ् स्वप्ने।निशीथः। 'निशीथस्तु पुमानर्धरात्रे स्याद्रात्रिमात्रके' इति मेदिनी ॥ तॄ प्लवनतरणयोः । ऋत इत्वीर् । 'र्वो र्वि हसे' इति दीर्घः । तीर्थम् । "तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु । अवतारर्षिजुष्टाम्भःस्त्रीरजःसु च विश्रुतम्" इति विश्वः॥ रिचिर् विरेचने । चोः कुरिति कः । रिक्थम् । 'रिक्थमृक्थं धनं वसु' इत्यमरः ॥ षिचिर् क्षरणे । सिक्थम् । 'सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकम्' इति मेदिनी ॥ पृष सेचने । पृष्ठम् । 'पृष्ठं तु चरमं तनोः' इत्यमरः ॥ 'पृष्ठं चरममात्रेऽपि देहस्यावयवान्तरे' इति मेदिनी ॥ स्तोत्रविशेषेऽपि पृष्ठम्। पृष्ठैः स्तूयत इत्यादौ तथा निर्णयात् ॥गु पुरीषोत्सर्गे निपातनाद्दीर्घः । गूथं विष्ठा ॥ यु मिश्रणे । निपातनाद्दीर्घः । यूथम् । 'यूथं तिर्यक्समूहेऽपि वृन्दमात्रेऽपि भाषितम्' इति विश्वः॥ यूथं तदग्रसरगर्वितकृष्णसारम्' इति रघुवंशे ॥ प्रुङ् गतौ । निपातनाद्गुणः । प्रोथः । 'प्रोथोऽस्त्री हयघोणायां ना कट्यामध्वगे त्रिषु' इति मेदिनी । 'प्रोथमस्त्री तुरंगास्ये प्रोथः प्रस्थित उच्यते'॥

(तत्त्वदी०)–निशीथादय इति॥रात्रावर्धरात्रे च निशीथः॥तीर्थमिति ॥"तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु ।अवतारर्षिजुष्टाम्भःस्त्रीरजस्सु च विश्रुतम्" इति विश्वः ॥रिक्थमिति॥'रिक्थमृक्थं धनं वसु'॥गूथं विष्ठा॥यूथं समूहः॥'प्रोथमस्त्री तुरगास्ये प्रोथः प्रस्थित उच्यते'॥

(स्फायादेः रक्) स्फारम् । तञ्चु संकोचने तक्रम् । वञ्चु वक्रः । शक्रः । क्षिप्रम् । क्षुद्रः । चक्रम् । चदि चन्द्रः । उन्दी उन्द्रः । श्विता । श्वित्रम् । वृत्रः । वीरः । नीरम् । छिद्रम् । इरा । शुभ्रम् ॥

(सुबोधिनी)–स्फायादेः रक् ॥ रक्प्रत्ययमाह–कित्त्वाद्गुणो न । स्फायी वृद्धौ । इवत्त्योरितीण ।'यस्योर्वसे' इति यलोपः । स्फारः । 'स्फारः स्यात्पुंसि विकटे करकादेश्च बुद्बुदे' इति मेदिनी॥तञ्चु संकोचने । न्यङ्क्वादित्वात्कुत्वम् ।नो लोप इति नलोपः । तक्रम् । 'तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम्' इत्यमरः ॥ वञ्चु प्रलम्भने । वक्रः । 'वक्रः स्यात्कुटिले क्रूरे पुटभेदे शनैश्चरे' इति विश्वः ॥ शक्लृ शक्तौ । शक्रः । 'शक्रःपुमान्देवराजे कुटजार्जुनभूरुहोः'इति मेदिनी॥क्षिप प्रेरणे।क्षिप्रम् ॥ क्षुदिर् संपेषणे । क्षुद्रः'क्षुद्रःस्यादधमक्रूरकृपणाल्पेषु वाच्यवत्' इति मेदिनी ॥

पूष वृद्धौ । इनामिति दीर्घः। पूषा, पूषणौ, पूषणः ॥ प्लिह गतौ । इकारस्य दीर्घत्वं निपात्यते । प्लीहा कुक्षिव्याधिः ॥ मुह वैचित्त्ये । मुहेरुपधाया दीर्घः । धोऽन्तादेशो रमागमश्च निपातनात् । मूर्धा । 'मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः॥ मुर्वी वन्धने। अस्योकारस्य दीर्घत्वं वस्य धश्च निपात्यते इत्युज्ज्वलदत्तः । मूर्द्धा ॥ टुमस्जो शुद्धौ। मस्जेश्चुत्वेन सस्य शः झवे जवा इति सस्य जः। मज्जा । नकारान्तोऽयम्। आवन्तोऽप्यभ्युपगम्यते । 'ऊष्मया सार्द्धमूष्मापि मज्जोक्तौ मज्जया सह' इति द्विरूपकोशः॥ माङ् माने । इनामिति दीर्घः । 'अर्यमा तु पुमान्सूर्ये पितृदेवान्तरेऽपि च' इति मेदिनी ॥ टुओश्विइर् गतिवृद्ध्योः । धातोरिकारलोपः संप्रसारणाभावः सप्तम्या अलुक् च निपात्यते । मातरीत्यव्ययमन्तारिक्षवाचि तस्मिन् श्वयतीति मातरिश्वा । 'मातरिश्वा सदागतिः' इत्यमरः॥ अथ च श्वादेरिति सूत्रेण वस्योत्वं न भवति आभिव्यक्ते पदार्थपरत्वेन कुक्कुरवाचकस्यैव श्वशब्दस्य तदन्तस्य च ग्रहणात्। तेन मातरिश्वनः मातरिश्वनेत्यादि ॥ मह पूजायाम् । धातोर्हस्य घः अवुगागमश्च निपात्यते । मघवा इन्द्रः ॥ ॥ इत्युणादौ प्रथमः पादः ॥

(कृहृभ्योरेणुः) करेणुः । हरेणुः ॥

(सुबोधिनी)–कृहृभ्योरेणुः ॥ एणुप्रत्ययमाह–डुकृञ् करणे । करेणुः । 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः॥ 'करेणुर्गजयोषायां स्त्रियां पुंसि मतंगजे' इति मेदिनी ॥ हृञ् हरणे । हरेणुः । 'हरेणुर्ना सतीने स्त्री रेणुकाकुलयोषयोः' इति मेदिनी ॥ हरेणुर्गन्धद्रव्यं कलायश्चेति बोध्यम् । 'कलायस्तु सतीनकः' इत्यमरः ॥

(कुषादेः क्थः) कुष्ठम् । रथः । काशृ दीप्तौ काष्ठम् । अवभृथः ॥

(सुबोधिनी)–कुषादेः क्थः ॥ क्थप्रत्ययमाह–कित्त्वान्न गुणः । कुष निष्कर्षे कुष्ठम् । 'कुष्ठं रोगे पुष्करेऽस्त्री' इति मेदिनी ॥ 'कुष्ठं रोगे सुगन्धे च' इति विश्वः॥ रमु क्रीडायाम् । लोपस्त्वनुदात्ततनामिति मलोपः । रथः । 'रथः पुमानवयवे स्यन्दने वेतसेऽपि च' इति मेदिनी ॥ 'रथः स्यात्स्यन्दने काये चरणे वेतसेऽपि च' इति विश्वः ॥ काशृ दीप्तौ । छशषेति षत्वं ष्टुत्वम् । "काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः । स्थानमात्रे दिशि च स्त्री दारुणि स्यान्नपुंसकम्" इति मेदिनी ॥ 'काष्ठं दार्विन्धनं त्वेधः' इत्यमरः ॥ डुभृञ् धारणादौ । अवभृथो यज्ञस्नानम् ॥

(उपादेस्थः) ओष्ठः । कोष्ठः । गाथा । अर्थः । शु गतौ शोथः ॥

(सुबोधिनी)–उषादेस्थः॥ थप्रत्ययमाह–उष दाहे । ओष्ठः ॥ कुष निष्कर्षे। कोष्ठः 'कोष्ठः कुक्षिकुसूलयोः'॥ गै शब्दे । गाथा । 'गाथा श्लोके संस्कृतान्यभाषायां शेषवृत्तयोः' इति मेदिनी ॥ ऋ गतौ । अर्थः 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरः ॥ शु गतौ । शोथः ' शोफस्तु श्वयथुः शोथः' इत्यमरः ॥

केऽपि सुरा क्वचित्' इति विश्वः ॥ षूङ् प्राणिगर्भविमोचने। सावयति प्रेरयति कर्मणि लोकमिति सूरः । 'सूरसूर्यार्यमादित्यः' इत्यमरः ॥ डुधाञ् धारणादौ । अपिद्याधे· तीत्वम्। धीरः।'धीरो धैर्यान्विते स्वैरे बुधे क्लीबं तु कुङ्कुमे ।स्त्रियां श्रवणतुल्यायाम्' इति मेदिनी । गृधु अभिकाङ्क्षायाम् । गृध्रः।'गृध्रः खगान्तरे पुंसि वाच्यलिङ्गोऽथ लुब्धके' इति मेदिनी ॥

(शूरादयः) शु सौत्रः शूरः। षिञ् सीरः।चिञ् चीरम् ॥

(सुबोधिनी)–शूरादयः ॥ क्रमत्ययान्ता निपात्यन्ते–शु गतौ । निपातनाद्दीर्घः सर्वत्र। शूरः। 'शूरः स्यात्पादपे भटे' इति मेदिनी ॥ 'शूरश्चारुघटे सूर्ये' इति विश्वहेमचन्द्रौ ॥ षिञ् बन्धने। सीरः । 'सीरोऽर्कहलयोः पुंसि' इति मेदिनी ॥ चिञ् चयने । चीरम् । 'चीरो झिल्लयां नपुंसकम् । गोस्तने वस्त्रभेदे च रेखालेखनभेदयोः' इति मेदिनी ॥ 'चीरं तु गोस्तने वस्त्रे चूडायां सीसकेऽपि च । चीरो कृच्छ्राटिकाझिल्लयोः' इति विश्वः ॥

(वाविन्धेः) वीध्रम् । वृधु वर्ध्रम् । वप्रः । इन्द्रः । अगि गतौ ।
अग्रम् । वज्रम् । डुवप् विप्रः । उच समवाये उग्रः । ञिभी भये
भेरी । शुच शोके शुक्रः। शुक्लः । गुङ् गतौ गौरः। इण् इरा। माला ॥

(सुबोधिनी)–वाविन्धेः ॥ ञिइन्धी दीप्तौ विपूर्वादस्मात् क्रन् स्यात्॥नो लोप इति नलोपः । वीध्रम् । 'वीध्रं तु विमलार्थकम्' इत्यमरः ॥ वृधु वृद्धौ । वर्ध्रं चर्म ॥ डुवप् वीजसंताने । वप्रः प्राकारः। 'वप्रः पितरि केदारे वप्रः प्राकाररोधसोः' इति धरणिः ॥ इदि परमैश्वर्ये । इन्द्रः। 'इन्द्रः शचीपतावन्तरात्मन्यादित्ययोगयोः' इति विश्वः ॥ आगि गतौ । नलोपो निपात्यते । अग्रम् । "अग्रं पुरस्तादुपरि परिमाणे पलस्य च । आलम्बने समूहे च प्रान्तरे पुन्नपुंसकम् । आधिके च प्रधाने च प्रथमे चाभिधेयवत्" इति मेदिनी ॥ वज गतौ । वज्रः। 'वज्रोऽस्त्री हीरके पवौ' ॥ डुवप् वीजसन्ताने । उपधाया इत्वं निपातनात् । विप्रः ॥ उच समवाये। चस्य गो निपातनात् । उग्रः। 'उग्रः शूद्रासुते क्षत्राद्रुद्रे पुंसि त्रिषूत्कटे' इति मेदिनी ॥ ञिभी भये। नदादित्वादीप् । 'भेरी स्त्री दुन्दुभिः पुमान्' इत्यमरः ॥ पक्षे रस्य लत्वं निपात्यते। भेलः । 'भेलः प्लवे मणौ पुंसि भीरावज्ञे च वाच्यवत्' इति मेदिनी ॥ शुच शोके। चस्य को निपातनात् । शुक्रः । 'शुक्रः स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान् । रेतोऽक्षिरुग्भिदोः क्लीबम्' इति ॥ पक्षे लत्वं निपात्यते । शुक्लः । 'शुक्लो योगान्तरे सिते । नपुंसकं तु रजते'इति च मेदिनी॥ गुङ् अव्यक्ते शब्दे । वृद्धिर्निपातनात । गौरः । "गौः पीतेऽरुणे श्वेते विशुद्धेऽप्यभिधेयवत् । ना श्वेतसर्षपे चन्द्रे न द्वयोः पद्मकेसरे। गौरी त्वसंजातरजःकन्याशंकरभार्ययोः ॥ रोचने रजनीपिङ्गाप्रियंगुवसुधासु च

चदि आह्लादने इदित इति नलोपाभावः । चन्द्रः । 'हिमांशुश्चन्द्रमाश्चन्द्र' इत्यमरः ॥ पचाद्यच्प्रत्यये चन्द्रोऽपि । 'हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्द्रो हिमद्युतिः' इति शब्दार्णवः ॥ उन्दी क्लेदने । उन्द्रः जलमार्जारः ॥ श्विता वर्णे । श्वित्रं कुष्ठम् ॥ वृतु वर्तने वृत्रः । 'वृत्रो रिपौ ध्वनौ ध्वान्ते शैले चक्रे च दानवे' इति विश्वः ॥ अज गतिक्षेपणयोः । अजेर्वीरिति वीरादेशः । वीरः ॥ णीञ् प्रापणे । नीरम् ॥ छिदिर् द्वैधीकरणे । छिद्रम् ॥ वस निवासे । यजामिति संप्रसारणम् । घसादेः ष इति षत्वे प्राप्ते निषेधमाह । रपरसृपिसृजिस्पृशिस्पृहिसवनादीनां सस्य षत्वं नेति । उस्रः । 'उस्रो वृषे च किरणे उस्रा धेनुपवित्रयोः' इति मेदिनी ॥ 'माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी' इत्यमरः ॥ शुभ दीप्तौ । शुभ्रम् । 'शुभ्रं स्यादभ्रके क्लीवमुद्दीप्तशुक्लयोस्त्रिषु' इति मेदिनी ॥

(तत्त्वदी०)-स्फायादेरिति ॥ उन्द्रो जलचरः । श्वित्रं कुष्ठम् । उस्रो रश्मिः । उस्रा गौः ॥

(अमितम्योर्दीर्घश्च) आम्रः । ताम्रम् ॥

(सुबोधिनी)-अमितम्योर्दीर्घश्च ॥ आभ्यां रक् स्यादुपधाया दीर्घश्च ॥ अम गत्यादौ । आम्रः 'आम्रश्चूतो रसालोऽसौ' इत्यमरः ॥ तमु काङ्क्षायाम् । ताम्रम् ॥

(निद्रादयः) णिदि निद्रा । अर्द आर्द्रम् । शुच् शूद्रः । दुःखेनेयते दूरम् । कृती कृच्छ्रम् । क्रूरः ॥ रोदयतीति रुद्रः । ज्या वयोहानौ । जीरः ॥

(सुबोधिनी)-निद्रादयः ॥ रक्प्रत्ययान्ता निपात्यन्ते-णिदि कुत्सायाम् । नलोपो निपातनात् । निद्रा । 'स्यान्निद्रा शयनं स्वापः' इत्यमरः ॥ अर्द गतौ । अर्देर्दीर्घो निपातनात् । आर्द्रा । 'आर्द्रा नक्षत्रभेदे स्यात्स्त्रियां क्लिन्नेऽभिधेयवत्' इति मेदिनी ॥ शुच शोके । चस्य दो धातोर्दीर्घश्च निपात्यते । शूद्रः ॥ इण् गतौ दुःपूर्वः धातोर्लोपो निपातनात् । रिलोपो दीर्घश्चेति रलोपपूर्वदीर्घौ । दुःखेनेयते प्राप्यते इति दूरम् ॥ कृती छेदने । कृतेःकृच्छ क्रू इत्येतावादेशौ निपातनात् । 'कृच्छ्रमाख्यातमाभीले पापसंतपनादिनोः' इति विश्वः ॥ 'स्यात्कष्टं कृच्छ्रमाभीलम्' इत्यमरः ॥ क्रूरः । 'क्रूरस्तु कठिने घोरे नृशंसे चाभिधेयवत्' इति विश्वः ॥ 'नृशंसो घातुकः क्रूरः पापो धूर्तस्तु वञ्चकः' इत्यमरः ॥ रुदिर् अश्रुविमोचने । ण्यन्तः । 'रोदयतीति' ओरीति णिलोपः । रुद्रः ॥ ज्रु गतौ । ईकारो निपातनात् । जीरः । ज्या वयोहानौ । अस्माद्रक्प्रत्यये ग्रहामिति संप्रसारणे च कृते जीर इत्येके । 'जीरः खड्गे वणिग्द्रव्ये' इति विश्वः ॥ 'जीरस्तु जरणे खड्गे' इति मेदिनी ॥

(स्वादेः क्रः) सुरः । षूङ् प्राणिप्रसवे सूरः । धीरः । गृध्रः ॥

(सुबोधिनी)-स्वादेः क्रः ॥ क्रप्रत्ययमाह-कित्त्वान्न गुणः । षुञ् अभिषवे । सुरः 'सुरा चषकमद्ययोः । पुंल्लिङ्गस्त्रिदिवेशे स्यात्' इति मेदिनी ॥ 'सुरो देवे सुरा मद्ये चष-

केऽपि सुरा क्वचित्' इति विश्वः ॥ षूङ् प्राणिगर्भविमोचने। सावयति प्रेरयति कर्मणि लोकमिति सूरः । 'सूरसूर्यार्यमादित्यः' इत्यमरः ॥ डुधाञ् धारणादौ । अपिद्दाधे· तीत्वम्। धीरः।'धीरो धैर्यान्विते स्वैरे बुधे क्लीबं तु कुङ्कुमे ।स्त्रियां श्रवणतुल्यायाम्' इति मेदिनी । गृधु अभिकाङ्क्षायाम् । गृध्रः।'गृध्रः खगान्तरे पुंसि वाच्यलिङ्गोऽथ लुब्धके' इति मेदिनी ॥

(शूरादयः) शु सौत्रः शूरः। षिञ् सीरः।चिञ् चीरम् ॥

(सुबोधिनी)—शूरादयः ॥ क्रप्रत्ययान्ता निपात्यन्ते—शु गतौ । निपातनाद्दीर्घः सर्वत्र। शूरः। 'शूरः स्यात्पादपे भटे' इति मेदिनी ॥ 'शूरश्चारुघटे सूर्ये' इति विश्वहेमचन्द्रौ ॥ षिञ् बन्धने। सीरः । 'सीरोऽर्कहलयोः पुंसि' इति मेदिनी ॥ चिञ् चयने । चीरम् । 'चीरो झिल्ल्यां नपुंसकम् । गोस्तने वस्त्रभेदे च रेखालेखनभेदयोः' इति मेदिनी ॥ 'चीरं तु गोस्तने वस्त्रे चूडायां सीसकेऽपि च ।चीरो कृच्छ्राटिकाझिल्ल्योः' इति विश्वः ॥

(वाविन्धेः) वीध्रम् । वृधु वर्ध्रम् । वप्रः । इन्द्रः । अगि गतौ । अग्रम् । वज्रम् । डुवप् विप्रः । उच समवाये उग्रः । ञिभी भये भेरी । शुच शोके शुक्रः। शुक्लः । गुङ् गतौ गौरः।इण् इरा। माला ॥

(सुबोधिनी)—वाविन्धेः ॥ ञिइन्धी दीप्तौ विपूर्वादस्मात् क्रन् स्यात्॥नो लोप इति नलोपः । वीध्रम् । 'वीध्रं तु विमलार्थकम्' इत्यमरः ॥ वृधु वृद्धौ । वर्ध्रं चर्म ॥ डुवप् बीजसंताने । वप्रः प्राकारः। 'वप्रः पितरि केदारे वप्रः प्राकाररोधसोः' इति धरणिः ॥ इदि परमैश्वर्ये । इन्द्रः। 'इन्द्रः शचीपतावन्तरात्मन्यादित्ययोगयोः' इति विश्वः ॥ अगि गतौ । नलोपो निपात्यते । अग्रम् । "अग्रं पुरस्तादुपरि परिमाणे पलस्य च । आलम्बने समूहे च प्रान्तरे पुन्नपुंसकम् । आधिके च प्रधाने च प्रथमे चाभिधेयवत्" इति मेदिनी ॥ वज गतौ । वज्रः। 'वज्रोऽस्त्री हीरके पवौ' ॥ डुवप् बीजसन्ताने । उपधाया इत्वं निपातनात् । विप्रः ॥ उच समवाये । चस्य गो निपातनात् । उग्रः। 'उग्रः शूद्रासुते क्षत्रात्रुद्रे पुंसि त्रिषूत्कटे' इति मेदिनी ॥ ञिभी भये । नदादित्वादीप् । 'भेरी स्त्री दुन्दुभिः पुमान्' इत्यमरः ॥ पक्षे रस्य लत्वं निपात्यते । भेलः । 'भेलः प्लवे मणौ पुंसि भीरावज्ञे च वाच्यवत्' इति मेदिनी ॥ शुच शोके । चस्य को निपातनात् । शुक्रः । 'शुक्रः स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान् । रेतोऽक्षिरुग्भिदोः क्लीबम्' इति ॥ पक्षे लत्वं निपात्यते । शुक्लः । 'शुक्लो योगान्तरे सिते । नपुंसकं तु रजते'इति च मेदिनी॥ गुङ् अव्यक्ते शब्दे । वृद्धिर्निपातनात् । गौरः । "गौः पीतेऽरुणे श्वेते विशुद्धेऽप्यभिधेयवत् । ना श्वेतसर्षपे चन्द्रे न द्वयोः पद्मकेसरे । गौरी त्वसंजातरजःकन्याशंकरभार्ययोः ॥ रोचने रजनीपिङ्गाप्रियंगुवसुधासु च

चदि आह्लादने इदित इति नलोपाभावः । चन्द्रः । 'हिमांशुश्चन्द्रमाश्चन्द्र' इत्यमरः ॥ पचाद्यप्रत्यये चन्द्रोऽपि । 'हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्द्रो हिमद्युतिः' इति शब्दार्णवः ॥ उन्दी क्लेदने । उन्द्रः जलमार्जारः ॥ श्विता वर्णे । श्वित्रं कुष्ठम् ॥ वृतु वर्तने वृत्रः ।'वृत्रो रिपौ ध्वनौ ध्वान्ते शैले चक्रे च दानवे' इति विश्वः ॥ अज गतिक्षेपणयोः । अजेर्वीरिति वीरादेशः। वीरः ॥णीञ् प्रापणे । नीरम् ॥छिदिर् द्वैधीकरणे । छिद्रम् ॥ वस निवासे।यजामिति संप्रसारणम् । घसादेः ष इति षत्वे प्राप्ते निषेधमाह । रपरसृपिसृजिस्पृशिस्पृहिसवनादीनां सस्य षत्वं नेति।उस्रः।'उस्रो वृषे च किरणे उस्रा धेनुपवित्रयो.' इति मेदिनी ॥ 'माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी' इत्यमरः॥ शुभ दीप्तौ। शुभ्रम् । 'शुभ्रं स्यादभ्रके क्लीवमुद्दीप्तशुक्लयोस्त्रिषु' इति मेदिनी ॥

(तत्त्वदी०)-स्फायादेरिति॥उन्द्रो जलचरः।श्वित्र कुष्टम् । उस्रो रश्मिः। उस्रा गौः॥

(अमितम्योर्दीर्घश्च) आम्रः । ताम्रम् ॥

(सुबोधिनी)-अमितम्योर्दीर्घश्च ॥ आभ्यां रक् स्यादुपधाया दीर्घश्च ॥ अम गत्यादौ । आम्रः 'आम्रश्चूतो रसालोऽसौ' इत्यमरः ॥ तमु कांक्षायाम् । ताम्रम् ॥

(निद्रादयः) णिदि निद्रा । अर्द आर्द्रम् । शुचू शूद्रः । दुःखेनेयते दूरम् । कृती कृच्छ्रम् । क्रूरः ॥ रोदयतीति रुद्रः । ज्या वयोहानौ । जीरः ॥

(सुबोधिनी)-निद्रादयः॥रक्प्रत्ययान्ता निपात्यन्ते—णिदि कुत्सायाम्।नलोपो निपातनात् । निद्रा ।'स्यान्निद्रा शयनं स्वापः' इत्यमरः॥ अर्द गतौ । अर्देर्दीर्घो निपातनात् । आर्द्रा ।'आर्द्रा नक्षत्रभेदे स्यात्स्त्रियां क्लिन्नेऽभिधेयवत्' इति मेदिनी ॥ शुच शोके। चस्य दो धातोर्दीर्घश्च निपात्यते । शूद्रः॥इण् गतौ दुःपूर्वः धातोर्लोपो निपातनात् । रिलोपो दीर्घश्चेति रलोपपूर्वदीर्घौ । दुःखेनेयते प्राप्यते इति दूरम् ॥ कृती छेदने । कृतेःकृच्छ क्रू इत्येतावादेशौ निपातनात् ।'कृच्छ्रमाख्यातमामीले पापसंतपनादिनोः' इति विश्वः॥ 'स्यात्कष्ट कृच्छ्रमाभिलम्' इत्यमरः॥क्रूरः। 'क्रूरस्तु कठिने घोरे नृशंसे चाभिधेयवत्' इति विश्वः॥'नृशंसो घातुकः क्रूरः पापो धूर्तस्तु वञ्चकः' इत्यमरः ॥ रुदिर् अश्रुविमोचने।ण्यन्तः।'रोदयतीति' ओरिति णिलोपः। रुद्रः॥जु गतौ । ईकारो निपातनात् । जीरः ।ज्या वयोहानौ।अस्माद्रक्प्रत्यये ग्रहादिमिति संप्रसारणे च कृते जीर इत्येके । 'जीरः खड्ग वणिग्द्रव्ये' इति विश्वः ॥ 'जीरस्तु जरणे खड्गे' इति मेदिनी ॥

(स्वादेः क्रः) सुरः । षूङ् प्राणिप्रसवे सूरः । धीरः । गृध्रः ॥

(सुबोधिनी)-स्वादेःक्रः ॥ क्रप्रत्ययमाह— कित्त्वान्न गुणः। षूञ् अभिषवे।सुरः। 'सुरा चषकमद्ययोः।पुंल्लिङ्गस्त्रिदिवेशे स्यात्' इति मेदिनी॥'सुरो देवे सुरा मद्ये चष-

केऽपि सुरा क्वचित्' इति विश्वः ॥ षूङ् प्राणिगर्भविमोचने । सावयति प्रेरयति कर्मणि लोकमिति सूरः । 'सूरसूर्यार्यमादित्यः' इत्यमरः ॥ डुधाञ् धारणादौ । अपिद्वाधे॰ तीत्वम्। धीरः।'धीरो धैर्यान्विते स्वैरे बुधे क्लीबं तु कुङ्कुमे । स्त्रियां श्रवणतुल्यायाम्' इति मेदिनी । गृधु अभिकाङ्क्षायाम् । गृध्रः।'गृध्रः खगान्तरे पुंसि वाच्यलिङ्गोऽथ लुब्धके' इति मेदिनी ॥

(शूरादयः) शु सौत्रः शूरः। षिञ् सीरः।चिञ् चीरम् ॥

(सुबोधिनी)–शूरादयः ॥ क्रप्रत्ययान्ता निपात्यन्ते–शु गतौ । निपातनाद्दीर्घः सर्वत्र । शूरः। 'शूरः स्यात्पादपे भटे' इति मेदिनी ॥ 'शूरश्चारुघटे सूर्ये' इति विश्वहेमचन्द्रौ ॥ षिञ् बन्धने । सीरः । 'सीरोऽर्कहलयोः पुंसि' इति मेदिनी ॥ चिञ् चयने । चीरम् । 'चीरा झिल्ल्यां नपुंसकम् । गोस्तने वस्त्रभेदे च रेखालेखनभेदयोः' इति मेदिनी ॥ 'चीरं तु गोस्तने वस्त्रे चूडायां सीसकेऽपि च । चीरो कृच्छ्राटिकाझिल्ल्योः' इति विश्वः ॥

(वाविन्धेः) वीध्रम् । वृधु वर्ध्रम् । वप्रः । इन्द्रः । अगि गतौ । अग्रम् । वज्रम् । डुवप् विप्रः । उच समवाये उग्रः । ञिभी भये भेरी । शुच शोके शुक्रः। शुक्लः । गुङ् गतौ गौरः।इण् इरा। माला ॥

(सुबोधिनी)–वाविन्धेः ॥ ञिइन्धी दीप्तौ विपूर्वादस्मात् क्रन् स्यात्॥नो लोप इति नलोपः । वीध्रम् । 'वीध्रं तु विमलार्थकम्' इत्यमरः ॥ वृधु वृद्धौ । वर्द्धं चर्म ॥ डुवप् बीजसंताने । वप्रः प्राकारः। 'वप्रः पितरि केदारे वप्रः प्राकाररोधसोः' इति धरणिः ॥ इदि परमैश्वर्ये । इन्द्रः। 'इन्द्रः शचीपतावन्तरात्मन्यादित्ययोगयोः' इति विश्वः ॥ अगि गतौ । नलोपो निपात्यते । अग्रम् । "अग्रं पुरस्तादुपरि परिमाणे पलस्य च । आलम्बने समूहे च प्रान्तरे पुन्नपुंसकम् । आधिके च प्रधाने च प्रथमे चाभिधेयवत्" इति मेदिनी ॥ वज गतौ । वज्रः। 'वज्रोऽस्त्री हीरके पवौ' ॥ डुवप् बीजसन्ताने । उपधाया इत्वं निपातनात् । विप्रः ॥ उच समवाये । चस्य गो निपातनात् । उग्रः। 'उग्रः शूद्रासुते क्षत्राद्रुद्रे पुंसि त्रिषूत्कटे' इति मेदिनी ॥ ञिभी भये । नदादित्वादीप् । 'भेरी स्त्री दुन्दुभिः पुमान्' इत्यमरः ॥ पक्षे रस्य लत्वं निपात्यते । भेलः । 'भेलः प्लवे मणौ पुंसि भीरावज्ञे च वाच्यवत्' इति मेदिनी ॥ शुच शोके । चस्य को निपातनात् । शुक्रः । 'शुक्रः स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान् । रेतोऽक्षिरुग्भिदोः क्लीबम्' इति ॥ पक्षे लत्वं निपात्यते । शुक्लः । 'शुक्लो योगान्तरे सिते । नपुंसकं तु रजते'इति च मेदिनी॥ गुङ् अव्यक्ते शब्दे । वृद्धिर्निपातनात । गौरः । "गौः पीतेऽरुणे श्वेते विशुद्धेऽप्यभिधेयवत् । ना श्वेतसर्षपे चन्द्रे न द्वयोः पद्मकेशरे । गौरी त्वसंजातरजःकन्याशंकरभार्ययोः ॥ रोचने रजनीपिङ्गाप्रियंगुवसुधासु च

आपगाया विशेषेऽपि यादसांपतियोषिति'' इति मेदिनी ॥ 'गौरोऽरुणे सिते पीते' इति विश्वः ॥ इण् गतौ । इणो गुणाभावो निपातनात् । इरा । 'इरा मद्ये च वारिणि' इति विश्वः॥ मा माने । प्रत्यये रस्य लत्वं निपातनात् । माला । 'मालं क्षेत्रे स्त्रियां पुष्पस्रजोर्जात्यन्तरे पुमान्' इति मेदिनी ॥ 'मालं क्षेत्रे जने मालो माला पुष्पादिदामनि' इति विश्वः ॥ 'मालमुन्नतभूतलम्' इत्युत्पले । 'क्षेत्रमारुह्य मालम्' इति मेघदूतः ॥

(कुः शिल्पिसंज्ञयोः) रजकः । चष् भक्षणे चषकम् । कुह विस्मापने कुहकम् ॥

(सुबोधिनी)-कुः शिल्पिसंज्ञयोः ॥ शिल्पिन्यभिधेये संज्ञायां गम्यमानायां च कुः स्यात् ॥ कुप्रत्ययमाह-कित्त्वान्न गुणः । कुवोरित्यकादेशः । रञ्ज रागे । नो लोप इति नलोपः। रजकः।'रजकौ धावकशुकौ' इति हैमः॥'रजको धावके शुके' इति विश्वः॥ चष भक्षणे। संज्ञायां तु चषकः । 'चषकोऽस्त्री पानपात्रम्' इत्यमरः॥ कुह विस्मापने। कुहकः दाम्भिकः ॥ कृती छेदने । कृतकः ॥

(मुषेः किको दीर्घश्च) मूषिकः॥

(सुबोधिनी)-मुषेः किको दीर्घश्च ॥ मुष स्तेये अस्मात्किकः । किकप्रत्ययमाह-कित्त्वान्न गुणः । मूषिकः आखुः ॥

(क्रिय इकः) क्रयिकः ॥

(सुबोधिनी)-क्रिय इकः ॥ इकप्रत्ययमाह-डुक्रीञ् द्रव्यविनिमये । क्रयिकः क्रेता ॥

(श्यास्त्याहृञाविभ्य इनः) श्येनः । स्त्येनः । हरिणः । अविनः॥

(सुबोधिनी)-श्यास्त्याहृञाविभ्य इनः ॥ इनप्रत्ययमाह-श्यैङ् गतौ । सन्ध्यक्षराणामित्यात्वम् । श्येनः । 'श्येनः पत्रिणि पाण्डुरे' इति मेदिनी ॥ स्त्यै ष्ट्यै शब्दसंघातयोः । स्त्येनश्चौरः॥ हृञ् हरणे । हरिणः । "हरिणः पुंसि सारंगे विशदे त्वभिधेयवत् । हरिणी हरितायां च गणिकावृत्तभेदयोः । सुवर्णप्रतिमायां च'' इति मेदिनी ॥ अव रक्षणादौ । अविनः अध्वर्युः ॥

(वृजादेः किनः) वृजिनम् ॥

(सुबोधिनी)-वृजादेः किनः ॥ किन्प्रत्ययमाह-कित्त्वान्न गुणः । वृजी वर्जने । वृजिनम् । 'वृजिनं कल्मषे क्लीबं केशे ना कुटिलेऽन्यवत्' इति मेदिनी ॥

(अजेर्वी न) आजिनम् । कठ कृच्छ्रजीवने कठिनम् । नल गन्धे नलिनम् । कुडि दाहे कुण्डिनम् । दो दिनम् ॥

(सुबोधिनी)–अजेर्वी न ॥ किनप्रत्यये वीभावो न स्यात् ॥ अज गत्यादौ । अजिनम् । 'अजिनं चर्म कृत्तिः स्त्री' इत्यमरः ॥ कठ कृच्छ्रजीवने । कठिनम् । "कठिनमपि निष्ठुरे स्यात्स्तब्धे तु त्रिषु नपुंसकं स्थाल्याम् । कठिनी खटिकायामपि कठिना गुडशर्करायां च" इति मेदिनी ॥ नल गन्धे ॥ नलिनं पद्मम् ॥ मल धारणे । मलिनम् । 'मलिनं दूषिते कृष्णे ऋतुमत्यां तु योषिति' इति मेदिनी ॥ कुडि दाहे । कुण्डिनं नगरम् । कुण्डिन ऋषिः ॥ दो अवखण्डने । सन्ध्यक्षराणामित्यात्वे आतोऽनपीत्यालोपः । दिनम् ।

(द्रुदक्षिभ्यामिनः) द्रविणम् । दक्ष वृद्धौ । दक्षिणः । दक्षिणा ॥

(सुबोधिनी)–द्रुदक्षिभ्यामिनः ॥ द्रु गतौ । द्रविणम् । 'द्रविणं न द्वयोर्वित्ते काञ्चने च पराक्रमे' इति मेदिनी ॥ दक्ष वृद्धौ । दक्षिणः । "दक्षिणस्तु परच्छन्दानुवर्तिनि । दक्षेऽपसव्ये सरले प्राचीनेऽप्यथ दक्षिणा । दिक् प्रतिष्ठा यज्ञदानम्" इति हेमचन्द्रः ॥ "दक्षिणः सरलोदारपरच्छन्दानुवर्तिषु । वाच्यवद्दक्षिणा प्राची यज्ञदानप्रतिष्ठयोः" इति विश्वः ॥

(अर्तेः किदिच्च) इरिणम् ॥

(सुबोधिनी)–अर्तेः किदिच्च ॥ ऋ गतौ अस्मादिनन् प्रत्ययः स्यात् धातोरिरादेशश्च ॥ इरिणम् । 'इरिणं शून्यमूषरम्' इत्यमरः ॥

(वेपितुह्योर्ह्रस्वश्च) विपिनम् । तुहिनम् ॥

(सुबोधिनी)–वेपितुह्योर्ह्रस्वश्च ॥ आभ्यामिनन्प्रत्ययः स्याद्धातोर्ह्रस्वश्च ॥ टुवेपृ कम्पने । विपिनम् । 'अटव्यरण्यं विपिनम्' इत्यमरः ॥ तुहिर् अर्दने उपधागुणे कृते ह्रस्वः । तुहिनं हिमम् ॥

(तलिपुलिभ्यां च) तल प्रतिष्ठायाम् । तलिनम् । पुलिनम् ॥

(सुबोधिनी)–तलिपुलिभ्यां च ॥ इनन्प्रत्ययः स्यात् ॥ तल प्रतिष्ठायाम् । तलिनम् । 'तलिनं विरले स्तोके स्वच्छे [illegible] त्रिषु' । [illegible] पुलिनम् ॥

(रुहेश्च) रोहिणः ॥

(सुबोधिनी)–रुहेश्च ॥ इनन्प्रत्ययः स्यात् । रुह [illegible] । रोहिणः [illegible] ॥

(आप्नोतेः [illegible]) [illegible] ।

(सुबोधिनी)–आप्नोतेः [illegible]

[illegible]

(ग्लानुदिभ्यां डौः) ग्लौः । नौः ॥

(सुबोधिनी)–ग्लानुदिभ्यां डौः ॥ डौप्रत्ययमाह–डित्वाट्टिलोपः । ग्लै हर्ष-क्षये । ग्लौः । 'ग्लौर्मृगाङ्कः कलानिधिः' इत्यमरः ॥ णुद प्रेरणे । नौः । 'स्त्रियां नौस्तरणिस्तरिः' इत्यमरः ॥

(रातेर्डैः) राः, रायौ ॥

(सुबोधिनी–रातेर्डैः ॥ डैप्रत्ययमाह–डित्वाट्टिलोपः । रा दाने । रैरिति इत्या-त्वम् । राः। 'रः स्मृतः पावके तीक्ष्णे राः पुंसि स्वर्णवित्तयोः' इति मेदिनी॥'रस्तीक्ष्णे दहने रास्तु सुवर्णे जलदे धने' इति हैमः ॥

(गमेर्डोः) गौः ॥

(सुबोधिनी)–गमेर्डोः ॥ डोप्रत्ययमाह–डित्वाट्टिलोपः । गम्लृ गतौ । ओतो णिदिति णित्त्वाद्वृद्धिः । गौः । "गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः । स्त्री तु स्यादिशि भारत्यां भूमौ च सुरभावपि । नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु" इति केशवः ॥ "गौः स्वर्गे वृषभे रश्मौ वज्रे चन्द्रे पुमान् भवेत् । अर्जुने नेत्रदिग्बाणभूवाग्वारिषु गौर्मता" इत्यमरः ॥

(तत्त्वदी०)–गमेरिति ॥ गौरिति ॥ "गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः ॥ स्त्री तु स्यादिशि भारत्यां भूमौ च सुरभावपि । नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु" ॥

(भ्रमेर्डूः) भ्रूः ॥

(सुबोधिनी)–भ्रमेर्डूः ॥ डूप्रत्ययमाह–डित्वाट्टिलोपः। भ्रमु अनवस्थाने । भ्रूः ।

(दमेर्डोसि) दोः, दोषौ ॥

(सुबोधिनी)–दमेर्डोसि ॥ डोसिप्रत्ययमाह–डित्वाट्टिलोपः । दमु उपशमे । दो [illegible] । दोः । 'दोषं तस्य' इति श्रीहर्षप्रयोगात्पुंस्त्वम् ॥ 'ककुद्दोषणी' इति [illegible] ॥ दोर्दोषा च भुजो बाहुः इति [illegible]

(पणेरिज्‌ आदेश्च वः) वणिक् ।

(सुबोधिनी)–पणेरिज् आदेश्च वः ॥ इजप्रत्ययमाह [illegible] ॥ [illegible] इत्यमरः ॥

([illegible]) [illegible] ॥

[illegible]

दन्त्यसकारवानापि । 'रसनं स्वदने ध्वनौ । जिह्वायां तु न पुंसि स्याद्रास्नायां रसना स्त्रियाम्' इति मेदिनी ॥ 'रसनं निःस्वने स्वादे रसना काञ्चिजिह्वयोः' इति धरणिः ॥

(तत्त्वदी०)–रशनेति ॥ काञ्ची । जिह्वायां दन्त्यसकारवान् ॥

(उन्देर्नलोपश्च) ओदनः ॥

(सुबोधिनी)–उन्देर्नलोपश्च ॥ युः स्यात् ॥ उन्दी क्लेदने । ओदनः 'ओदनं न स्त्रियां भक्ते बलायामोदिनी स्त्रियाम्' इति मेदिनी ॥

(गमेर्गान्तादेशश्च) गगनम् । (अन्येभ्योऽपि युः) स्यन्दनम् । रोचनः ।

(रञ्जिकृभ्यां क्युः) रजनम् । किरणः ॥

(सुबोधिनी)–गमेर्गान्तादेशश्च ॥ युः स्यान्मस्य गश्च ॥ गम्लृ गतौ । गगनम् । 'नभोऽन्तरिक्षं गगनम्' इत्यमरः ॥ अन्येभ्योऽपि युः ॥ स्यन्दू प्रस्रवणे । स्यन्दनः । 'स्यन्दनं तु स्रुतौ नीरे तिनिशे ना रथेऽस्त्रियाम्' इत्यमरः ॥ रुच दीप्तौ । रोचनः "रोचना रक्तकह्लारे गोपित्तवरयोषितोः । रोचनः कूटशाल्मल्यां पुंसि स्याद्रोचके त्रिषु" इति मेदिनी ॥

(सुबोधिनी)–रञ्जिकृभ्यां क्युः ॥ क्युप्रत्ययमाह–कित्त्वान्न गुणः । रञ्ज रागे । नो लोप इति नलोपः । रजनम् । 'रजनो रागजनने रजनं रक्तचन्दने' इति मेदिनी ॥ कॄ विक्षेपे । ऋत इरितीर् । किरणः ॥

(धृषेर्धिषश्च) धिषणा । (धाञश्च) निधनम् ॥

(सुबोधिनी)–धृषेर्धिषश्च ॥ धृषेर्धिष् आदेशश्च । ञिधृषा प्रागल्भ्ये । धिषणः । 'धिषणस्त्रिदशाचार्ये धिषणाधिषयोषिति' इति मेदिनी ॥ 'गीष्पतिर्धिषणो गुरुः' इत्यमरः ॥ डुधाञ् धारणादौ । आतोऽनपीत्यालोपः । निधनम् । 'निधनं स्यात्कुले नाशे' इति मेदिनी ॥ 'निधनं कुलनाशयोः' इति हैमः ॥

(तत्त्वदी०)–धिषणेति ॥ बुद्धौ । गुरौ तु पुंवत् ॥

(पृषदादयः) पृषु सेचने पृषत् । पृषन्ति । बृह उद्यमे बृहत् । महान् । जगत् ॥ (विपूर्वाद्धनः) वेहत् ॥

(सुबोधिनी)–पृषदादयः ॥ अतृप्रत्ययान्ता निपात्यन्ते वर्तमानेऽर्थे ॥ अतृप्रत्ययमाह–ऋदित्वात्पुंसि त्रितो नुमिति नुम् । स्त्रियां तु उगितश्चेति ङीप् । पृषु सेचने निपातनाद्गुणाभावः । पृषत् । पृषन्ति । बिन्दुवाची पृषच्छब्दो नपुंसकमिति ध्वननाय बहुवचनान्तमुदाहृतम् । "पृषन्मृगे पुमान्बिन्दौ न द्वयोः पृषतोऽपि ना" इति मेदिनी ॥ बृह वृद्धौ । बृहत् विपुलम् । 'बृहती क्षुद्रवार्ताक्यां कण्टकार्यां च वाचि च' इति विश्वः ॥

'ननान्दा तु स्वसा पत्युर्ननन्दा नन्दनी च सा' इति शब्दार्णवः॥ 'उषा पूषा ननान्दा च ननन्दा च प्रकीर्तिता' इति विश्वः॥

(दिवेर्ऋः) देवा, देवरौ॥

(सुबोधिनी)-दिवेर्ऋः॥ दिवु क्रीडादौ। देवा॥ 'स्वामिनो देवृदेवरौ' इत्यमरः॥

(नयतेर्डिच्च) ना, नरौ, नरः॥

(सुबोधिनी)-नयतेर्डिच्च॥ ऋप्रत्ययमाह-डित्त्वाट्टिलोपः। णीञ् प्रापणे। ना। 'स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नराः' इत्यमरः॥

(अर्त्यादेरनिः) अरनिः। सरणिः। तरणिः। धमनिः। अशनिः। अवनिः। रजनिः।

(सुबोधिनी)-अर्त्यादेरनिः॥ अनिप्रत्ययमाह-ऋ गतौ। अरणिः। 'अरणिर्वह्निमन्थे ना द्वयोर्निर्मन्थ्यदारुणि' इति मेदिनी॥ सृ गतौ। सरणिः। 'सरणिः श्रेणिवर्त्मनोः' इति दन्त्यादौ रभसः॥ शॄ हिंसायाम्। ततोऽनिः। शरणिरित्येके॥ धृञ् धारणे। धरणिः भूमिः॥ धमिः सौत्रः। धमनिः शिरा॥ अश भोजने। अश्यते भुज्यते राज्यमिन्द्रेणानयेति अशनिः। 'अशनिः स्त्रीपुंसयोः स्याच्चञ्चलायां पवावपि' इति मेदिनी॥ अव रक्षणादौ। अवनिः पृथिवी॥ तॄ प्लवनतरणयोः 'तरणिर्द्युमणौ पुंसि कुमारीनौकयोः स्त्रियाम्' इति मेदिनी॥ कुमारी लताविशेषः। 'तरणी रामतरणी कर्णिका चारुकेसरा। सहा कुमारी गन्धाढ्या' इति धन्वन्तरिनिघण्टुः॥ रञ्ज रागे। नलोपो निपातनात्। रजनिः। कृदिकारादितीपि रजनी। 'रजनी हस्तिनी रात्रिर्हरिद्राजतुकासु च' इति मेदिनी॥

(अर्च्यादेरिस्) अर्चिः, अर्चिषी। रोचिः। शोचिः। छदिः। हविः। सर्पिः॥

(सुबोधिनी)-अर्च्यादेरिस्॥ इस्प्रत्ययमाह-अर्च पूजायाम्। अर्चिः। 'ज्वालाभासोर्न पुंस्यर्चिः' इति सान्तेष्वमरः॥ ण्यन्तादर्चेरिप्रत्यये अर्चिरिदन्तोऽपि। 'अर्चिर्हेतिः शिखा स्त्रियाम्' इत्यमरः॥ शुच शोके। शोचिः। 'शोचिः शोचिरुभे क्लीबे' इत्यमरः॥ हु दानादनयोः। हविः घृतम्॥ सृप्लृ गतौ। सर्पिः आज्यम्॥

(तत्त्वदी०)-अर्च्यादेरिति॥ अर्चिर्ज्वाला॥ इन्दन्तोऽपि। शोचिर्दीप्तिः॥

(द्युतेरादेर्जः) ज्योतिः॥

(सुबोधिनी)-द्युतेरादेर्जः॥ इस् स्यात् दस्य जश्च॥ द्युत दीप्तौ। ज्योतिः। 'ज्योतिरग्नौ दिवाकरे। पुमान् नपुंसकं दृष्टौ स्यात्प्रभाप्रकाशयोः' इति मेदिनी॥

(बृंहेर्नलोपश्च) बर्हिः॥

मह पूजायाम् । महान् । 'महती वल्लकीभेदे राज्ये तु स्यान्नपुंसकम् । तत्त्वभेदे पुमाञ्श्रेष्ठे वाच्यवत्' इति विश्वः ॥ "विश्वावसोस्तु बृहती तुम्बरोश्च कलावती । महती नारदस्य स्यात्सरस्वत्यास्तु कच्छपी" इति वैजयन्ती ॥ 'अवेक्षमाणं महतीं मुहुर्मुहुः' इति माघः ॥ हन हिंसागत्योः । विपूर्वाद्धन्तेरप्रत्ययो धातोष्टिलोपश्च निपातनादुपसर्गेकारस्यैत्वं च । विहन्ति गर्भमिति वेहत् । 'वेहद्गर्भोपघातिनी' इत्यमरः ॥

(नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृभ्रातृजामातृमातृपितृदुहितृ एते निपात्यन्ते तृप्रत्ययान्ताः) न पतन्त्यनेनेति नप्ता । नेष्टा । त्वेषयतीति त्वष्टा । क्षद भक्षणे क्षत्ता । होता । पोता । प्रशास्ता । भ्राता । जायां मातीति जामाता । मान पूजायाम् माता । पातीति पिता । दुहिता ॥

(सुबोधिनी)—नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृभ्रातृजामातृमातृपितृदुहितृ एते निपात्यन्ते तृप्रत्ययान्ताः ॥ तृप्रत्ययमाह—पत्लृ पतने । नञः प्रकृतिभावो धातोष्टिलोपश्च निपातनात् । सेरा इत्यात्वम् । नप्ता पौत्रो दौहित्रश्च ॥ णीञ् प्रापणे । नयतेः कुक् गुणश्च निपातनात् । ष्टुत्वम् । नेष्टा ॥ त्विष् दीप्तौ । धातोरितोऽत्व निपातनात् । त्वष्टा । 'त्वष्टा पुमान्देवशिल्पितक्ष्णोरादित्यवाच्यपि' इति मेदिनी ॥ क्षद शकलीकरणे भक्षणे च । अनुदात्तेतः । क्षत्ता । 'क्षत्ता स्यात्सारथौ द्वाःस्थे वेश्यायामपि शूद्रजे' इति विश्वः ॥ हु दानादनयोः । होता ॥ पूञ् पवने । पोता ॥ भ्राजृ दीप्तौ । भ्राजतेर्जलोपो निपातनात् । माने । जायां मातीति जायाया जादेशो निपातनात् । जामाता ॥ भ्राता । मान पूजायाम् । नस्य लोपो निपातनात् । माता ॥ पा रक्षणे । पातेराकारस्येत्त्वं च निपात्यते । पिता ॥ दुह प्रपूरणे । दुहेस्तृप्रत्ययस्येड्गुणाभावश्च निपातनात् । दुहिता ॥

(सावसेर्ऋः) स्वसा ॥

(सुबोधिनी)—सावसेर्ऋः ॥ सु उपपदे असु क्षेपणे इत्यस्मादृप्रत्ययः स्यात् ॥ ऋप्रत्ययमाह—स्वसा भगिनी ॥

(यतेर्वृद्धिश्च) याता ॥

(सुबोधिनी)—यतेर्वृद्धिश्च ॥ यती प्रयत्नेऽस्मादृः स्याद्वृद्धिश्च ॥ याता । 'भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम्' इत्यमरः ॥

(नञि नन्देश्च) न नन्दतीति ननान्दा । ननन्देत्येके ॥

(सुबोधिनी)—नञि नन्देश्च ॥ ऋः स्याद्वृद्धिश्च । टुनदि समृद्धौ । न नन्दतीति ॥ कृतायामपि सेवायां रुष्यतीत्यर्थः । ननन्दा । ननान्दा । वृद्धिर्वानुवर्तत इत्येके ।

(तत्त्वदी०)-शिलपादय इति ॥ शिल कौशलम् । 'शष्प बालतृणं प्रतिभाक्षयश्च ॥ बाष्पमिति ॥ 'अश्री नेत्रजलोष्मणोः' । 'रूप स्वभावे सौंदर्ये' ॥

(स्तनादेर्ण्यन्तादित्नुः) स्तनयित्नुः । गदयित्नुः ॥

(सुबोधिनी)-स्तनादेर्ण्यन्तादित्नुः ॥ इत्नुप्रत्ययमाह-स्तन गदी देवशब्दे । चुरादी ण्यन्तौ । गुणे कृते अयादेशः स्तनयित्नुः 'स्तनयित्नुःपुमान्वारिधरेऽपिस्तनितेऽपि च' इति मेदिनी ॥ 'स्तनयित्नुः पयोवाहे तद्वृत्तौ मृगरोगयोः' इति विश्वः ॥ गदयित्नुः । 'गदयित्नुः पुमान्कामे जल्पाके कार्मुकेऽपि च' इति विश्वः ॥

(तत्त्वदी०)-स्तनादेरिति ॥ स्तनयित्नुरिति ॥ णेरलोपः ॥

(दाभाभ्यां नुः) दानुः । भानुः ॥

(सुबोधिनी)-दाभाभ्यां नुः ॥ नुप्रत्ययमाह-डुदाञ् दाने । दानुः । 'दानुर्दातरि विक्रान्ते' इति मेदिनी ॥ भा दीप्तौ । भानुः 'भानू रश्मिदिवाकरौ' इत्यमरः ।

(धेट इच्च) धेनुः ॥

(सुबोधिनी)-धेट इच्च ॥ नुः स्याद्धातोरित्वं च ॥ धेट् पाने संध्यक्षराणामित्यात्वे कृते इत्वम् । ततो गुणः । धेनुः । 'धेनुः स्यान्नवसूतिका' इत्यमरः ॥

(सुवः किच्च) सूनुः ॥

(सुबोधिनी)-सुवः किच्च ॥ नुक् स्यात् ॥ कित्त्वान्न गुणः । षूङ् प्राणिप्रसवे । सूनुः । 'सूनुः पुत्रेऽनुजे रवौ' इति विश्वः ॥

(तत्त्वदी०)-सूनुरिति ॥ 'सूनुः पुत्रेऽनुजे रवौ' ॥

(अजिवृभ्यां णुः) वेणुः । वर्णुः ॥

(सुबोधिनी)-अजिवृभ्यां णुः ॥णुप्रत्ययमाह-अज गतौ । अजेर्वीति वीः । वेणुः । 'वेणुर्नृपान्तरे वंशे' इति विश्वः ॥ वृङ् संभक्तौ । वर्णुः । नददेशभेदयोः ॥

(स्थारीभ्यां णुः) स्थाणुः । रेणुः ॥

(सुबोधिनी)-स्थारीभ्यां णुः ॥ ष्ठा गतिनिवृत्तौ । स्थाणुः । 'स्थाणुः कीले हरे पुमान् । अस्त्री ध्रुवे' इति मेदिनी ॥ 'स्थाणुः कीले स्थिरे हरे' इति विश्वः ॥ री गतिरेषणयो । रेणुः । 'रेणुः स्त्रीपुंसयोर्धूलौ पुंल्लिङ्गः पर्पटे पुनः' इति मेदिनी ॥ 'रेणुर्द्वयोः स्त्रियां धूलिः' इत्यमरः ॥

(तत्त्वदी०)-स्थाणुरिति ॥ 'स्थाणुः कीले स्थिरे हरे' । 'रेणुर्द्वयोः स्त्रियां धूलिः' ॥

(विषेः कित्) विष्णुः ॥

(सुबोधिनी)-विषेः कित् ॥ णुक्प्रत्ययमाह-कित्त्वान्न गुणः । विष्लृ व्याप्तौ विष्णुः । 'विष्णुर्नारायणः कृष्णः' इत्यमरः ॥

लोहाजिमुष्कके । क्लीबं यवाग्रके पुंसि तिग्मात्मत्यागिनोस्त्रिषु" इति मेदिनी ॥ श्लिष आलिङ्गने श्लिषेरिकारस्यात्वं निपातनात् । षढोरिति कत्वम् । श्लक्ष्णम् ॥

(तत्त्वदी०)—रास्नादयः ॥ रास्ना गन्धद्रव्यम् । सास्ना गोगलकम्बलः । स्थूणा गृहस्तम्भः ॥

(मनादेर्युः) मन्युः । दस्युः । जन्युः ॥

(सुबोधिनी)—मनादेर्युः ॥ युप्रत्ययमाह—मन ज्ञाने । निपातनान्न युवोरित्यनादेशः । मन्युः ।'मन्युर्दैन्ये क्रतौ क्रुधि' ॥ दसु उपक्षये । दस्युः । 'दस्युश्चौरे रिपौ पुंसि' इति मेदिनी ॥ जनी प्रादुर्भावे । जन्युः । 'अथ जन्युः स्यात्प्राण्यग्निधातृषु' इति मेदिनी ॥

(तत्त्वदी०)—मनादेरिति ॥ 'मन्युर्दैन्ये क्रतौ क्रुधि ।' दस्युश्चोरः । जन्युर्देही ॥

(मृङस्त्युक्) मृत्युः ॥

(सुबोधिनी)—मृङस्त्युक् ॥ त्युक्प्रत्ययमाह—कित्त्वान्न गुणः। मृङ् प्राणत्यागे । मृत्युः । 'मृत्युर्ना मरणे यमे' इति मेदिनी ॥

(सर्तेरय्वयू) सरयुः । सरयूः ॥

सुबोधिनी)—सर्तेरय्वयू ॥ अयु--अयूप्रत्ययावाह—सृ गतौ । सरयुःसरयूः नदी॥

(पादेः पः) पापम् ॥

(सुबोधिनी)—पादेः पः ॥पप्रत्ययमाह—पा रक्षणे । पाति रक्षति धर्मादात्मानमिति पापम् ॥

(न्यादेः कित्) नीपः । सूपः । कुङ् शब्दे । कूपः ॥

(सुबोधिनी)—न्यादेः कित् ॥ पक्प्रत्ययमाह--णीञ् प्रापणे । नीपः । 'नीपः कदम्बबन्धूकनीलाशोकद्रुमेऽपि च' इति मेदिनी ॥ षुञ् अभिषवे । बाहुलकाद्दीर्घः । सूपः । 'सूपो व्यञ्जनसूदयोः' इति मेदिनी ॥ कुङ् शब्दे । बाहुलकाद्दीर्घः। कुवन्ति मण्डूका अस्मिन्निति कूपः ॥

(शिल्पादयः) शील शिल्पम् । शसु शष्पम् । बाधृ बाष्पम् । रु रूपम् । शॄ शूर्पम् ॥

(सुबोधिनी)- शिल्पादयः ।। पक्प्रत्ययान्ता निपात्यन्ते ॥ शील समाधौ। ह्रस्वो निपातनात् । शिल्पम् कौशलम् ॥ शसु हिंसायाम् । निपातनात्षत्वम् । शष्पम् । 'शष्पं बालतृणेऽपि च । पुंसि स्यात्प्रतिभाहीने' इति मेदिनी ॥ 'शष्पं बालतृणं घासः' इत्यमरः ॥ बाधृ विलोडने । धस्य पत्वं निपातनात् । बाष्पः ।'बाष्पो नेत्रजलोष्मणोः' इति विश्वः ॥ 'बाष्पमूष्माणि चाश्रूणि' इति च ॥ रु शब्दे । दीर्घत्वं निपातनात् । रूपम् ।'रूपं स्वभावे सौन्दर्ये' इति विश्वः ॥ शॄ हिंसायाम् । निपातनादुरः । रत्वो हि हले दीर्घः । शूर्पम् 'प्रस्फोटनं शूर्पमस्त्री' इत्यमरः ॥

(हृश्याभ्यामितः) हरितः । श्येतः ।

(सुबोधिनी)-हृश्याभ्यामितः ॥ इतप्रत्ययमाह-हृञ् हरणे । हरितः । 'हरिता स्त्री च दूर्वायां हरिद्वर्णयुतेऽन्यवत्' इति मेदिनी ॥ श्यैङ् गतौ । श्येतः। 'शुक्लशुभ्रशुचिश्वेतविशदश्येतपांडराः' इत्यमरः ॥

(रुहेरस्य लो वा) रोहितः-लोहितः ॥

(सुबोधिनी)-रुहेरस्य लो वा ॥ अस्मादितः स्याद्रस्य वा लकारः॥रुह बीजजन्मनि प्रादुर्भावे च । रोहितः--लोहितः । "रोहितं कुंकुमे रक्ते ऋजुशक्रशरासने । पुंसि स्यान्मीनमृगयोर्भेदे रोहितकद्रुमे"इति मेदिनी॥"लोहितं रक्तगोशीर्षकुंकुमाजिकुचन्दने । पुमानदान्तरे भौमे वर्णे च त्रिषु तद्वति" इति मेदिनी ॥

(श्र्वादेराय्यः) श्रवाय्यः । स्पृहयाय्यः ॥

(सुबोधिनी)-श्र्वादेराय्यः ॥ आय्यप्रत्ययमाह--श्रु श्रवणे।श्रवाय्यः।श्रवाय्यो यज्ञपशुः । स्पृह ईप्सायाम् । चुरादिरदन्तः । स्पृहयाय्यः ॥

(तत्त्वदी०)-श्र्वादेरिति ॥ श्रवाय्यो यज्ञपशुः ॥

(वृञ एण्यः) वरेण्यः ॥

(सुबोधिनी)-वृञ एण्यः ॥ एण्यप्रत्ययमाह--वृञ् वरणे । वरेण्यः श्रेष्ठ ॥

(अर्तेरन्यः) अरण्यम् । पृषु सेचने (पृषेश्च पस्य जः) पर्जन्यः ॥

(सुबोधिनी)अर्तेरन्यः ॥ अन्यप्रत्ययमाह-ऋ गतौ । अरण्यम् । 'अटव्यरण्यं विपिनम्' इत्यमरः ॥ पृषु सेचने । पस्य जः अन्यश्च स्यात्। पर्जन्यः। 'पर्जन्यो मेघशब्दोऽपि ध्वनदंबुदशक्रयोः' इति मेदिनी ॥

(तत्त्वदी०)-पर्जन्य इति ॥ 'पर्जन्यः शक्रमेघयोः' ॥

(वदेरान्यः) वदान्यः ॥

(सुबोधिनी)-वदेरान्यः ॥ आन्यप्रत्ययमाह-वद व्यक्तायां वाचि । वदान्यः । 'वदान्यस्त्यागिवाग्मिनोः' इत्यजयकारः ॥

(तत्त्वदी०)-वदेरिति ॥ 'वदान्यस्त्यागिवाग्मिनो' ॥

(अमादेरत्रः) अमत्रम् । नक्षत्रम् । पतत्रम् । कलत्रम् । वरत्रा ॥

(सुबोधिनी)-अमादेरत्रः॥ अत्रप्रत्ययमाह-अम गत्यादौ । अमत्रं भाजनम्॥ नक्ष गतौ । नक्षत्रम् । नञः प्रकृतिभावे नक्षत्रमिति साधितं तत्तु व्युत्पत्त्यन्तरम् ॥ पत्लृ पतने । पतत्रं तनूरुहम्॥गड सेचने। गडेर्गदेश्च कः। कलत्रम् । टलयोरैक्यस्मरणात् । कलत्रम् । 'कलत्रं श्रोणिभार्ययोः' इत्यमरः ॥ वृञ् वरणे । वरत्रा । 'नध्री वध्री वरत्रा स्यात्' इत्यमरः ॥ चर्मनिर्मिता रज्जुरित्यर्थः ॥

(कृादेः कः) कर्कः । राका । अर्कः । कल्कः । इण् एकः । भेकः । काकः । पाकः । निहाका ॥

(सुबोधिनी)—कृादेः कः ॥ कप्रत्ययमाह—बाहुलकान्न कस्येत्संज्ञा । डुकृञ् करणे । कर्कः । 'कर्कः कर्कः तले वह्नौ शुक्लाश्वे दर्पणे घटे' इति विश्वः ॥ रा दाने राका । 'राका नद्यन्तरे कच्छ्वां नवजातरजःस्त्रियाम् । संपूर्णेन्दुतिथौ' इति मेदिनी॥ 'राका तु सरिदन्तरे । राका नवरजःकन्या पूर्णेन्दुःपूर्णिमापि च' इति विश्वः ॥ अर्च पूजायाम् । चोः कुरिति कः । अर्कः। 'अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे बृहस्पतौ' इति विश्वः॥ कल गतौ । कल्कः । "कल्कोऽस्त्री घनतैलादिशेषे दंभे विभीतके । विट्किट्टयोश्च पापे च त्रिषु पापाशये पुनः" इति मेदिनी॥ 'कल्कःपापाशये पापे दंभे विट्किट्टयोरपि' इति विश्वः ॥ इण् गतौ । एकः । 'एकः संख्यान्तरे श्रेष्ठे केवलेतरयोस्त्रिषु' इति मेदिनी॥ 'एके मुख्यान्यकेवलाः' इति विश्वः ॥ ञिभी भये । भेकः। 'भेको मण्डूकमेषयोः' इति विश्वः॥ कै शब्दे काकः। "काकः स्याद्वायसे वृक्षभेदे पीठसर्पिणि । शिरोऽवक्षालने मानभेदद्वीपभेदयोः। काका स्यात्काकनासायां काकोलीकाकजङ्घयोः। रक्तिकायां मलय्वां च काकमाच्यां च योषिति । काकं सुरतबन्धे स्यात्काकानामपि संहतौ" इति मेदिनी ॥ मलयूः काकोदुम्बरिका ॥ पा पाने। पाकः । 'पाकः परिणतौ शिशौ । केशस्य जरसा शौक्ल्ये स्थाल्यादौ पचनेऽपि च' इति मेदिनी ॥ ओहाक् त्यागे । निहाका । 'निहाका गोधिका समे' इत्यमरः ॥

(तत्त्वदी०)—कृादेरिति ॥ कर्को धवलघोटकः ॥ राका पूर्णिमा तिथिः ॥ 'कल्कः पापाशये पापे दम्भे विट्किट्टयोरपि' ॥ 'एके मुख्यान्यकेवलाः' ॥ 'भेको मण्डूकमेषयोः' ॥ पाकः शिशुः ॥ 'निहाका गोधिका समे' ॥

(नौ सदेर्डित्) निष्कः ॥

(सुबोधिनी)—नौ सदेर्डित् ॥ कड्प्रत्ययमाह—डित्त्वाट्टिलोपः । षद्लृ विशरणादौ । निष्कः । 'निष्कोऽस्त्री हेम्नि तत्पले' इति विश्वः ॥

(तत्त्वदी०)—'निष्कोऽस्त्री हेम्नि तत्पले' ॥

(शकेरुनउन्तउन्तिउनिप्रत्ययाः) शकुनः । शकुन्तः । शकुन्तिः । शकुनिः ॥

(सुबोधिनी)—शकेरुनउन्तउन्तिउनिप्रत्ययाः ॥ उन उन्त उन्तिउनिप्रत्ययानाह—शक्लृ शक्तौ । शकुनः । शकुन्तः । शकुन्तिः।शकुनिः । "शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः" इत्यमरः ॥ "शकुनस्तु पुमान्पक्षिमात्रपक्षिविशेषयोः । शुभशंसिनिमित्ते च शकुनं स्यान्नपुंसकम्" इति मेदिनी ॥ "शकुन्तः कीटभेदे स्याद्भासपक्षिविहंगयोः' इति मेदिनी ॥

(सर्तेररपः षुक् च) सर्षपः ॥

(सुबोधिनी)-सर्तेरपः षुक् च ॥ सृ गतौ अस्मादपप्रत्ययः स्याद्धातोः षुगागमश्च ॥ अपप्रत्ययमाह-सर्षप ॥

(विटपादयः) विट् शब्दे विटपः । विष्टपम् । कुणपम् । वल संवरणे उलपम् ।

(सुबोधिनी)-विटपादयः ॥ कपप्रत्ययान्ता निपात्यन्ते-कित्त्वान्न गुणः । विट् शब्दे । विटपः 'विटपो न स्त्रियां स्तम्बे शाखाविस्तारपल्लवे । विटाधिपे ना' इति मेदिनी । विश प्रवेशने । विशतेः प्रत्ययस्य तुडागमो निपात्यते । छशषेति षत्वम् । ष्टुत्वम् । विष्टपम् । 'विष्टपं भुवनं जगत्' इत्यमरः ॥ कण शब्दे।वस्योत्वं निपातनात् । कुणपम् । 'कुणपः पूतिगन्धे शवेऽपि च' इति मेदिनी ॥'कुणपः शवमस्त्रियाम्' इत्यमरः ॥ वल संवरणे । वस्योत्व निपातनात् । उलपम् । 'उलपो न स्त्री गुल्मिन्यां ना तृणान्तरे' इति मेदिनी ॥

(तत्त्वदी०)-उलप इति ॥ कोमल तृणम् ॥

(वृतादेस्तिकः) वर्तिका ॥

(सुबोधिनी)-वृतादेस्तिकः ॥ तिकप्रत्ययमाह-वृतु वर्तने । वर्तिका ॥

(कृतः कित्) कृत्तिका ॥

(सुबोधिनी)-कृतः कित ॥ कृती छेदने इत्यादिभ्यस्तिकक् स्यात्॥कित्वान्न गुणः । कृत्तिका ॥ भिदिर् विदारणे । भित्तिका भित्तिः । लतु सौत्रो धातुः।लत्तिका गोधा ॥

(इष्यशिभ्यां तकः) इष्टका । अष्टका ॥

(सुबोधिनी)-इष्याशिभ्यां तकः॥तकप्रत्ययमाह-इषु इच्छायाम् । गुणम् । इष्टका ॥ अशूङ् व्याप्तौ । छशषेति षत्वम् । अष्टका ॥

(वीपतिभ्यां तनः) वेतनम् । पत्तनम् ॥

(सुबोधिनी)-वीपतिभ्यां तनः ॥ तनप्रत्ययमाह-वी गत्यादौ । वेतनम् ॥ पत्लृ पतने । पत्तनम् । 'पत्तनं पुटभेदनम्' इत्यमरः ॥

(अर्त्यादिभ्यः) अर्भः । दॄ दर्भः । गर्भः ॥

(सुबोधिनी)-अर्त्यादिभ्यः ॥ भन्प्रत्ययमाह-ऋ गतौ । 'अर्भ' इति अर्भः शिशुः । स्वल्पे अर्भकः ।' दॄ विदारणे । दर्भः ॥ गॄ निगरणे । गर्भः ।'गर्भो भ्रूणेऽर्भके कुक्षौ सन्धौ पनसकण्टके' इति मेदिनी ।'

(इणः कित्) इभः ॥

'भ्रमरः कामुके भृङ्गे' इति मेदिनी ॥ चमु अदने । चमरः । 'चमरं चामरे स्त्री मञ्जरीमृगभेदयोः' इति मेदिनी ॥ दिवु क्रीडादौ । ण्यन्तः । देवयतीति देवरः । पत्युः कनिष्ठभ्राता ॥ वस निवासे । ण्यन्तः । वासयतीति वासरो दिवसः ॥

(तत्त्वदी०)–अर्त्यादेरिति ॥ अररं कपाटम् ॥

(कुवः किद्गुट् च) कुररः ॥

(सुबोधिनी)–कुवः किद्गुट् च ॥ अरप्रत्ययमाह–कित्त्वान्न गुणः । कु शब्दे । कुररः । 'उत्क्रोशकुररौ समौ' इत्यमरः ॥

(अङ्ग्यादेरारः) अङ्गारः । मन्दारः ॥

(सुबोधिनी)–अङ्ग्यादेरारः ॥ आरप्रत्ययमाह–आगि गतौ अङ्गारः । 'अङ्गारमुल्मुके न स्त्री पुँल्लिगस्तु महीसुते' इति मेदिनी ॥ मदि स्तुत्यादौ । मन्दारः । बाहुलकादारुप्रत्ययोऽपि । मन्दारुः । 'पारिभद्रे तु मन्दारुर्मन्दारः पारिजातके' इति शब्दार्णवः ॥ 'मन्दारुः स्यात्सुरद्रुमे । पारिभद्रेऽर्कपर्णे च' इति विश्वः ॥

(गडेः कड च) गड आसेचने कडारः ॥

(सुबोधिनी)–गडेः कड च ॥ गाडि वदनैकदेशे गड सेचने वा अस्य कडादेश आरप्रत्ययश्च स्यात् ॥ 'कडारः कपिलः पिङ्गः' इत्यमरः ॥ 'कडारः कपिले दासे' इति मेदिनी ॥

(शृङ्गारादयः) शृङ्गारः । भृङ्गारः । मृजूष् मार्जारः । कमु कुमारः । तुषारः । कासारः ॥

(सुबोधिनी)–शृङ्गारादयः ॥ आरप्रत्ययान्ता निपात्यंते ॥ शॄ हिंसायाम् । नुम् गुक् ह्रस्वश्च निपात्यते । शृंगारः । "शृंगारः सुरते नाट्ये रसे च गजमण्डने । नपुंसकं लवंगेऽपि नागसंभवचूर्णयोः" इति मेदिनी । भृञ् भरणे । नुम् गुक् ह्रस्वश्च निपात्यते । भृंगार । 'भृंगारः कनकालुका' । 'भृंगारी झिल्लिकायां स्यात्कनकालौ पुनः पुमान्' इति च ॥ मृजूष् शुद्धौ । मृजेर्वृद्धिरिति वृद्धिः । मार्जारः । 'ओतुर्विडालो मार्जारः' इत्यमरः ॥ 'मार्जार ओतौ खट्वाङ्गे' इति मेदिनी ॥ कमु कान्तौ । उपधाया उत्वं गुणाभावश्च निपातनात् । कुमारः । "कुमारः स्याच्छुके स्कन्दे युवराजेऽश्ववारके । बालके वरुणाद्रौ ना न द्वयोर्जात्यकाञ्चने । कुमारी शैलतनया वनकाल्योर्नदीभिदि । सहाऽपराजिताकन्याजम्बूद्वीपेषु च स्त्रियाम्" इति मेदिनी ॥ तुष तुष्टौ । तुषारः । 'तुषारस्तुहिनं हिमम्' इत्यमरः ॥ कासृ शब्दकुत्सायाम् । कासारः । 'कासारः सरसी सरः' इत्यमरः ॥

(तत्त्वदी०)–भृङ्गार इति 'भृङ्गारः कनकालुका' ॥

(सुबोधिनी)—वातप्रम्यादयः ॥ कीप्रत्ययान्ता निपात्यन्ते—कर्त्रर्थसंज्ञा । माङ् माने । आतोऽनपीत्यालोपः । वातं प्रमिमीते इति वातप्रमीः । 'वातप्रमीर्वातमृगः' इत्यमरः ॥ अयं स्त्रीपुंसयोः ॥ या प्रापणे । ययीरश्वः । पा रक्षणे । पपीः । निपातनादुभयत्र द्वित्वम् । 'पपीः स्यात्सोमसूर्ययोः' इति विश्वः ॥

(तत्त्वदी०)—वात० ॥ ययीरश्वः ॥ 'पपीः स्यात्सोमसूर्ययोः' ॥

(रत्न्यादयः) ऋ रत्निः । अञ्जू अञ्जलिः । मदी मत्स्यः । अत अगि अङ्गुलिः । कौतेः कवचः । यु यवासः । कृश् कृशानुः ॥

(सुबोधिनी)—रत्न्यादयः ॥ रत्नादयो निपात्यन्ते—ऋअञ्जूमदीअत्अगिकुयुकृशिभ्योऽष्टभ्यः कत्नि अलि स्य इथि उलि अच आस आनुक् प्रत्यया यथासंख्यमष्टौ भवन्ति । ऋ गतौ रत्निः । कित्त्वान्न गुणः । रत्नम् । रत्निः । 'बद्धमुष्टिः करो रत्निः सोऽरत्निः प्रसृताङ्गुलिः' । अरत्निरत्र नञ्समासः । प्रसृताङ्गुलियों हस्तः सोऽरत्निरित्यर्थः॥अञ्जू व्यक्त्यादौ अलिः । अञ्जलिः । 'अञ्जलिस्तु पुमान्हस्तसंपुटे कुडवेऽपि च' इति मेदिनी ॥ मदी हर्षे । स्यः। मत्स्यः।'मत्स्यो मीनेऽथ पुम्भूम्नि देशे' इति मेदिनी ॥ अत सातत्यगमने । इथिः। अतिथिः।'अतिथिः कुशपत्रे स्यात्पुमानागन्तुके त्रिषु' इति मेदिनी ॥ अगि गतौ । उलिः । अङ्गुलिः । 'अङ्गुलिः करशाखायां कर्णिकायां गजस्य च' इति हैमः ॥ कु शब्दे । अचः । कवचः । 'कवचो गर्दभाण्डे च सन्नाहे पर्पटेऽपि च' इति मेदिनी॥ यु मिश्रणे । आसः । यवासः।'यासो यवासो दुःस्पर्शः' इत्यमरः ॥ कृश तनूकरणे । आनुक् । कृशानुः । 'कृशानुः पावकोऽनलः' इत्यमरः ॥

(तत्त्वदी०)—रत्न्यादयः इति ॥ ऋ इत्यस्य रत्निरिति । 'बद्धमुष्टिः करो रत्निः सोऽरत्निः प्रसृताङ्गुलिः' ॥

(शॄः करः) शर्करा ॥

(सुबोधिनी)—शॄः करः ॥ करन्प्रत्ययमाह—ककारस्य नेत्त्वं बाहुलकात् ॥ शॄ हिंसायाम् । शर्करा । 'शर्करा खण्डविकृतावुपलाशर्करांशयोः ॥ शर्करान्वितदेशे च रुग्भेदे शकलेऽपि च' इति मेदिनी ॥

(पुषः कित्) पुष्करः ॥

(सुबोधिनी)—पुषः कित् ॥ करन्प्रत्ययः स्यात्—पुष पुष्टौ । पुष्करम् । "पुष्करं खेऽम्बुपद्मयोः । तूर्यवक्त्रे खड्गफले हस्तिहस्ताग्रभागयोः । कुष्ठौषध्यां द्वीपतीर्थभेदयोश्च नपुंसकम् । ना रागनागविहगनृपभेदेषु चाम्बुदे" इति मेदिनी ॥

(गमेरिनिर्भविष्यति) गमिष्यतीति गमी ॥

(सुबोधिनी)-इणः कित् ॥ भक् स्यात॥कित्त्वान्न गुणः । इण् गतौ । इभः 'इभः स्तम्बेरमः पद्मी' इत्यमरः ॥

(असिसञ्जिभ्यां क्थिः) अस्थि । सक्थि ॥

(सुबोधिनी)-असिसञ्जिभ्यां क्थिः ॥ क्थिप्रत्ययमाह-कित्त्वान्न गुणः॥ क्षेपणे अस्थि । 'कीकसं कुल्यमस्थि च' इत्यमरः ॥ षञ्ज सङ्गे । चोः कुरिति गः । खसे चपा इति कः । नो लोप इति नलोपः॥ सक्थि ।'सक्थि क्लीबे पुमानूरुः' इत्यमरः ॥

(शुषादेः क्सिः) शुक्षिः । कुष निष्कर्षे कुक्षिः । अशू अक्षि ॥

(सुबोधिनी)-शुषादेः क्सिः ॥क्सिप्रत्ययमाह--कित्त्वान्न गुणः। शुष् शोषणे। षढोरिति कः । षत्वम् । शुक्षिः वातः॥ कुष दाहे । कुक्षिः॥अशूङ् व्याप्तौ । छशोषेति षत्वं कत्वं च । अक्षि नयनम् ॥

(तत्त्वदी०)--शुक्षिरिति ॥ शुक्षिर्वातः ॥

(इषः क्सुः) इक्षुः ॥

(सुबोधिनी)-इषः क्सुः ॥ क्सुप्रत्ययमाह-कित्त्वान्न गुणः ।इषु इच्छायाम् । कत्वे षत्वे इक्षुः । 'रसाल इक्षुः' इत्यमरः ॥

(अवितॄस्तृतन्त्रिभ्यः ईः) अवीः । तरीः । स्तरीर्धूमः । तन्त्रीः ।

(सुबोधिनी)-अवितॄस्तृतन्त्रिभ्यः ईः॥ ईप्रत्ययमाह-अव रक्षणादौ । अवीः। 'अवीर्नारी रजस्वला' ॥ तॄ प्लवनतरणयोः ।तरीः ।'स्त्रियां नौस्तरणिस्तरिः' इत्यमरः॥ स्तृञ् आच्छादने । स्तरीर्धूमः ॥ तत्रि कुटुम्बधारणे चुरादिः । तंत्रयतीति णेरिति णिलोपः । तंत्रीर्वीणा ॥

(तत्त्वदी०)-अवि ॥ अवीरिति ॥ अवति गर्भमवीः । 'अवीं स्त्रीं गर्भिणीं विदुः' ॥ तरीर्नौः ॥ स्तरीः श्यन धूम इति च ॥

(लक्षेर्मुट् च) लक्ष्मीः ॥ ॥ इति तृतीयः पादः ॥

(सुबोधिनी)-लक्षेर्मुट् च ॥ लक्ष दर्शनाङ्कनयोः चुरादिः अस्मादीप्रत्ययः स्यात् प्रत्ययस्य मुडागमश्च ॥ णेरिति णिलोपः । लक्ष्मीः । 'लक्ष्मीः संपत्तिशोभयाः । ऋद्ध्योषधौ च पद्मायाम्' इति मेदिनी॥दीर्घादपि कृदिकारादिति पाक्षिक ईप् कैश्चि-दिष्यते । अत एव वातप्रमी श्रीलक्ष्मीत्यादिशब्दा पक्षे ईबन्ता अपि ।'आशीराश्यु-हिदंष्ट्रायां लक्ष्मीर्लक्ष्मी हरिप्रिया' इति द्विरूपकोशः ॥ ॥ इति सुबोधिन्यामुणादौ तृतीयः पादः ॥

(वातप्रम्यादयः) वातप्रमीः।यान्त्यनेनेति ययीः। पा रक्षणे पपीः॥

(सुबोधिनी)-दूषेरीकः ॥ ईकप्रत्ययमाह--दुष वैकृत्ये ण्यन्तः। दुषेर्णाविति दीर्घः। णेरिति णिलोपः। 'दूषीका नेत्रयोर्मलम्' इत्यमरः॥ किं च अकृतेऽपि ईक-प्रत्यये दूषयतेर्धातोरिगितीतिप्रत्यये दूषिः। कृदिकारादिति ङीपि दूषी। उभाभ्यामपि स्वार्थे कप्रत्यये ह्रस्वो वेति पाक्षिके ह्रस्वे च कृते दूषिका दूषीका च सिद्ध्यति।'पिच-ण्डो दूषिका दूषी पिचाटंच दृशोर्मलम्'इति विक्रमादित्यकोशः॥'दूषिका तूलिकायां च मले स्याल्लोचनस्य च' इति मेदिनी ॥

(तत्त्वदी०)-दूषेरिति ॥ 'दूषीका नेत्रयोर्मलम्' ॥

(अनिहृषिभ्यां किच्च) अनीकम्। हृषीकम् ॥

(सुबोधिनी)-अनिहृषिभ्यां किच्च ॥ कीकप्रत्ययः स्यात्॥ कित्त्वान्न गुणः। अन प्राणने। अनीकम्।'अनीकोऽस्त्री रणे सैन्ये' इति मेदिनी॥ हृष तुष्टौ। हृषी-कम्। 'हृषीकं विषयीन्द्रियम्' इत्यमरः ॥

(अलीकादयः)अल भूषणादौ। अलीकम्। वलीकम्। पुण कर्माणि शुभे पुण्डरीकम्। ईषिका-इषीका ॥

(सुबोधिनी)-अलीकादयः॥ कीकप्रत्ययान्ता निपात्यन्ते॥ अल भूषणादौ। अलीकम्। 'अलीकं त्वप्रियेऽपि स्याद्दिव्येऽसत्ये नपुंसकम्' इति मेदिनी ॥ 'अली-कमप्रिये लाभे वितथे' इति हेमचन्द्रः॥ विपूर्वात् व्यलीकम्। 'व्यलीकमप्रियाकार्य-वैलक्ष्येष्वपि पीडने। ना नागरे' इति मेदिनी ॥ वल संवरणे। वलीकम्। 'वलीक-नीध्रे पटलप्रान्ते' इत्यमरः॥ वलतेर्निपातनान्मुमागमे कृते वल्मीकम्। 'वामलूरश्च नाकुश्च वल्मीकं पुन्नपुंसकम्' इत्यमरः॥ पुण कर्माणि शुभे।धातोर्नुमागमो णस्य डश्च प्रत्ययस्यारुडागमश्च निपातनात्। पुण्डरीकम्। ''पुण्डरीकं सिताम्भोजे सितच्छत्रे च भेषजे। पुंसि व्याघ्रेऽग्निदिङ्नागे कोशकारान्तरेऽपि च'' इति मेदिनी॥ ईष गतौ। निपातनाद्ध्रस्वः। इषीका शलाका ॥

(तत्त्वदी०)-अलीकादय इति ॥ अलीकं मिथ्या। 'वलीकं पटलप्रान्ते' ॥

(कृादेरीषः) करीषम्। तॄ तरीषः ॥

(सुबोधिनी)-कॄादेरीषः॥ ईषप्रत्ययमाह--कॄ विक्षेपे। करीषम्। 'करीषं गोमयं शुष्कम्' इत्यमरः ॥ तॄ प्लवनतरणयोः। तरीषः। तरीषा ॥

(तत्त्वदी०)-कॄादेरिति ॥ 'करीषोऽस्त्री पशुशुष्कगोमययोः' ॥

(शॄादेः कीषः) शॄ शिरीषः। पॄ पुरीषम् ॥

(सुबोधिनी)-शॄादेः कीषः॥शॄ हिंसायाम्। ऋत इद्धातोः। शिरीषो वृक्षः॥पॄ पालनपूरणयोः। पोरुत्युर्। पुरीषम्। 'गूथं पुरीषं वर्चस्कमस्त्री विष्ठाविशौ स्त्रियौ' इत्यमरः ॥

(सुबोधिनी)—गमेरिनिर्भविष्यति ॥ इकार उच्चारणार्थः । ...
गम्लृ गतौ । इनामिति दीर्घः । गमी । आङ्पूर्वाद्गमेरिनिप्रत्ययस्तु णित् । ...
वृद्धिः । आगमिष्यतीति आगामी ॥ भू सत्तायामस्मादपि इनिः स च णित्स्यात्
भविष्यतीति भावी ॥

(परमे स्थः कित्) परमेष्ठी ॥

(सुबोधिनी)—परमे स्थः कित् ॥ परमशब्दे उपपदे तिष्ठतेरिनिः कित्स्यात् ॥ कित्त्वादातोऽनपीत्यालोपः ।परमेष्ठी । 'परमेष्ठी पितामहः' इत्यमरः॥सप्तम्या अलुक्॥

(मन्थ इनिः कित्) मन्था, मन्थानौ ॥

(सुबोधिनी)—मन्थ इनिः कित् ॥ मन्थ विलोडने अस्मादिनिः कित् । नो लोप इति नलोपः । इतोत्पथ्यसु इत्यत्वम् आसौ इति टेरात्वे थो नुट् । मन्थाः । 'मन्था मन्थनदण्डे च वज्रे चार्केऽपि च स्मृतः' ॥

(पतेस्थश्च) पन्थाः, पन्थानौ ॥

(सुबोधिनी)—पतेस्थश्च ॥ पत्लृ गतौ अस्मादिनिःस्यात्तकारस्य थश्च ॥ पन्थाः पथे गतावित्यस्मात्पचाद्यप्रत्ययेऽकारान्तोऽप्यस्ति । 'वाटः पथश्च मार्गश्च' इति सुभूतिचन्द्रः ॥ ऋभवो देवाः क्षयन्त्यास्मिन्निति विग्रहे बाहुलकात् डप्रत्यये ऋभुक्षः ।'ऋभुक्षः स्वर्गवज्रयोः' इति विश्वः ॥ ततो मत्वर्थीय इन्, ऋभुक्षिन्निति नान्तं प्रातिपदिकम् अत्वे आत्वे च ऋभुक्षा इन्द्रः ॥

(बलाकादयः) बलाका । पताका । खज मन्थे । खजाकः। पिनाकः । तड आघाते तडाकः ॥

(सुबोधिनी)—बलाकादयः ॥ आकप्रत्ययान्ता निपात्यन्ते—बल प्राणने । बलाका । "बलाका बकपंक्तिः स्याद्बालाका बिसकण्ठिका । बलाका कामुकी प्रोक्ता बलाकश्च बको मतः" इति विश्वः॥पत्लृ पतने । पताका । 'पताका वैजयन्त्यां च सौभाग्येऽङ्के ध्वजेऽपि च' इति विश्वः॥'पताका वैजयन्त्यां च सौभाग्ये नाटकाङ्कयोः' इति मेदिनी ॥ खज मन्थे । खजाकः पक्षी ॥ पा रक्षणे । पातेरित्वं नुम च निपात्यते । पिनाकः । 'क्लीबपुंसोः पिनाकः स्याच्छूलशंकरधन्वनोः' इत्यमरः ॥ 'पिनाकोऽस्त्री रुद्रचापे पांशुवर्षत्रिशूलयोः' इति मेदिनी ॥ पिष्लृ संचूर्णने । षस्य यत्वं वातोर्यगागमश्च निपात्यते । पिण्याकः । पिण्याकोऽस्त्री तिलकल्के हिङ्गुबाह्लीकसिह्के' इति मेदिनी ॥ तड आघाते । तडाकः ॥

(तत्त्वदी०)—पिनाक इति ॥ "क्लीबपुंसोः पिनाकः स्याच्छूलशंकरधन्वनोः" ॥

(दूषेर्गकः) दूषिका ॥

(उलूकादयः) उलूकः । शमु शम्बूकः । शल शालूकः । मडि भूषायाम् मण्डूकः ॥

(सुबोधिनी)-उलूकादयः ॥ ऊकप्रत्ययान्ता निपात्यन्ते-वल संवरणे संप्रसारणं निपातनात् । उलूकः । 'उलूकः पुंसि काकाराविन्द्रे भारतयोधिनि' इति मेदिनी ॥ शमु उपशमे धातोर्बुगागमो निपातनात् । शम्बूकः । 'शम्बूको गजकुम्भान्ते घोषे स्याच्छूद्रतापसे' इति मेदिनी ॥ बाहुलकादुकप्रत्ययोऽपि । शम्बुकम् 'जम्बूकं जम्बुकं प्रोक्तं शम्बूकमपि शम्बुकम्' इति द्विरूपकोशः ॥ 'शम्बूका :जलशुक्तयः' इत्यमरः ॥ शल गतौ । निपातनाद्वृद्धिः । शालूकम् । 'सौगन्धिकं तु कह्लारम्' इत्याद्युपक्रम्य 'शालूकमेषां कन्दः स्यात्' इत्यमरः॥ एषां सौगन्धिकादीनां कुमुद-कैरवान्तानां कन्दो मूलं शालूकमित्यर्थः ॥ मडि भूषायाम् ॥ मण्डते वर्षासमयमिति मण्डूकः भेकः ॥

(तत्त्वदी०)-उलूकादय इति ॥ 'उलूकाविन्द्रमेचकौ' । शम्बूको जलशुक्तिः । शालूकं कन्दविशेषः ॥

(नियो मिः) नेमिः ॥

(सुबोधिनी)-नियो मिः ॥ मिप्रत्ययमाह-णीञ् प्रापणे । नयति चक्रमिति नेमिः । 'नेमिर्ना तिनिशे कूपत्रिकाचक्रान्तयोः स्त्रियाम्' इति मेदिनी ॥

(अर्तेरुच्च) ऊर्मिः ॥

(सुबोधिनी)-अर्तेरुच्च ॥ मिप्रत्ययः स्याद्धातोरुदादेशश्च ॥ ऋ गतौ ऊर्मिः । "ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः । वस्त्रसंकोचरेखायां वेदनापीडयोरपि" इति मेदिनी ॥

(भुवः किच्च) भूमिः ॥

(सुबोधिनी)-भुवः किच्च ॥ मिक् स्यात् ॥ कित्त्वान्न गुणः । भू सत्तायाम् । भवन्ति भूतान्यस्यामिति भूमिः । 'भूमिर्वसुन्धरायां स्यात्स्थानमात्रेऽपि च स्त्रियाम्' इति मेदिनी ॥

(अश्नोते रश् च) रश्मिः ॥

(सुबोधिनी)-अश्नोते रश् च ॥ अशूङ् व्याप्तावस्मान्मिः स्याद्धातो रशादेशश्च । रश्मिः ॥ 'रश्मिः पुमान्दीधितौ स्यात्पक्ष्मप्रग्रहयोरपि' इति मेदिनी ॥

(तत्त्वदी०)-रश्मिरिति ॥ रज्जुः किरणो रश्मिः ॥

(दादेर्निः कित्) दाणिः । वृष्णिः ॥

(अजर्क्जः) ऋजीषम् । अवि शब्दे अम्बरीषो निपात्यः अम्बरीषम् ॥

(सुबोधिनी)–अर्जेर्क्जः ॥ अज अर्जने अस्मात्कीषः स्याद्धातोर्ऋजादेशश्च॥ ऋजीषम्।'ऋजीषं पिष्टपचनम्'इत्यमरः ॥ अवि शब्दे । निपातनादीषप्रत्ययःप्रत्ययस्यारुडागमश्च । अम्बरीषः "अम्बरीषं रणे भ्राष्ट्रे क्लीबं बृसि नृपान्तरे।नरकस्य प्रभेदे च किशोरे भास्करेऽपि च । आम्रातकेऽनुपाते च" इति मेदिनी॥ 'अम्बरीषः पुमान्भ्राष्ट्रम्' इति वोपालितः॥'क्लीबे पुंसि नृपान्तरे'। 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना' इत्यमरः॥

(तत्त्वदी०)–अम्बरीष इति ॥ 'अम्बरीषः पुमान्भ्राष्ट्रः क्लीबेऽपि' ॥

(कादेरीरः) करीरः । शॄ शरीरम् ॥

(सुबोधिनी)–कादेरीरः ॥ ईरप्रत्ययमाह–कॄ विक्षेपे । करीरः । "वंशाङ्कुरे करीरोऽस्त्री वृक्षभिदटयोः पुमान्। करीरा चीरिकायां च दन्तमूले च दन्तिनाम्"इति मेदिनी ॥ शॄ हिंसायाम् । शीर्यते इति शरीरम् । अर्द्धर्चादिः । 'शरीरं वर्ष्म विग्रहः' इत्यमरः ॥

(तत्त्वदी०)–कादेरीरिति ॥ करीरो वंशाङ्कुरः ॥

(गभीरादयः) गम्लृ गभीरः–गम्भीरः । वश उशीरम् । घस्लृ क्षीरम् ॥

(सुबोधिनी)–गभीरादयः॥ ईरप्रत्ययान्ता निपात्यन्ते ॥ गम्लृ गतौ । मस्य भः पाक्षिको नुम् च निपातनात् । गभीरम्–गम्भीरम् । 'निम्नं गभीरं गम्भीरम्'इत्यमरः ॥ वश् कान्तौ । निपातात्कीरप्रत्ययः। ग्रहादिति संप्रसारणम् । उशीरम् ।'मूलेऽस्योशीरमस्त्रियाम । 'अभयं नलदं सेव्यम' इत्यमरः ॥ घस्लृ अदने । कीरप्रत्ययो निपातनात् । गमहनेत्युपधालोपे कत्वं षत्वम् । क्षीरम् । 'क्षीरं च दुग्धे नीरे च' इति विश्वः ॥

(शीङो धुक्लक्वलवलञ्वालपालाः) शीधु । शीलम् । शेवलः । शैवलः । शेवालम् । शेपालम् ॥

(सुबोधिनी)–शीङो धुक्लक्वलवलञ्वालपालाः ॥ शीङ् स्वप्ने अस्मात्षट् प्रत्यया भवन्ति ॥ शेरतेऽनेनेति शीधुः । अर्द्धर्चादिः । 'मैरेयमासवः शीधुः' इत्यमरः ॥ लक् । शीलम । 'शीलं स्वभावे सद्वृत्ते' इति मेदिनी ॥ वल । शेवलम । वलञ् । शैवलम् । 'जलनीलीः तु शैवालं शैवलः' इत्यमरः॥ 'शैवलं पद्मकाष्ठे स्याच्छैवाले तु पुमानयम' इति मेदिनी ॥ वाल । शेवालम ॥ पाल । शेपालम । 'शैवालं शैवलो न स्त्री शेपालो जलनीलिका' इति शब्दार्णवः ॥

(तत्त्वदी०)–शीङ इति ॥ [illegible] ॥ 'शैवालं शैवलो न स्त्री शेपालो जलनीलिका' ॥

(सूङादेः क्रिः) सूरिः । भूरिः । अद्रिः ॥

(सुबोधिनी)—सूङादेः क्रिः ॥ क्रिप्रत्ययमाह—कित्त्वान्न गुणः ॥ षूङ् प्राणिप्रसवे । सूरिः 'धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः' इत्यमरः ॥ अभिधानमालायां सूरीति नान्तमुदाहृतम् ॥ भू सत्तायाम् । भूरिः । "भूरिर्ना वासुदेवे च हरे च परमेष्ठिनि । नपुंसकं सुवर्णे च प्राज्ये स्याद्वाच्यलिङ्गकः" इति मेदिनी ॥ अद भक्षणे । अद्रिः । 'अद्रयो द्रुमशैलार्काः' इत्यमरः ॥

(रादेस्त्रिः) रात्रिः । शत्रिः । अत्रिः ॥

(सुबोधिनी)—रादेस्त्रिः ॥ त्रिप्रत्ययमाह—रा दाने । रात्रिः ॥ शद्लृ शातने । शत्रिः । 'शत्रिर्नाम्भोधरे विष्णौ' इति मेदिनी ॥ अद भक्षणे अत्रिर्मुनिभेदः ॥

(पतेरत्रिः) पतत्रिः ॥

(सुबोधिनी)—पतेरत्रिः ॥ त्रित्ययमाह—पत्लृ गतौ । पतत्रिः पक्षी । पतत्रशब्दात्पक्षवाचकान्मत्वर्थे इनि तु नान्तः । पतत्री, पतत्रिणौ ।

(तत्त्वदी०)—पतेरत्रिरिति । पक्षिणि ॥

(मृङ ईचिः) मरीचिः ॥

(सुबोधिनी)—मृङ ईचिः ॥ ईचिप्रत्ययमाह—मृङ् प्राणत्यागे । मरीचिः । 'मरीचिः कृपणे दीप्तौ ऋषिभेदे च दृश्यते' इति विश्वः॥'मरीचिर्मुनिभेदे ना गभस्तावनपुंसकम्' इति मेदिनी ॥

(वेञो डिच्च) वीचिः ॥

(सुबोधिनी)—वेञो डिच्च ॥ वेञ् तन्तुसंताने अस्मादीचिर्डित्स्यात् ॥ वीचिः । 'वीचिः स्वल्पे तरंगे स्यादवकाशे सुखे द्वयोः' इति विश्वः ॥

(पुरः कुषः) पुर अग्रगमने । पुरुषः ॥

(सुबोधिनी)—पुरः कुषः ॥ कुषप्रत्ययमाह—कित्त्वान्न गुणः । पुर अग्रगमने । पुरुषः । बाहुलकाद्दीर्घे पूरुषः । 'पुरुषस्त्वात्मनि नरे पुन्नागे च' इति हैमः॥'पुरुषाः पूरुषा नरः' इत्यमरः ॥

(पॄनहिकलिभ्य उषः) परुषम् । नहुषः । कलुषम् ॥

(सुबोधिनी)—पॄनहिकलिभ्य उषः ॥ उषप्रत्ययमाह—पॄ पालनपूरणयोः । परुषम् । 'परुषं कर्बुरे रूक्षे निष्ठुरोक्तौ च वाच्यवत्' इति मेदिनी॥णह बन्धने । नहुषः। 'नहुषो राजविशेषे नागभिद्यपि' इति हैमः॥कल शब्दसंख्यानयोः । कलुषम्। 'कलुषं त्वाविलैनसोः' इति विश्वः ॥

(पीयेरूषः) पीय पाने सौत्रः । पीयूषम् । पेयूषः ॥